**Teach Yourself Samskrit**

# संस्कृतस्वाध्यायः

## द्वितीया दीक्षा

# व्यवहारप्रदीपः

## प्रथमः भागः

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

राष्ट्रिय संस्कृत संस्थानम्
मानितविश्वविद्यालयः
नव देहली

# Teach Yourself Samskrit

## संस्कृतस्वाध्यायः

### द्वितीया दीक्षा

# व्यवहारप्रदीपः

### प्रथमः भागः

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

सहसम्पादकाः
ललित कुमार त्रिपाठी
वाई. एस्. रमेशः
बनमाली बिश्वालः
सुकान्त कुमार सेनापतिः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

Publisher :
Prof. Vempaty Kutumba Sastry
Vice-Chancellor

RASHTRIYA SANSKRIT SANSTHAN
56-57, Institutional Area, Janakpuri,
New Delhi-110 058
EPABX : 25540993, 25540995
Gram : SAMSTHAN
E-mail : rsks@vsnl.net.in
Visit our website at : www.sanskrit.nic.in

Edition : First, 2004 (50,000 Copies)

Vol.I - ISBN : 81-86111-10-7

All rights reserved. No reproduction or translation of this book or part thereof in any form, should be made. Neither it may be stored in a retrieval system, nor transmitted, by any means, electronic, mechanical, photocopying, recording or otherwise, without the written permission of the publisher.

© Rashtriya Sanskrit Sansthan

Price : Rs. 200.00 (Per Set)

Printer :
M/s. Goyal Stationers
B-36/9, G.T. Karnal Road,
Industrial Area, Delhi-110033

# संस्कृतस्वाध्यायः

## द्वितीया दीक्षा

**सङ्कल्पना एवं दिग्दर्शन**

प्रो. वेम्पटि कुटुम्बशास्त्री

**परामर्श**

प्रो. श्रीधर वसिष्ठ
प्रो. रामकृष्णमाचार्य
डॉ. हिन्द केसरी
श्री जि. महाबलेश्वर भट्ट
श्री चमूकृष्ण शास्त्री
श्री जनार्दन हेगड़े
डॉ. विश्वास
श्री चाँद किरण सलूजा

**पुनरीक्षण**

डॉ. हिन्द केसरी
डॉ. आजाद मिश्र
डॉ. आर. देवनाथन्
डॉ. विजयपाल शास्त्री

**लेखकसमिति**

श्री जनार्दन हेगड़े (अध्यक्ष)
डॉ. बनमाली विश्वाल
डॉ. विश्वास
डॉ. ललित कुमार त्रिपाठी (संयोजक)
श्रीमती शशिप्रभा गोयल
डॉ. वाई एस. रमेश
डॉ. श्रीधर मिश्र
डॉ. बोध कुमार झा

**लेखन/समीक्षण/कार्यशाला में प्रतिभागी अन्य सदस्य**

डॉ. मुरलीधर शर्मा
श्रीमती शान्तला
श्रीमती नागरत्ना
डॉ. सत्यनारायण आचार्य
डॉ. प्रकाश पाण्डेय
डॉ. रमाकान्त मिश्र
डॉ. सच्चिदानन्द मिश्र
श्रीमती विजयलक्ष्मी
डॉ. चन्द्रकान्त
डॉ. नरसिंह मूर्ति
श्रीमती पंकजा
श्रीमती सुचेता
डॉ. शुक्ला मुखर्जी
कु. धन्यता
डॉ. पी. वी. सुब्रह्मण्यम्
श्री नारायण भट्ट
डॉ. धर्मेन्द्र कुमार सिंहदेव
श्री वेङ्कटेश मूर्ति
डॉ. रत्नमोहन झा
डॉ. अजय मिश्र

**परियोजनासंयोजक**

डॉ. ललित कुमार त्रिपाठी

**सहायक संयोजक एवं सहायक सम्पादक**

डॉ. धर्मेन्द्र कुमार सिंहदेव

**चित्रनिर्माण**

श्री कल्लोल मजूमदार

**प्रबन्धन/सहयोग**

श्री चन्दन सिंह कनियाल
श्री हरभजन सिंह सन्धू

**टाईप सेटिंग**

श्री राजीव कुमार सिंह

**चित्रसज्जा**

श्री मनोज गुप्ता एवं श्री प्रेम गोयल

**सहयोग**

श्री कृष्णकान्त पचौली



मानव संसाधन विकास मंत्री
भारत
नई दिल्ली-110 001
MINISTER OF
HUMAN RESOURCE DEVELOPMENT
INDIA
NEW DELHI-110 001

सत्यमेव जयते

# सन्देश

संस्कृत भाषा के संवर्धन एवं प्रचार-प्रसार की दिशा में राष्ट्रिय संस्कृत संस्थान के द्वारा किया जा रहा प्रयास अत्यन्त सराहनीय है। संस्थान के द्वारा संस्कृत भाषा को सर्वजन स्पर्शी बनाने हेतु **संस्कृत स्वाध्याय योजना** का आरम्भ तथा क्रियान्वयन होने से मुझे अत्यधिक सुखद अनुभूति हो रही है। इस योजना के अन्तर्गत प्रथमा दीक्षा की पाठ्यसामग्री की लक्षाधिक प्रतियाँ अध्येताओं तक पहुँच चुकी हैं और हजारों पाठकों के द्वारा द्वितीया दीक्षा की पाठ्यसामग्री प्रतीक्षित है। इससे यह पुष्ट होता है कि भारतीय जनमानस में संस्कृत के प्रति अत्यधिक समादर एवं जिज्ञासा है।

इस योजना की सफलता की कामना करते हुए मैं आशा करता हूँ कि संस्थान के द्वारा प्रकाश्यमान **द्वितीया दीक्षा** की पाठ्यसामग्री संस्कृत भाषा की लोकप्रियता एवं व्यापकता को निरन्तर बढ़ाते हुए पाठकों की आकाङ्क्षा को पूर्ण करने में सफल होगी।

शुभेच्छाओं सहित।

(अर्जुन सिंह)

# सम्पादकीय

द्वितीया दीक्षा की पाठ्यसामग्री अध्येताओं के सम्मुख प्रस्तुत करते हुए प्रसन्नता का अनुभव कर रहा हूँ। राष्ट्रिय संस्कृत संस्थान ने जिस महत् सङ्कल्प को लेकर संस्कृत स्वाध्याय योजना का आरम्भ किया था उसका प्रथम चरण प्रथमा दीक्षा पाठ्यसामग्री के रूप में एक प्रयोग एवं उसके परीक्षण के रूप में अध्येताओं को उपलब्ध कराया गया था। यह योजना, यह प्रयोग तथा इसका परीक्षण इतने व्यापक स्तर पर लोकप्रिय होता जा रहा है कि इसकी हमें कल्पना भी न थी, किन्तु इतना तो पूर्वानुमान अवश्य था कि संस्कृत सीखने के इच्छुक अध्येताओं को यह सामग्री एक नयी दिशा, नवोत्साह व नवस्फूर्ति प्रदान करेगी। विगत दो वर्षों के अन्दर ही प्रथमा दीक्षा सम्बद्ध पाठ्यसामग्री की एक लाख से अधिक प्रतियाँ मुद्रित हो चुकी हैं। अनौपचारिक संस्कृत शिक्षण केन्द्रों के माध्यम से लगभग साठ हजार अध्येताओं को प्रथमा दीक्षा का प्रशिक्षण दिया जा चुका है। अब जब हजारों की संख्या में द्वितीया दीक्षा के पाठकगण इसकी प्रतीक्षा में है, यह सामग्री उन तक पहुँचाते हुए हम पुनः द्वितीय स्तर के प्रयोग के परीक्षण की दिशा में आगे बढ़ रहे हैं। यह प्रयोग कितना सफल होता है, यह तो आने वाले दिनों में विदित हो सकेगा।

द्वितीया दीक्षा पाठ्यसामग्री की मुख्य पुस्तक छह स्तबकों में विभक्त है। इसमें प्रथम, द्वितीय एवं तृतीय स्तबक के अन्तर्गत सुबन्त पदों का वाक्यों में प्रयोग करना बताया गया है। जैसा कि प्रथमा दीक्षा के अध्ययन कर चुके अध्येताओं को ज्ञात है कि प्रथमा दीक्षा में हमने सुबन्त पदों में अकारान्त पुंलिङ्ग, आकारान्त / ईकारान्त स्त्रीलिङ्ग. एवं अकारान्त नपुंसकलिङ्ग शब्दों का ही शिक्षण किया था। द्वितीया दीक्षा के अन्तर्गत इकारान्त, उकारान्त आदि शब्दों का शिक्षण दिया गया है। प्रथमा दीक्षा में क्रियापदों में कुछ सरल रूपों वाली परस्मैपदी धातुओं का ही लट्, लृट् तथा लङ् लकारों में परिचय कराया गया था, जबकि द्वितीया दीक्षा में इन्हीं लकारों में कुछ प्रसिद्ध आत्मनेपदी धातुओं का परिचय कराया गया है। प्रथमा दीक्षा में मात्र कर्तृवाच्य का ही शिक्षण कराया गया था, द्वितीया दीक्षा में कर्मवाच्य एवं भाववाच्य का भी शिक्षण कराया गया है। इस दीक्षा में विशेष्य-विशेषणभाव तथा शतृ-शानच् प्रत्ययों पर भी विस्तार से शिक्षण सामग्री प्रदान की गयी है। प्रथमा दीक्षा की पाठ्यसामग्री के अन्तर्गत हमने पाँच पुस्तकें उपलब्ध करायी थी (i) वर्णमाला (उन अध्येताओं के लिए जो वर्णमाला से परिचित नहीं हैं) (ii) वाक्यव्यवहारः (इसमें पाठ्यबिन्दुओं का वाक्यों में प्रयोग बताया गया था (iii) वाक्यविस्तरः (पाठ्यबिन्दुओं को छोटे-छोटे वर्णनपूरक पाठों के माध्यम से पढ़ाया गया था (iv) सम्भाषणम् (इसमें सरल सम्भाषण के कुछ प्रसङ्ग दिए गए थे) (v) परिशिष्टम् (इसमें वाक्यव्यवहारः तथा वाक्यविस्तरः की उत्तरमाला तथा इस दीक्षा में प्रयुक्त शब्दों का कोश दिया गया था)।

द्वितीया दीक्षा पाठ्यसामग्री के अन्तर्गत हम आपको मुख्य पुस्तक (दो भागों में) एवं परिशिष्टम् उपलब्ध करा रहे हैं। मुख्यपुस्तक के अन्तर्गत ही पाठ्यबिन्दुओं का सचित्र उपस्थापन, वाक्यों के द्वारा उपस्थापन एवं तदाधारित अभ्यास कराने के बाद तत्सम्बद्ध बिन्दु पर ही साभ्यास पाठ भी दिया गया है। पाठ्यबिन्दु का इन

सबके द्वारा शिक्षण प्रदान करने के उपरान्त सम्बद्ध बिन्दु पर संगृहीत कतिपय सुभाषित भी दिए गए हैं। तदनन्तर सम्बद्ध बिन्दु पर एक कथा या धारावाहिक कथा का एक अंश प्रदत्त है। इस प्रकार यह पुस्तक पाठ्यबिन्दुओं का वाक्यों में शिक्षण एवं पाठों में शिक्षण प्रदान करते हुए साथ-साथ कथा में प्रयोग दर्शाते हुए उन बिन्दुओं पर सुभाषित-संग्रह प्रस्तुत करती हुई एक रोचक रचना के रूप में सामने आई है। इसीलिए द्वितीया दीक्षा में वाक्य द्वारा एवं पाठ द्वारा शिक्षण के लिए अलग-अलग पुस्तक देने की अपेक्षा नहीं रह जाती है। सम्पूर्ण अभ्यासों की उत्तरमाला तथा अनुप्रयुक्त शब्दकोश को 'परिशिष्टम्' के अन्तर्गत रखा गया है।

संस्थान की पञ्चस्तरीय संस्कृत शिक्षण योजना के स्वरूप एवं उद्देश्य संक्षिप्त रूप में इस प्रकार है–

## पञ्चस्तरीय पाठ्यक्रम (संक्षिप्त परिचय)

| पाठ्यक्रम | उद्देश्य |
|---|---|
| प्रथमा दीक्षा (प्रथम स्तर) **व्यवहारावतरणी** | ❖ इसका उद्देश्य दैनन्दिन व्यवहारोपयोगी संस्कृत में बोलने, लिखने तथा पढ़ने की प्रारम्भिक क्षमता का विकास करना है। |
| द्वितीया दीक्षा (द्वितीय स्तर) **व्यवहारावगाहनी** | ❖ इसका उद्देश्य व्यावहारिक दृष्टि से महत्त्वपूर्ण सभी प्रकार के भावों को संस्कृत में अभिव्यक्त करने की क्षमता का विकास करना है। |
| तृतीया दीक्षा (तृतीय स्तर) **वाङ्मयावतरणी** | ❖ इसका प्रमुख उद्देश्य अध्येता की भाषा को परिष्कृत करते हुए संस्कृत वाङ्मय की सरल रचनाओं के समझने की सामर्थ्य का विकास करना है। |
| चतुर्थी दीक्षा (चतुर्थ स्तर) **वाङ्मयावगाहनी** | ❖ इस स्तर में उच्चस्तरीय संस्कृत शिक्षण के साथ-साथ संस्कृत वाङ्मय की विभिन्न कृतियों के अध्ययन के द्वारा अध्येता की भाषा को साहित्यक लेखन तथा सम्भाषण की दृष्टि से विकसित करना है। |
| पञ्चमी दीक्षा (पञ्चम स्तर) **व्युत्पादिनी** | ❖ इस स्तर के माध्यम से भाषीय प्रयोग कौशल के साथ काव्य एवं शास्त्र के गंभीर अध्ययन हेतु पृष्ठभूमि के रूप में आवश्यक व्युत्पत्ति का विकास करना है। |

इस योजना से स्पष्ट है, संस्थान संस्कृत जिज्ञासुओं को संस्कृत अध्ययन हेतु व्यापक अवसर उपलब्ध कराना चाहता है। इनमें प्रथमा दीक्षा से तृतीया दीक्षा पर्यन्त शिक्षा प्राप्त करने वाले अध्येताओं में संस्कृत वाङ्मय के पढ़ने और समझने की क्षमता विकसित हो सकेगी जबकि चतुर्थी एवं पञ्चमी दीक्षा का अध्ययन करने वाले अध्येताओं में गभीर संस्कृत अध्ययन की पृष्ठभूमि तैयार हो सकेगी।

प्रस्तुत पाठ्यसामग्री के विषय में आप हमें अपने विचारों एवं परामर्शों से अवश्य अवगत कराएँ जिससे हम इसमें आवश्यक संशोधन, परिवर्तन व परिवर्धन कर सकें। हमारा यही मानना है कि कोई भी कार्य अपने में पूर्ण नहीं कहा जा सकता है, अतः उसमें उत्तरोत्तर गुणवत्ता लाने का प्रयास किया जा सकता है। आपके अमूल्य परामर्श ही इसकी गुणवत्ता के संवर्धन में हमारे संबल होंगे।

**वेम्पटि कुटुम्ब शास्त्री**

# EDITORIAL

I feel delighted while presenting the study material of *dvitīyā dīkṣā* (Second Level Course) in the hands of the students. *Samskrit Svādhyāya Yojanā* was started by Rashtriya Sankrit Sansthan with a great resolve. It was meant to provide new direction, new enthusiasm and wilful involvement to the people who are desirous of learning Samskrit language. The first phase of this programme was made available to the students in the form of the study material of *prathamā dīkṣā* (First Level Course). This programme yielded widespread and very high result which were, indeed, beyond our imagination and expectation. As a result, more than one lac copies of the study material of first level course have been printed within the past two years. Nearly sixty thousand students have been taught the first level course through Non-Formal Samskrit Education Centres. At present, thousands of students are waiting for the commencement of second level course. By making this material available to them, we are again marching forward in the direction of experiment and trial of second level course. The success of this experiment would be revealed in the days to come.

The main book of study material of second level course is divided into six parts. The use of declensions in sentences has been taught under the first, second and third parts. The students who have completed the study of *prathamā dīkṣā* are aware that we have taught 'अ' ending masculine, 'आ' ending and 'ई' ending feminine and 'अ' ending neuter gender words only in the *prathamā dīkṣā*. The prominant words ending with other vowles and constnants are being taught under *dvitīyā dīkṣā*. Amongst the verbs some परस्मैपदी roots having simple forms were introduced in लट् (Present Tense), लृट् (Simple Future) and लङ् (Imperfect Past) and लोट् (injunction/prayer) in the *prathamā dīkṣā*. Some well-known roots in the same lakaras (tenses / moods) are being introduced in the *dvitīyā dīkṣā*.

In the *prathamā dīkṣā*, additional study material in the form of narration and dialogue was provided separately. In the present case it stands amalgamated. After introducing the point of teaching through pictorial assistance, the same has been demonstrated in sentences and reinforced through various exercises, as in the *prathamā dīkṣā*, a lesson centered around the point of teaching along with appropriate exercises and a story or a part of serial story with emphasis on use of the point of teaching are appended to each lesson. A few *subhāṣitas* containing the point of teaching are given at the end of each lesson just for recitational purpose. We sincerely believe that this method of introducing the point of teaching varoiusly and in various froms would help the student to grasp its meaning and usage more naturally and more clearly. To fecilitate self evalutation, a key to all exercies and glossary are provided in the *pariśiṣṭam*. A student is expected to do the exercises with pencil, evaluate himself with the help of key, erase the work done and repeat doing so until he/she gets 100 out of 100.

Our best efforts are put in to see the learning inputs are graded carefully and arranged in ascending difficulty. Our approach is to prioritise the learning inputs on the basis of "from much needed usages to less needed usages." Our aim is to see each level to be comprehensive and total in itself. We opted for gradual expansion of area of learning. While it is to be seen as to how far we succeded to design the material to be totally fit for self study, we carry strong conviction that the package is comprehensive, easy and an effective tool to learn Samskrit.

Users are the best judges of our efforts. We earnestly call for feedback of users and suggestions for further improvement. While sky is the limit for perfection the opinion of users and scholars is the ladder to scale it. We sincerely hope that *dvitīyā dīkṣā* shall enjoy same and more patronage from you as the *prathamā dīkṣā*.

A short description of nature and objectives of five-level Samskrit self study programme is given hereunder to introduce our project in its entirety.

## Five Level Syllabus (Brief Introduction)

| Syllabus | Objectives |
|---|---|
| **प्रथमा दीक्षा** (First Level) vyavahārāvataraṇī | ❖ Its objective is to develop the elementary skills of speaking, writing and reading day to day practical Samskrit. |
| **द्वितीया दीक्षा** (Second Level) vyavahārāvagāhanī | ❖ It aims at developing the skill of expressing in Samskrit all those ideas which are important from practical point of view. |
| **तृतीया दीक्षा** (Third Level) vāṅmayāvataraṇī | ❖ Its main objective is to develop the vision of understading the easy works of Samskrit literature by refining the language skills of the student. |
| **चतुर्थी दीक्षा** (Fourth Level) vāṅmayāvagāhanī | ❖ This level aims at developing the language of the student from the point of view of literary writing and delivering speech by the study of various works of Samskrit literature. |
| **पञ्चमी दीक्षा** (Fifth Level) vyutpādinī | ❖ This level increases the abilities of the students in a comprehenive way so as to be able to under take serious study of literature and Shastras along with the skilful use of language. |

V. KUTUMBA SASTRY

# कृतज्ञताज्ञापनम्

संस्कृतस्वाध्याययोजनायां द्वितीयादीक्षासामग्रीं प्रकशयन् मोमुदीति मे स्वान्तम्। कार्यम् एतत् नैकेषां साहाय्येन पूर्णताम् अगादिति हेतोस्तेभ्यस्तेभ्यो धन्यतावादविज्ञापना कातज्ञ्र्यनिवेदनञ्च मामकीनं कर्तव्यम्। अनया धिया सर्वतः प्राथम्येन मानवसंसाधनविकासमन्त्रालयस्य मन्त्रिमहोदया माननीया अर्जुन सिंह महाभागा विशेषेण अभिनन्द्यन्ते येषाम् आध्यक्ष्ये सम्प्रति संस्थानम् एतादृशं कार्यम् अग्रे नयदस्ति। मानवसंसाधनविकासमन्त्रालये सचिवाः श्री बी. एस. बासवान महोदयाः, अतिरिक्तसचिवाः श्री सुदीप बेनर्जी महोदयाः संयुक्तसचिवा श्रीमती बेला बेनर्जी महोदया च भूरिशो धन्यतावादेन भूष्यन्ते येषाम् आनुकूल्येन संस्थानम् एतादृशीं योजनां साफल्येन सञ्चालयद् वर्तते। अत्र कर्मणि परामर्शदाने लेखने सम्पादने टङ्कणे संशोधने चित्रणे मुद्रणे संयोजने व्यवस्थापने च येषाम् अवदानं विद्यते ते सर्वेऽपि यथायोग्यम् अभिनन्द्यन्ते। सामग्र्या अस्याः प्रचारणे प्रसारणे च स्वीयम् अवदानं करिष्यद्भ्योऽपि भूयो भूयो कार्तज्ञ्यं विनिवेद्यते।

**सम्पादकः**

# विषयानुक्रमणी


| स्तबकः | पाठः | पाठ्यबिन्दुः | पृष्ठसंख्या |
|---|---|---|---|

## प्रथमः भागः

| | | | |
|---|---|---|---|
| 1. प्रथमः स्तबकः | | प्रथमा विभक्तिः | |
| 1.1 | प्रथमः पाठः | अजन्तपुंलिङ्गाः शब्दाः | 1-21 |
| 1.2 | द्वितीयः पाठः | अजन्तस्त्रीलिङ्गाः शब्दाः | 22-38 |
| 1.3 | तृतीयः पाठः | अजन्तनपुंसकलिङ्गाः शब्दाः | 39-48 |
| 1.4 | चतुर्थः पाठः | हलन्त-पुंलिङ्गाः शब्दाः | 49-61 |
| 1.5 | पञ्चमः पाठः | हलन्त-स्त्रीलिङ्गाः शब्दाः | 62-71 |
| 1.6 | षष्ठः पाठः | हलन्त-नपुंसकलिङ्गाः शब्दाः | 72-88 |
| 2. द्वितीयः स्तबकः | | | |
| 2.1 | प्रथमः पाठः | द्वितीया विभक्तिः | 89-119 |
| 2.2 | द्वितीयः पाठः | तृतीया विभक्तिः | 120-148 |
| 2.3 | तृतीयः पाठः | चतुर्थी विभक्तिः | 149-175 |
| 2.4 | चतुर्थः पाठः | पञ्चमी विभक्तिः | 176-201 |
| 2.5 | पञ्चमः पाठः | षष्ठी विभक्तिः | 202-230 |
| 2.6 | षष्ठः पाठः | सप्तमी विभक्तिः | 231-253 |
| 2.7 | सप्तमः पाठः | सम्बोधन-प्रथमा | 254-270 |
| 3. तृतीयः स्तबकः | | | |
| 3.1 | प्रथमः पाठः | सर्वनामशब्दाः | 271-314 |
| 3.2 | द्वितीयः पाठः | अव्ययानि | 315-331 |
| 3.3 | तृतीयः पाठः | सप्त विभक्तयः | 332-357 |

| स्तबकः | पाठः | | पाठ्यबिन्दुः | पृष्ठसंख्या |
|---|---|---|---|---|

## द्वितीयः भागः

| | | | | |
|---|---|---|---|---|
| **4.** | **चतुर्थः स्तबकः** | | | |
| | 4.1 | प्रथमः पाठः | आत्मनेपदिनां धातूनां लट्-लकारे प्रयोगाः | 358-375 |
| | 4.2 | द्वितीयः पाठः | आत्मनेपदिनां धातूनां लोट्-लकारे प्रयोगाः | 376-381 |
| | 4.3 | तृतीयः पाठः | आत्मनेपदिनां धातूनां लृट्-लकारे प्रयोगाः | 382-388 |
| | 4.4 | चतुर्थः पाठः | आत्मनेपदिनां धातूनां लङ्-लकारे प्रयोगाः | 389-396 |
| | 4.5 | पञ्चमः पाठः | आत्मनेपदिनां धातूनां लट्-लोट्-लृट्-लङ्-लकारेषु प्रयोगाः | 397-411 |
| | 4.6 | षष्ठः पाठः | उपसर्ग-प्रयोगाः | 412-433 |
| | 4.7 | सप्तमः पाठः | कर्मणि-प्रयोगाः – कर्मणि वर्तमाने लट् | 434-464 |
| | | | कर्मणि भूते लङ् | 465-481 |
| | | | कर्मणि लोट् | 482-495 |
| **5.** | **पञ्चमः स्तबकः** | | | |
| | 5.1 | प्रथमः पाठः | विशेष्य-विशेषणभावः | 496-517 |
| | 5.2 | द्वितीयः पाठः | चित्-चन-प्रयोगाः | 518-538 |
| | 5.3 | तृतीयः पाठः | सङ्ख्याः | 539-559 |
| | 5.4 | चतुर्थः पाठः | पूरणप्रत्ययान्तानि पदानि | 560-575 |
| **6.** | **षष्ठः स्तबकः** | | | |
| | 6.1 | प्रथमः पाठः | शतृप्रत्ययान्तरूपाणां प्रथमा-प्रयोगाः | 576-603 |
| | 6.2 | द्वितीयः पाठः | शतृप्रत्ययान्तरूपाणां द्वितीया-प्रयोगाः | 604-612 |
| | 6.3 | तृतीयः पाठः | शतृप्रत्ययान्तरूपाणां तृतीया-प्रयोगाः | 613-619 |
| | 6.4 | चतुर्थः पाठः | शतृप्रत्ययान्तरूपाणां चतुर्थी-प्रयोगाः | 620-627 |
| | 6.5 | पञ्चमः पाठः | शतृप्रत्ययान्तरूपाणां पञ्चमी-प्रयोगाः | 628-638 |
| | 6.6 | षष्ठः पाठः | शतृप्रत्ययान्तरूपाणां षष्ठी-प्रयोगाः | 639-646 |
| | 6.7 | सप्तमः पाठः | शतृप्रत्ययान्तरूपाणां सप्तमी-प्रयोगाः | 647-663 |
| | 6.8 | अष्टमः पाठः | शानच्प्रत्ययान्तरूपाणां सर्वासु विभक्तिषु प्रयोगाः | 664-682 |

❖❖❖

# व्यवहारप्रदीपः

## प्रथमः भागः

# प्रथमः स्तबकः

## 1.1 प्रथमः पाठः

### [ अजन्तपुंलिङ्गाः शब्दाः ]

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**इकारान्तः पुं.**



कालिदासः प्रसिद्धः **कविः** ।



हिमालयः श्रेष्ठः **गिरिः** ।



सर्वं दहति **अग्निः** ।



विश्वामित्रः प्राचीनः **ऋषिः** ।

**उकारान्तः पुं.**



विश्वस्य पालकः **विष्णुः** ।



पार्वत्याः पतिः **शम्भुः** ।



चन्द्रं पश्यति **शिशुः** ।



हितम् उपदिशति **साधुः** ।



शङ्कराचार्यः **जगद्गुरुः** ।



सर्वान् रक्षति **प्रभुः** ।

**ऋकारान्तः पुं.**



श्रीकृष्णः प्रद्युम्नस्य **पिता** ।



लक्ष्मणः रामस्य **भ्राता** ।



रामः जनकस्य **जामाता** ।



गुरुः ज्ञानस्य **दाता** ।



ब्रह्मा जगतः **कर्ता**।



चरकः आयुर्वेदस्य **ज्ञाता**।

**एतानि वाक्यानि पठत—**

[इन वाक्यों को पढ़ें। Read the following sentences.]

**कपिः** नृत्यति।

**मुनिः** उपदिशति।

**अग्निः** दहति।

**शिशुः** क्रन्दति।

**गुरुः** पाठयति।

**वटुः** पठति।

**भानुः** उदेति।

**नेता** भाषते।

**भ्राता** गच्छति।

**पिता** वदति।

☞ स्थूलाक्षरैः लिखितानि पदानि अजन्तपुंलिङ्गशब्दानां प्रथमायाः एकवचनरूपाणि सन्ति।

**प्रथमाविभक्तिः त्रिषु वचनेषु (पुंलिङ्गे)**

## अधोलिखितानि वाक्यानि पठत–

[अधोलिखित वाक्यों को पढ़ें। Read the following sentences.]

**एक.** **द्वि.** **बहु.**



**ऋषिः** ध्यायति।



**ऋषी** ध्यायतः।



**ऋषयः** ध्यायन्ति।



**शिशुः** क्रीडति।



**शिशू** क्रीडतः।



**शिशवः** क्रीडन्ति।



**दाता** यच्छति।



**दातारौ** यच्छतः।



**दातारः** यच्छन्ति।



चित्रे **ग्लौः** विलसति।



चित्रे **ग्लावौ** विलसतः।



चित्रे **ग्लावः** विलसन्ति।

## एतानि वाक्यानि पठत—

[ इन वाक्यों को पढ़ें। Read the following sentences. ]

| | | |
|---|---|---|
| **कविः** गच्छति। | **कवी** गच्छतः। | **कवयः** गच्छन्ति। |
| **कपिः** कूर्दते। | **कपी** कूर्देते। | **कपयः** कूर्दन्ते। |
| **मुनिः** उपदिशति। | **मुनी** उपदिशतः। | **मुनयः** उपदिशन्ति। |
| **यतिः** मन्त्रं जपति। | **यती** मन्त्रं जपतः। | **यतयः** मन्त्रं जपन्ति। |
| **गुरुः** पाठं पाठयति। | **गुरू** पाठं पाठयतः। | **गुरवः** पाठं पाठयन्ति। |
| **साधुः** सञ्चरति। | **साधू** सञ्चरतः। | **साधवः** सञ्चरन्ति। |
| **क्रीडापटुः** क्रीडाङ्गणे धावति। | **क्रीडापटू** क्रीडाङ्गणे धावतः। | **क्रीडापटवः** क्रीडाङ्गणे धावन्ति। |
| **जगद्गुरुः** आशीर्वादं यच्छति। | **जगद्गुरू** आशीर्वादं यच्छतः। | **जगद्गुरवः** आशीर्वादं यच्छन्ति। |
| **कर्ता** प्राप्नोति। | **कर्तारौ** प्राप्नुतः। | **कर्तारः** प्राप्नुवन्ति। |
| **वक्ता** उपविशति। | **वक्तारौ** उपविशतः। | **वक्तारः** उपविशन्ति। |
| **श्रोता** प्रसीदति। | **श्रोतारौ** प्रसीदतः। | **श्रोतारः** प्रसीदन्ति। |
| **नेता** वन्दते। | **नेतारौ** वन्देते। | **नेतारः** वन्दन्ते। |
| **भ्राता** हसति। | **भ्रातरौ** हसतः। | **भ्रातरः** हसन्ति। |
| **जामाता** याति। | **जामातरौ** यातः। | **जामातरः** यान्ति। |
| **पिता** पालयति। | **पितरौ** पालयतः। | **पितरः** पालयन्ति। |

**अवधेयम्**

भ्रातृ, जामातृ, पितृ इति शब्दानाम् रूपाणि अन्येभ्यः ऋकारान्तपुंलिङ्ग-शब्देभ्यः प्रथमायाः द्विवचने, बहुवचने द्वितीयायाः एकवचने द्विवचने च भिन्नानि भवन्ति।

**नूतनक्रियारूपम्**

**कूर्दते** = कूर्दनं करोति।

**वन्दते** = वन्दनं करोति।

**अधोनिर्दिष्टानि प्रातिपदिकानि तेषां प्रथमायां रूपाणि च सावधानं पठत—**

[ अधोलिखित प्रातिपदिक और उनके प्रथमान्त रूपों को ध्यान से पढ़ें। Read carefully the following *prātipadikas* and their nominative forms. ]

| | प्रातिपदिकम् | प्रथमायां रूपाणि | | |
|---|---|---|---|---|
| (क) | **कपि** | कपिः | कपी | कपयः |
| | **हरि** | हरिः | हरी | हरयः |
| | **मुनि** | मुनिः | मुनी | मुनयः |

*अत्र कपि, हरि, मुनि इति शब्दानां रूपाणि समानानि सन्ति।*

*एवमेव*

| | | | | |
|---|---|---|---|---|
| (ख) | **गुरु** | गुरुः | गुरू | गुरवः |
| | **शिशु** | शिशुः | शिशू | शिशवः |
| | **वटु** | वटुः | वटू | वटवः |
| | **पटु** | पटुः | पटू | पटवः |

*अत्र गुरु, शिशु, वटु, पटु इति शब्दानां रूपाणि समानानि सन्ति।*

*एवमेव*

| | | | | |
|---|---|---|---|---|
| (ग) | **नेतृ** | नेता | नेतारौ | नेतारः |
| | **वक्तृ** | वक्ता | वक्तारौ | वक्तारः |
| | **द्रष्टृ** | द्रष्टा | द्रष्टारौ | द्रष्टारः |
| | **योद्धृ** | योद्धा | योद्धारौ | योद्धारः |

*अत्र नेतृ, वक्तृ, द्रष्टृ, योद्धृ इति शब्दानां रूपाणि समानानि सन्ति।*

## विवरणम्

☞ 'क' - खण्डे प्रदत्तानां कपि, हरि, मुनि इति शब्दानाम् अन्तिमः वर्णः समानरूपेण 'इकारः' अस्ति। अतः तेषां रूपाणि समानानि। एवमेव 'ख' - खण्डे गुरु, शिशु, वटु, पटु इति शब्दानाम् अन्तिमः वर्णः 'उकारः' समानः अस्ति। अतः तेषां रूपाणि समानानि। एवमेव 'ग' - खण्डे नेतृ, वक्तृ, द्रष्टृ, योद्धृ इति शब्दानाम् अन्तिमः वर्णः 'ऋकारः' समानः अस्ति। अतः तेषां रूपाणि समानानि।

☞ येषां शब्दानाम् अत्र रूपाणि प्रदत्तानि सन्ति, ते 'प्रातिपदिकम्' / 'मूलशब्दः' इति नाम्ना व्यवहृताः भवन्ति।

**एतानि प्रथमान्तरूपाणि पठत—**

[ इन प्रथमान्त रूपों को पढ़ें। Read these nominative declensions. ]

| | | | |
|---|---|---|---|
| **दधि** | दधि | दधिनी | दधीनि |
| **वारि** | वारि | वारिणी | वारीणि |

**इत्यत्र 'दधि', 'वारि' इति शब्दयोः अन्तिमः वर्णः यद्यपि 'कपि', 'हरि' इत्यादीनाम् अन्तिमवर्णः इव समानः 'इकारः', तथापि रूपाणि भिन्नानि भवन्ति। यतो हि कपि, हरि इत्यादयः शब्दाः पुंलिङ्गाः सन्ति। दधि, वारि इत्यादयः शब्दाः च नपुंसकलिङ्गाः सन्ति। उभयोः लिङ्गभेदात् रूपभेदः भवति।**

**अवधेयम्**

यस्य यस्य शब्दस्य लिङ्गं समानम्, अन्तिमः वर्णः च समानः भवति, तस्य तस्य शब्दस्य रूपं प्रायेण समानं भवति। अतः रूपसादृश्यस्य कारणम् अन्तिमः वर्णः लिङ्गं च भवति।

**प्रातिपदिकप्रकाराः**

भवन्तः जानन्ति, वर्णाः स्वर-व्यञ्जनभेदेन द्विधा भवन्ति। संस्कृते स्वराणां 'अच्' इति अपरं नाम व्यञ्जनानां च 'हल्' इति। अतः स्वरान्तशब्दानाम् 'अजन्त' (अच् + अन्त) - शब्देन, अथ च व्यञ्जनान्तशब्दानां 'हलन्त' (हल् + अन्त) - शब्देन व्यवहारः भवति। लिङ्गानि च त्रीणि। अतः **शब्दानां** (प्रातिपदिकानां) रूपबोधनार्थं तेषाम् अन्तिमं वर्णं लिङ्गं च आश्रित्य **षोढा विभागः** भवति –

1. अजन्तपुंलिङ्गशब्दाः
2. अजन्तस्त्रीलिङ्गशब्दाः
3. अजन्तनपुंसकलिङ्गशब्दाः
4. हलन्तपुंलिङ्गशब्दाः
5. हलन्तस्त्रीलिङ्गशब्दाः
6. हलन्तनपुंसकलिङ्गशब्दाः

## अजन्तपुंलिङ्गाः शब्दाः

### एतानि प्रथमान्तरूपाणि पठत–

[ इन प्रथमान्त रूपों को पढ़ें। Read these nominative declensions. ]

**प्रथमायां रूपाणि**

| | **प्रातिपदिकम्** | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|---|
| अकारान्तः | **बालक** | बालकः | बालकौ | बालकाः |
| आकारान्तः | **गोपा** | गोपाः | गोपौ | गोपाः |
| इकारान्तः | **हरि** | हरिः | हरी | हरयः |
| ईकारान्तः | **सुधी** | सुधीः | सुधियौ | सुधियः |
| उकारान्तः | **साधु** | साधुः | साधू | साधवः |
| ऊकारान्तः | **खलपू** | खलपूः | खलप्वौ | खलप्वः |
| ऋकारान्तः | **कर्तृ** | कर्ता | कर्तारौ | कर्तारः |
| | **पितृ** | पिता | पितरौ | पितरः |
| ओकारान्तः | **गो** | गौः | गावौ | गावः |

**अवधेयम्**

अजन्तपुंलिङ्गशब्देषु आकारान्तपुंलिङ्गाः (यथा– गोपा, विश्वपा), ईकारान्तपुंलिङ्गाः (यथा– सुधी, ग्रामणी, सेनानी), ऊकारान्तपुंलिङ्गाः (यथा– अतिचमू, खलपू ), ऋकारान्तपुंलिङ्गाः (यथा– कॄ ), एकारान्तपुंलिङ्गाः ( यथा– से ), ऐकारान्तपुंलिङ्गाः ( यथा– रै ), ओकारान्तपुंलिङ्गाः ( यथा– गो = वृषभः ), औकारान्तपुंलिङ्गाः ( यथा– ग्लौ ) शब्दाः विरलाः एव भवन्ति। अकारान्तपुंलिङ्गशब्दान् च पूर्वम् एव (प्रथमायां दीक्षायाम्) पठितवन्तः। अन्यान् अजन्तपुंलिङ्गशब्दान् अत्र पठामः।

## अभ्यासः – 1

✍ **अधोनिर्दिष्टानां पदानां प्रातिपदिकं लिखत–**

[ अधोलिखित पदों के मूलशब्द लिखें। Write the base of the following declined words.]

| | पदम् | प्रातिपदिकम् | | पदम् | प्रातिपदिकम् |
|---|---|---|---|---|---|
| **यथा** | कविः | **कवि** | 8. | पटुः | |
| 1. | हरिः | | 9. | प्रभुः | |
| 2. | मुनिः | | 10. | इषुः | |
| 3. | यतिः | | **यथा** | धाता | **धातृ** |
| 4. | गिरिः | | 11. | नेता | |
| 5. | असिः | | 12. | वक्ता | |
| **यथा** | गुरुः | **गुरु** | 13. | योद्धा | |
| 6. | वटुः | | 14. | द्रष्टा | |
| 7. | मनुः | | 15. | ज्ञाता | |

## अभ्यासः – 2

✍ **अधोनिर्दिष्टानां पदानां प्रातिपदिकं लिखत–**

[ अधोलिखित पदों के मूलशब्द लिखें। Write the base of the following declined words. ]

| | पदम् | | प्रातिपदिकम् | | पदम् | | प्रातिपदिकम् |
|---|---|---|---|---|---|---|---|
| **यथा** | **हरिः** | – | **हरि** | | | | |
| 1. | अग्निः | – | | 9. | जामाता | – | |
| 2. | शम्भुः | – | | 10. | रविः | – | |
| 3. | पिता | – | | 11. | साधुः | – | |
| 4. | गौः | – | | 12. | दाता | – | |
| 5. | कपिः | – | | 13. | ऋषिः | – | |
| 6. | शिशुः | – | | 14. | जगद्गुरुः | – | |
| 7. | भ्राता | – | | 15. | कविः | – | |
| 8. | विष्णुः | – | | 16. | कर्ता | – | |

## अभ्यासः — 3

उदाहरणानुसारं प्रातिपदिकं तस्य अन्त्यवर्णं च निर्दिशत—

[ उदाहरण के अनुसार मूलशब्द और उसके अन्त्यवर्ण का निर्देश करें। Point out the base and its ending letter as shown in the example. ]

| | शब्दरूपम् | प्रातिपदिकम् | अन्तनिर्देशः |
|---|---|---|---|
| यथा | अग्निः | अग्नि | इकारान्तः |
| 1. | कविः | | |
| 2. | शिशुः | | |
| 3. | पिता | | |
| 4. | गौः | | |
| 5. | रविः | | |
| 6. | साधुः | | |
| 7. | भ्राता | | |
| 8. | कपिः | | |
| 9. | जामाता | | |
| 10. | विष्णुः | | |
| 11. | दाता | | |
| 12. | ऋषिः | | |
| 13. | शम्भुः | | |
| 14. | कर्ता | | |
| 15. | जगद्गुरुः | | |
| 16. | हरिः | | |
| 17. | मुनिः | | |
| 18. | भानुः | | |
| 19. | विधाता | | |
| 20. | नेता | | |

## अभ्यासः – 4

✍ **उदाहरणानुसारं प्रातिपदिकस्य अन्त्यवर्णं प्रथमैकवचनरूपं च लिखत–**

[ उदाहरण के अनुसार मूलशब्द के अन्त्यवर्ण तथा उसके प्रथमा एकवचन का रूप लिखें। Write the ending and the nominative forms of the *prātipadikas* as shown in the example.]

| | प्रातिपदिकम् | अन्तनिर्देशः | प्रथमैकवचनरूपम् |
|---|---|---|---|
| यथा | ध्वनि | इकारान्तः | ध्वनिः |
| 1. | अरि | | |
| 2. | तरु | | |
| 3. | जेतृ | | |
| 4. | व्याधि | | |
| 5. | भर्तृ | | |
| 6. | हनु | | |
| 7. | निधि | | |
| 8. | हन्तृ | | |
| 9. | पङ्गु | | |
| 10. | अलि | | |
| 11. | हर्तृ | | |
| 12. | उपाधि | | |
| 13. | भिक्षु | | |
| 14. | स्मर्तृ | | |
| 15. | अञ्जलि | | |
| 16. | पितृ | | |
| 17. | नरपति | | |
| 18. | वनस्पति | | |
| 19. | प्रभु | | |
| 20. | पटु | | |

## अभ्यासः – 5

**रिक्तस्थानानि पूरयत–**

[ रिक्तस्थानों की पूर्ति करें। Fill in the blanks. ]

**उदा.**



**ऋषिः** ध्यायति ।



**ऋषी** ध्यायतः ।



**ऋषयः** ध्यायन्ति ।

1. **यतिः** वसति ।
   वसतः ।
   वसन्ति ।
2. **कपिः** अनुकरोति ।
   अनुकुरुतः ।
   अनुकुर्वन्ति ।
3. **ध्वनिः** भवति ।
   भवतः ।
   भवन्ति ।
4. **गिरिः** विराजते ।
   विराजेते ।
   विराजन्ते ।
5. **पदातिः** शौर्येण युध्यते ।
   शौर्येण युध्येते ।
   शौर्येण युध्यन्ते ।
6. **वेणुः** मधुरस्वरं करोति ।
   मधुरस्वरं कुरुतः ।
   मधुरस्वरं कुर्वन्ति ।
7. **पङ्गुः** मन्दं चलति ।
   मन्दं चलतः ।
   मन्दं चलन्ति ।
8. **दयालुः** यच्छति ।
   यच्छतः ।
   यच्छन्ति ।
9. **परशुः** अस्ति ।
   स्तः ।
   सन्ति ।
10. **भीरुः** पलायते ।
    पलायेते ।
    पलायन्ते ।

11. **वटुः** पतति।
पततः।
पतन्ति।

12. **हिन्दुः** देवं पूजयति।
देवं पूजयतः।
देवं पूजयन्ति।

13. **कष्टसहिष्णुः** फलं प्राप्नोति।
फलं प्राप्नुतः।
फलं प्राप्नुवन्ति।

14. **इषुः** धनुषः निस्सरति।
धनुषः निस्सरतः।
धनुषः निस्सरन्ति।

15. **कार्यकर्ता** कार्यं करोति।
कार्यं कुरुतः।
कार्यं कुर्वन्ति।

16. **अधिवक्ता** विषयं मण्डयति।
विषयं मण्डयतः।
विषयं मण्डयन्ति।

17. **उपभोक्ता** कष्टम् अनुभवति।
कष्टम् अनुभवतः।
कष्टम् अनुभवन्ति।

18. सः **वेत्ता** अस्ति।
तौ स्तः।
ते सन्ति।

19. एषः सैन्यस्य **नियन्ता** अस्ति।
एतौ सैन्यस्य स्तः।
एते सैन्यस्य सन्ति।

20. **अभिनेता** अभिनयति।
अभिनयतः।
अभिनयन्ति।

### नूतनक्रियारूपम्

**युध्यते** = युद्धं करोति।
**विराजते** = शोभितः भवति।
**पलायते** = पलायनं करोति।

## अभ्यासः – 6

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत–**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

उदा.







**कविः** लिखति। **कवी** लिखतः। **कवयः** लिखन्ति। (कवि)

1. ............ खादति।
............ खादतः।
............ खादन्ति। (कपि)

2. ............ आक्राम्यति।
............ आक्राम्यतः।
............ आक्राम्यन्ति। (अरि)

3. ............ आगमिष्यति।
............ आगमिष्यतः।
............ आगमिष्यन्ति। (बन्धु)

4. ............ धावतु।
............ धावताम्।
............ धावन्तु। (रिपु)

5. ............ पलायते।
............ पलायेते।
............ पलायन्ते। (शत्रु)

6. ............ भाषणं करोति।
............ भाषणं कुरुतः।
............ भाषणं कुर्वन्ति। (वक्तृ)

7. ............ पठति।
............ पठतः।
............ पठन्ति। (अध्येतृ)

8. ............ वदति।
............ वदतः।
............ वदन्ति। (नेतृ)

9. वाहनं चालयति ।
वाहनं चालयतः ।
वाहनं चालयन्ति । (सारथि)

10. अपतत् ।
अपतताम् ।
अपतन् । (बिन्दु)

11. सञ्चरतु ।
सञ्चरताम् ।
सञ्चरन्तु । (पशु)

12. वर्धते ।
वर्धेते ।
वर्धन्ते । (इक्षु)

13. मिलति ।
मिलतः ।
मिलन्ति । (प्रतिनिधि)

14. यच्छति ।
यच्छतः ।
यच्छन्ति । (कृपालु)

15. पीडयति ।
पीडयतः ।
पीडयन्ति । (व्याधि)

16. नियन्त्रयति ।
नियन्त्रयतः ।
नियन्त्रयन्ति । (नियन्तृ)

17. निर्माणं करोति ।
निर्माणं कुरुतः ।
निर्माणं कुर्वन्ति । (अभियन्तृ)

18. श्लोकम् उच्चारयति ।
श्लोकम् उच्चारयतः ।
श्लोकम् उच्चारयन्ति । (वटु)

19. आगच्छतु ।
आगच्छताम् ।
आगच्छन्तु । (अतिथि)

20. पुत्रं बोधयति ।
पुत्रौ बोधयतः ।
पुत्रान् बोधयन्ति । (पितृ)

**नूतनक्रियारूपम्**

| | | |
|---|---|---|
| **आक्राम्यति** | = | आक्रमणं करोति । |
| **वर्धते** | = | वृद्धिं प्राप्नोति । |

## अभ्यासः — 7

**रिक्तस्थानानि पूरयत—**

[ रिक्तस्थान की पूर्ति करें। Fill in the blanks. ]

उदा. ....**निधिः**.... भूमौ भवति। (निधि)

| | | | | | |
|---|---|---|---|---|---|
| 1. | गभीरः भवति। | (जलधि) | 2. | वने चरति। | (गो) |
| 3. | उदेति। | (सवितृ) | 4. | भिक्षां याचति | (भिक्षु) |
| 5. | विघ्नं निवारयति। | (गणपति) | 6. | प्रातः उदेति। | (भानु) |
| 7. | पीडां जनयति। | (व्याधि) | 8. | गृहम् आगच्छति। | (जामातृ) |
| 9. | मधुरः भवति। | (इक्षु) | 10. | लोकरक्षकः। | (विष्णु) |

उदा. ....**पशू**.... वने चरतः। (पशु)

| | | | | | |
|---|---|---|---|---|---|
| 11. | श्लोकं पठतः। | (भ्रातृ) | 12. | उपदिशतः। | (यति) |
| 13. | रक्षतः। | (प्रभु) | 14. | भाषणं कुरुतः। | (नेतृ) |
| 15. | शकटं वहतः। | (गो) | 16. | क्षीरं पिबतः। | (शिशु) |
| 17. | गुञ्जतः। | (अलि) | 18. | मल्लस्य पुष्टौ। | (बाहु) |
| 19. | राज्यं पालयतः। | (भूपति) | 20. | गीतं शृणुतः। | (श्रोतृ) |

उदा. ..**अभियन्तारः**.. कार्यं कुर्वन्ति। (अभियन्तृ)

| | | | | | |
|---|---|---|---|---|---|
| 21. | आक्रमणं कुर्वन्ति। | (अरि) | 22. | कपिलवर्णाः। | (गो) |
| 23. | दानं कुर्वन्ति। | (दातृ) | 24. | आचारशीलाः। | (साधु) |
| 25. | उन्नताः। | (गिरि) | 26. | तीक्ष्णाः भवन्ति। | (इषु) |
| 27. | युध्यन्ते। | (योद्धृ) | 28. | छायां यच्छन्ति। | (तरु) |
| 29. | सम्मानिताः। | (कवि) | 30. | शास्त्रं पठन्ति। | (गुरु) |

## अभ्यासः — 8

**यथोचितं रिक्तस्थानानि पूरयत–**

[ रिक्तस्थानों की यथोचित पूर्ति करें। Fill in the blanks properly. ]

| | | | |
|---|---|---|---|
| उदा. | जलधयः | निधीन् धारयन्ति। | (जलधि) |
| 1. | | पञ्जरे अस्ति। | (जन्तु) |
| 2. | | सृष्टिं करोति। | (विधातृ) |
| 3. | | स्फुरतः। | (बाहु) |
| 4. | | अरण्ये वर्धन्ते। | (तरु) |
| 5. | | पठतः। | (भ्रातृ) |
| 6. | प्राच्यां | उदेति। | (भानु) |
| 7. | | रणाङ्गणात् पलायन्ते। | (भीरु) |
| 8. | कति | सन्ति ? | (फल) |
| 9. | रामस्य | दीर्घौ स्तः। | (बाहु) |
| 10. | | प्रसरन्ति। | (रश्मि) |
| 11. | | अग्रे गच्छति। | (सेनापति) |
| 12. | | काव्यं रचयतः। | (कवि) |
| 13. | | क्षीरं पिबन्ति। | (शिशु) |
| 14. | | आन्दोलनं करोति। | (नेतृ) |
| 15. | | लोकं रक्षति | (रवि) |
| 16. | | महान् भवति। | (दातृ) |
| 17. | | वादं मण्डयन्ति। | (अधिवक्तृ) |
| 18. | | अपशब्दं न वदन्ति। | (साधु) |
| 19. | | सञ्चरतः। | (भिक्षु) |
| 20. | धान्यानां | सन्ति। | (राशि) |

**अजन्त-पुंलिङ्ग-शब्दाः**

# स्वाध्यायान्मा प्रमदः

समाजः परिवर्तनशीलः । सामाजिक-व्यवस्था अपि समये-समये परिवर्तते । आधुनिकी शिक्षण-व्यवस्था प्राचीनकालस्य शिक्षण-व्यवस्थातः भिन्ना अस्ति । इदानीं प्रारम्भिक-माध्यमिक-शिक्षार्थं विद्यालयाः उच्चशिक्षार्थम् उच्चतर-शिक्षार्थं च महाविद्यालयाः विश्वविद्यालयाः च भवन्ति । परन्तु प्राचीन-काले एतेषां सर्वेषां स्थाने गुरुकुलानि भवन्ति स्म ।



घने अरण्ये, सुरम्ये नदीतीरे, जनशून्यासु पर्वतगुहासु च **ऋषयः** निवसन्ति स्म । तेषां निवासस्थानम् 'आश्रमः' इति नाम्ना प्रसिद्धम् आसीत् । तेषु आश्रमेषु गुरुकुलानि अपि प्रचलन्ति स्म । तत्र **मन्त्रद्रष्टारः** ऋषयः आचार्याः च भवन्ति स्म । तेषु कश्चन **ऋषिः**, कश्चन **महर्षिः**, कश्चन च **ब्रह्मर्षिः** भवति स्म । ते न केवलम् आचार्याः अपि तु समाजस्य उन्नायकाः संस्कारकाः च अभवन् । वसिष्ठः विश्वामित्रः च प्रसिद्धौ **ब्रह्मर्षी** आस्ताम् । वाल्मीकिः वेदव्यासः च **महर्षी** आस्ताम् । तौ भारतस्य प्राचीनतमौ प्रसिद्धौ **कवी** अपि आस्ताम् । अनयोः वाल्मीकिः आदि**कविः** आसीत् । सः आदिकाव्यं रामायणं रचितवान् ।

वस्तुतः भारतीय-शिक्षणपरम्परायाः किञ्चित् वैशिष्ट्यम् अस्ति । **शिशुः** मातृगर्भे स्थितः संवर्धन-कालतः एव शिक्षां प्राप्नोति । अतः माता तस्य प्रथमः **गुरुः** भवति । जन्मानन्तरं पिता अन्ये च ज्येष्ठाः जनाः तस्य **गुरवः** भवन्ति । एवं शिशुः बाल्यकाले गृहे एव प्राथमिकीं शिक्षां प्राप्नोति । यथासमयं तस्य उपनयन-संस्कारः भवति । उपनयनानन्तरं **वटुः** गुरुकुले प्रवेशम् अर्हति । ते च **वटवः** ऋषीणां मार्गदर्शनेन स्व-स्वविषये निष्णाताः भवन्ति ।

गुरुकुलस्य वातावरणं शान्तिप्रदं भवति। आश्रमं परितः विविधाः वृक्षाः लताः च शोभन्ते। तत्र हरिणाः मयूराः अन्येऽपि च **वन्यजन्तवः** स्वच्छन्दं भ्रमन्ति। तत्र गावः अपि भवन्ति। छात्राः गुरूणां गवां च सेवां कुर्वन्ति। ते आश्रमनियमान् श्रद्धया पालयन्ति।

वैदिककाले पौराणिककाले च गुरुकुलस्य प्रसिद्धिः अधिका आसीत्। न केवलं राजपुत्राः किन्तु ऋषिपुत्राः, श्रमिकपुत्राः अपि गुरुकुले पठन्ति स्म। ते गुरुकुलात् सर्वविधां शिक्षां प्राप्य राष्ट्रस्य आदर्श-नागरिकाः भवन्ति स्म। तत्र पठित्वा ते न केवलं वेदोपनिषत्-पुराण-दर्शनादि-शास्त्रेषु किन्तु नानाविधासु शिल्पकलासु विविधासु शस्त्रविद्यासु चापि **पटवः** भवन्ति स्म। अर्जुनः धनुर्विद्यायां **पटुः** आसीत्। भीमः दुर्योधनः च गदाविद्यायां **पटू** आस्ताम्।



कौरव-पाण्डवानां **गुरुः** द्रोणाचार्यः एकलव्यस्य अपि **गुरुः** आसीत्। परन्तु एकलव्यः गुरुकुले न पठितवान्। द्रोणाचार्यस्य प्रतिकृतिः एव तस्य **गुरुः** आसीत्।

गुरुकुले पठित्वा कश्चन **नेता** भवति स्म, कश्चन **वक्ता** भवति स्म, कश्चन च **योद्धा** भवति स्म। सान्दीपनि-महर्षेः गुरुकुले पठित्वा कृष्णः बलरामः च **योद्धारौ** अभवताम्। तौ **वक्तारौ, नेतारौ** अपि अभवताम्। तस्मिन् गुरुकुले दरिद्रः सुदामा अपि अपठत्। कृष्णः सुदामा च **बन्धू** आस्ताम्। तयोः मैत्री इतिहास-प्रसिद्धा अस्ति। अनेन स्पष्टं भवति यत् गुरुकुले भूपतेः दरिद्रस्य च **सूनवः** सार्धम् एव पठन्ति स्म। तेषां मध्ये समानता आसीत्। उच्च-नीचभावस्य तत्र सर्वथापि अवकाशः न आसीत्। सौहार्दपूर्णे वातावरणे स्थित्वा छात्राः विविधविद्यानां **वेत्तारः** भवन्ति स्म।

प्राचीनकालिकी शिक्षा केवलं गुरुकुलं यावत् सीमिता न भवति स्म। गुरुकुलात् प्रतिनिवृत्य गृहस्थाश्रमं प्राप्य अपि स्नातकाः आजीवनं स्वाध्याये निरताः भवन्ति स्म। अत एव समावर्तनसमारोहे गुरुः उपदिशति स्म– "सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः" इति।

◆◆◆

## सुभाषितम्

- ⇨ किं किं न साधयति कल्पलतेव विद्या।
- ⇨ विद्याधनं सर्वधनप्रधानम्।
- ⇨ रम्या रामायणी कथा।
- ⇨ स्वाध्यायोऽध्येतव्यः।

## अभ्यासः – 9

**1. कोष्ठकस्थरूपेषु उचितं रूपं चित्वा रिक्तस्थानानि पूरयत–**

[ कोष्ठक में स्थित रूपों में से उचित रूप चुनकर रिक्तस्थानों की पूर्ति करें। Fill in the blanks with the correct form of the words given in the bracket. ]

(i) आश्रमे ........ निवसन्ति स्म। (ऋषिः / ऋषी / ऋषयः)

(ii) वसिष्ठः विश्वामित्रः च ........ आस्ताम्। (ब्रह्मर्षी / ब्रह्मर्षिः / ब्रह्मर्षयः)

(iii) गुरुकुले ........ पठन्ति स्म। (वटू / वटवः / वटुः)

(iv) अर्जुनः धनुर्विद्यायां ........ आसीत्। (पटू / पटुः / पटवः)

(v) द्रोणाचार्यः एकलव्यस्य ........ आसीत्। (गुरवः / गुरू / गुरुः)

**2. मञ्जूषातः पदानि चित्वा वचनानुसारेण रिक्तस्थानानि पूरयत–**

[ मञ्जूषा से पदों को चुनकर रिक्तस्थान की पूर्ति करें। Fill in the blanks according to the number of words given in the box. ]

| | | | | |
|---|---|---|---|---|
| ऋषिः, | गुरवः, | ब्रह्मर्षी, | शिशवः, | कपिः, |
| कवी, | वटवः, | महर्षिः, | यौद्धारौ, | वक्ता, |
| वेत्तारः, | पटू, | गावः, | गुरुः, | गावौ |

**(i) एक.** **(ii) द्वि.** **(iii) बहु.**

3. **यथास्थानं प्रथमायाः द्विवचन-बहुवचनरूपाणि लिखत—**

[ यथास्थान प्रथमा के द्विवचन एवं बहुवचन के रूपों को लिखें। Write the dual and plural forms of nominative declensions. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| (i) | कविः | | |
| (ii) | ऋषिः | | |
| (iii) | मुनिः | | |
| (iv) | शिशुः | | |
| (v) | गुरुः | | |
| (vi) | वटुः | | |
| (vii) | नेता | | |
| (viii) | वक्ता | | |
| (ix) | द्रष्टा | | |
| (x) | गौः | | |

# प्रथमः स्तबकः

## 1.2 द्वितीयः पाठः

### [ अजन्तस्त्रीलिङ्गाः शब्दाः ]

**अधोलिखितानि वाक्यानि पठत–**

[अधोलिखित वाक्यों को पढ़ें। Read the following sentences.]

**आकारान्तः स्त्री.**



उद्याने शोभते **लता**।



कण्ठे शोभते **माला**।



विद्यालयं याति **बाला**।



वस्त्रं क्षालयति **महिला**।



गीतं गायति **कन्या**।




प्रसिद्धा एषा **पाठशाला**।

**इकारान्तः स्त्री.**



भारतम् अस्माकं **जन्मभूमिः** ।



महाभारतं व्यासस्य **कृतिः** ।



एषा बुद्धस्य **मूर्तिः** ।



मन्दिरे भक्तानां **पङ्क्तिः** ।



गृहस्य उपरि **छदिः** ।



महती भारतस्य **संस्कृतिः** ।

## ईकारान्तः स्त्री.



एषा गङ्गा **नदी**।



प्रियंवदा शकुन्तलायाः **सखी**।



सरस्वती विद्यायाः **देवी**।



सीता जनकस्य **पुत्री**।



नवदेहली भारतस्य **राजधानी**।



माण्डवी भरतस्य **पत्नी**।

**उकारान्तः स्त्री.**



नन्दिनी वसिष्ठस्य **धेनुः** ।



बालस्य कोमला **तनुः** ।



शुकस्य शोभना **चञ्चुः** ।



एषा दृढा **रज्जुः** ।

**ऊकारान्तः स्त्री.**



मातरं सेवते **वधूः** ।



कौसल्या सीतायाः **श्वश्रूः** ।



वृद्धस्य दीर्घा **भ्रूः** ।



एषा वृद्धा **पङ्गूः** ।

**ऋकारान्तः स्त्री.**



देवकी कृष्णस्य **माता** ।



उर्मिला सीतायाः **याता** ।



सुभद्रा कृष्णस्य **स्वसा** ।



सुभद्रा रुक्मिण्याः **ननान्दा** ।

***टिप्पणी*** → स्त्रीलिङ्गे ऋकारान्ताः 'मातृ, ननान्दृ, दुहितृ, यातृ, स्वसृ, तिसृ, चतसृ' इति प्रसिद्धाः ।

**ओकारान्तः स्त्री.**



क्षेत्रे चरति **गौः** ।

**अवधेयम्**

गो-शब्दः पुंलिङ्गे अपि अस्ति । तस्य अर्थः बलीवर्दः । गोशब्दः स्त्रीलिङ्गे अपि अस्ति । तस्य अर्थः स्त्री गौः ।

**एतानि वाक्यानि पठत—**

[ इन वाक्यों को पढें। Read the following sentences. ]

**मूर्तिः** विराजते ।

**प्रीतिः** वर्धते ।

**नदी** वहति ।

**पुत्री** गच्छति ।

**पत्नी** याति ।

**धेनुः** चरति ।

**रज्जुः** अस्ति ।

**वधूः** लज्जते ।

**माता** पचति ।

**गौः** चरति ।

☞ स्थूलाक्षरैः लिखितानि पदानि अजन्तस्त्रीलिङ्गशब्दानां प्रथमायाः एकवचनरूपाणि सन्ति।

प्रथमाविभक्तिः त्रिषु वचनेषु
(स्त्रीलिङ्गे)

## अधोलिखितानि वाक्यानि पठत—

[अधोलिखित वाक्यों को पढ़ें। Read the following sentences.]

एक. | द्वि. | बहु.



एषा **मूर्तिः** अस्ति।



एते **मूर्ती** स्तः।



एताः **मूर्तयः** सन्ति।



एषा **धेनुः** चरति।



एते **धेनू** चरतः।



एताः **धेनवः** चरन्ति।



**वधूः** सेवां करोति।



**वध्वौ** सेवां कुरुतः।



**वध्वः** सेवां कुर्वन्ति।



**माता** पचति।



**मातरौ** पचतः।



**मातरः** पचन्ति।

📖 **एतानि वाक्यानि पठत–**

[ इन वाक्यों को पढ़ें। Read the following sentences. ]

| | | |
|---|---|---|
| एषा कवेः **कृतिः** । | एते कवेः **कृती** । | एताः कवेः **कृतयः** । |
| **युवतिः** गच्छति । | **युवती** गच्छतः । | **युवतयः** गच्छन्ति । |
| **रात्रिः** सुखेन गता । | **रात्री** सुखेन गते । | **रात्रयः** सुखेन गताः । |
| एषा **रज्जुः** दीर्घा । | एते **रज्जू** दीर्घे । | एताः **रज्जवः** दीर्घाः । |
| **स्वसा** पठति । | **स्वसारौ** पठतः । | **स्वसारः** पठन्ति । |
| **दुहिता** जलं नयति । | **दुहितरौ** जलं नयतः । | **दुहितरः** जलं नयन्ति । |

**नूतनक्रियारूपम्**

**लज्जते** = लज्जाम् अनुभवति ।

**अजन्तस्त्रीलिङ्गाः शब्दाः**

📖 **अधोनिर्दिष्टानि प्रातिपदिकानि तेषां प्रथमायां रूपाणि च सावधानं पठत–**

[ अधोलिखित प्रातिपदिक और उनके प्रथमान्त रूपों को ध्यान से पढ़ें। Read carefully the following *prātipadikas* and their nominative forms. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **आकारान्तः** | | | |
| **भाषा** | भाषा | भाषे | भाषाः |
| **प्रतिष्ठा** | प्रतिष्ठा | प्रतिष्ठे | प्रतिष्ठाः |

'लता, रमा, सीता, बाला' इत्यादीनाम् आकारान्त-स्त्रीलिङ्ग-शब्दानाम् अपि रूपाणि एवमेव भवन्ति।

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| **इकारान्तः** | | | | |
| | **श्रुति** | श्रुतिः | श्रुती | श्रुतयः |
| | **स्मृति** | स्मृतिः | स्मृती | स्मृतयः |

मति, प्रीति, रीति, नीति-इत्यादीनाम् इकारान्त-स्त्रीलिङ्ग शब्दानाम् अपि रूपाणि एवमेव भवन्ति।

| | | | | |
|---|---|---|---|---|
| **ईकारान्तः** | | | | |
| | **वाणी** | वाणी | वाण्यौ | वाण्यः |

'नदी, देवी, राजधानी, पुत्री'-इत्यादीनाम् अपि ईकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि एवमेव भवन्ति।

| | | | | |
|---|---|---|---|---|
| **उकारान्त-प्रयोगः** | | | | |
| | **रज्जु** | रज्जुः | रज्जू | रज्जवः |

'धेनु, तनु, रेणु'-इत्यादीनां सदृशशब्दानाम् अपि रूपाणि एवमेव भवन्ति।

| | | | | |
|---|---|---|---|---|
| **ऊकारान्तः** | | | | |
| | **भू** | भूः | भुवौ | भुवः |
| **ऋकारान्तः** | | | | |
| **(अ)** | **मातृ** | माता | मातरौ | मातरः |
| **(आ)** | **स्वसृ** | स्वसा | स्वसारौ | स्वसारः |

ननान्दृ, दुहितृ, यातृ–शब्दानाम् अपि रूपाणि मातृशब्दवत् भवन्ति।

## अभ्यासः — 10

✍ **उदाहरणानुगुणं प्रातिपदिकं निर्दिशत—**

[ उदाहरण के अनुसार मूलशब्द का निर्देश करें। Point out the base-word as shown in the example. ]

| | शब्दरूपम् | प्रातिपदिकम् |
|---|---|---|
| उदा. | दृष्टिः | ......दृष्टि...... |
| 1. | मूर्तिः | |
| 2. | देवी | |
| 3. | धेनुः | |
| 4. | माला | |
| 5. | पुत्री | |
| 6. | सखी | |
| 7. | तनुः | |
| 8. | बाला | |
| 9. | जन्मभूमिः | |
| 10. | भ्रूः | |
| 11. | छदिः | |
| 12. | राजधानी | |
| 13. | पङ्क्तिः | |
| 14. | चञ्चुः | |
| 15. | वधूः | |
| 16. | श्वश्रूः | |
| 17. | कृतिः | |
| 18. | लता | |
| 19. | कन्या | |
| 20. | माता | |

## अभ्यासः — 11

✍ **अधोनिर्दिष्टानां पदानां प्रातिपदिकम् अन्त्यवर्णं च निर्दिशत–**

[ अधोनिर्दिष्ट पदों के मूलशब्द तथा अन्त्यवर्ण का निर्देश करें। Point out the base and the ending letter of the following declined words. ]

| शब्दरूपम् | प्रातिपदिकम् | अन्तनिर्देशः |
|---|---|---|
| उदा. रमा | रमा | आकारान्तः |
| 1. दुर्गा | | |
| 2. अम्बा | | |
| 3. सुभद्रा | | |
| 4. पत्रिका | | |
| 5. नौका | | |
| 6. बुद्धिः | | |
| 7. नीतिः | | |
| 8. स्तुतिः | | |
| 9. भक्तिः | | |
| 10. गौरी | | |
| 11. नगरी | | |
| 12. सुन्दरी | | |
| 13. कुमारी | | |
| 14. रज्जुः | | |
| 15. हनुः | | |
| 16. दुहिता | | |
| 17. याता | | |
| 18. ननान्दा | | |
| 19. स्वसा | | |

## अभ्यासः — 12

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | |
|---|---|---|---|
| उदा. | **युवतिः** पश्यति। | **युवती** पश्यतः। | **युवतयः** पश्यन्ति। |
| 1. | **मूर्तिः** अस्ति। | स्तः। | सन्ति। |
| 2. | **रात्रिः** भविष्यति। | भविष्यतः। | भविष्यन्ति। |
| 3. | **धेनुः** चरति। | चरतः। | चरन्ति। |
| 4. | **वधूः** लज्जते। | लज्जेते। | लज्जन्ते। |
| 5. | **दुहिता** नन्दति। | नन्दतः। | नन्दन्ति। |
| 6. | **माता** लालयति। | लालयतः। | लालयन्ति। |
| 7. | **याता** वदति। | वदतः। | वदन्ति। |
| 8. | **ननान्दा** गृहकार्यं करोति। | गृहकार्यं कुरुतः। | गृहकार्यं कुर्वन्ति। |
| 9. | **शष्कुलिः** रुचिकरी अस्ति। | रुचिकर्यौ स्तः। | रुचिकर्यः सन्ति। |
| 10. | **वर्तिः** ज्वलति। | ज्वलतः। | ज्वलन्ति। |
| 11. | **कुटिः** शान्ता अस्ति। | शान्ते स्तः। | शान्ताः सन्ति। |
| 12. | **अङ्गुलिः** कोमला अस्ति। | कोमले स्तः। | कोमलाः सन्ति। |
| 13. | **त्रुटिः** नास्ति। | न स्तः। | न सन्ति। |
| 14. | **वेणिः** वर्धते। | वर्धेते। | वर्धन्ते। |
| 15. | **स्वसा** जलं नयति। | जलं नयतः। | जलं नयन्ति। |

## अभ्यासः — 13

**कोष्ठस्थ-शब्दानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत—**

[ कोष्ठकस्थ शब्दों के उचित रूपों से रिक्तस्थानों की पूर्ति करें। Fill in the blanks with the appropriate forms of the words given in the bracket. ]

| | | | |
|---|---|---|---|
| उदा. | मूर्तिः | शोभते। | (मूर्ति) |
| 1. | | क्षेत्रे चरतः। | (धेनु) |
| 2. | | कुटिला अस्ति। | (भ्रुकुटि) |
| 3. | | प्रसरन्ति। | (कीर्ति) |
| 4. | | वेदेषु सन्ति। | (स्तुति) |
| 5. | अद्य | का ? | (तिथि) |
| 6. | | उदरभागे अस्ति। | (नाभि) |
| 7. | | स्वादिष्ठाः सन्ति। | (शष्कुलि) |
| 8. | श्रीक्षेत्रस्य | पवित्रा। | (रेणु) |
| 9. | स्थाल्यां | अस्ति। | (यवागू) |
| 10. | दशरथस्य चतस्रः | सन्ति। | (पुत्रवधू) |
| 11. | भारतभूमिः | वर्तते | (वीरप्रसू) |
| 12. | मानवशरीरे | सन्ति। | (स्नायु) |
| 13. | भारतीया | सीमान्तप्रदेशे नियुक्ता अस्ति। | (चमू) |
| 14. | गावः विश्वस्य | । | (मातृ) |
| 15. | मातुः वत्से | स्वाभाविकी। | (प्रीति) |
| 16. | | दीर्घाः सन्ति। | (वेणी) |
| 17. | | भाषणं कुरुतः। | (युवति) |
| 18. | एषा कथायाः | । | (नीति) |
| 19. | दीप-मालाभिः | शोभिताः। | (नगरी) |

**अजन्त-स्त्रीलिङ्ग-शब्दाः**

## भारतस्य प्रतिष्ठे द्वे

अस्माकं देशस्य नाम भारतवर्षम् । एषः एकः बहुभाषा-भाषी देशः अस्ति । अत्र बहवः प्रदेशाः सन्ति । एषु प्रदेशेषु बह्व्यः **भाषाः** व्यवहृताः भवन्ति । प्राचीनकाले अस्य देशस्य **भाषा** संस्कृतम् एव आसीत् ।

संस्कृतभाषा भारतीय-भाषाणां **जननी** अस्ति । अनया भाषया सर्वाः प्रान्तीय-भाषाः अनुप्राणिताः प्रभाविताः च सन्ति । इयं भाषा अतीव सरला मधुरा च अस्ति । **श्रुतिः स्मृतिः** उपनिषत् पुराणं दर्शनम् अन्यानि च शास्त्राणि संस्कृते एव रचितानि सन्ति ।



**श्रुतयः** चतस्रः सन्ति– ऋक्, यजुः, साम, अथर्वा इति । श्रुतीनाम् आशयं **स्मृतयः** प्रतिपादयन्ति । यद्यपि बह्व्यः स्मृतयः सन्ति तथापि **मनुस्मृतिः याज्ञवल्क्यस्मृतिः** च इति द्वे **स्मृती** प्रसिद्धे स्तः ।

संस्कृतं पठित्वा जनाः सात्त्विकाः भवन्ति । अस्याः भाषायाः महत्त्वम् उपयोगितां च दृष्ट्वा अस्माकं पूर्वजैः अस्याः भाषायाः 'देवभाषा' इति अपरं नाम विहितम् ।

संस्कृतं देवानां मानवानां च **वाणी** अस्ति । पुरा उभयोः **वाण्यौ समाने** आस्ताम् । पशूनां पक्षिणाम् अपि **वाण्यः** भवन्ति । परन्तु **ताः वाण्यः** मानवोच्चारित-भाषावत् व्यक्ताः न भवन्ति । अतः ताः **वाण्यः** भाषापदवाच्याः न सन्ति ।

**शब्दराशिः** भाषायाः **तनुः** भवति । संस्कृतभाषायाः **शब्दसमृद्धिः** तस्याः तनुम् अलङ्करोति । **प्रीतिः**, स्नेहः, **आशा, तृष्णा, आसक्तिः** इत्येताः संसारे **रज्जवः** भवन्ति । संस्कृतभाषा-निबद्धस्य दर्शनशास्त्रस्य ज्ञानेन सा **रज्जुः** शिथिला भवति । **भगवद्भक्तिः** च अत्र साहाय्यं करोति ।

संस्कृत-वाङ्मये चतुर्दशानां भुवनानाम् उल्लेखः अस्ति । वयं यस्मिन् लोके निवसामः तस्य नाम **भूः** अस्ति । अस्माकं संस्कृतौ सर्वाः **भुवः** कुटुम्बरूपाः भवन्ति । 'वसुधैव कुटुम्बकम्' इति अस्माकं संस्कृतेः बीजम्

अस्ति । **जन्मभूमिः** अस्माकं कृते देवतावत् पूज्या वन्दनीया च भवति। अत एव "**जननी जन्मभूमिश्च** स्वर्गादपि **गरीयसी**" इति उक्तिः बहु मान्या वर्तते ।




संस्कृतं भारतीय-संस्कृतेः पोषकम् अस्ति। संस्कृतं **संस्कृतिः** च भारतस्य अस्तित्वं महत्त्वं च द्रढयतः। अत एव सुष्ठु खलु उच्यते– "भारतस्य **प्रतिष्ठे द्वे** संस्कृतं संस्कृतिस्तथा" इति ।

## अवधेयम्

| | | |
|---|---|---|
| वर्षम् | = | देशः । |
| भारतवर्षम् | = | भारतदेशः । |

## सुभाषितम्

⇨ संस्कृतं नाम दैवी वाक् ।

⇨ वसुधैव कुटुम्बकम् ।

⇨ जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

⇨ भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा ।

⇨ उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥

## अभ्यासः — 14

1. **पाठाधारेण रिक्तस्थानानि पूरयत–**
[ पाठ के आधार पर रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the lesson.]

(i) संस्कृतभाषा भारतीयभाषाणां ______ अस्ति।

(ii) श्रुतीनाम् आशयं ______ प्रतिपादयन्ति।

(iii) पशूनां पक्षिणाम् अपि ______ भवन्ति।

(iv) शब्दराशिः भाषायाः ______ अस्ति।

(v) सर्वाः ______ कुटुम्बरूपाः भवन्ति।

2. **अधोलिखितानां प्रश्नानाम् उत्तरं लिखत–**
[ अधोलिखित प्रश्नों का उत्तर लिखें। Answer the following questions. ]

(i) के द्वे स्मृती प्रसिद्धे स्तः ?

______ ।

(ii) चतुर्दशसु भुवनेषु के द्वे भुवौ प्रसिद्धे स्तः ?

______ ।

(iii) काः संसारस्य रज्जवः भवन्ति ?

______ ।

(iv) अस्माकं संस्कृतेः बीजं किम् अस्ति ?

______ ।

(v) वाल्मीकिः रामोक्तिमाध्यमेन रामायणे किं वदति ?

______ ।

**3. अधोलिखितानां पदानां वचनम् अन्तिमवर्णं च निर्दिशत—**

[ अधोलिखित पदों के वचन एवं अन्तिमवर्ण का निर्देश करें। Point out the number and the final letter of the following words. ]

| | | वचनम् | अन्त्यनिर्देशः |
|---|---|---|---|
| (i) | भाषाः | | |
| (ii) | जननी | | |
| (iii) | श्रुतिः | | |
| (iv) | स्मृती | | |
| (v) | वाण्यः | | |
| (vi) | आसक्तिः | | |
| (vii) | तनुः | | |
| (viii) | प्रीतिः | | |
| (ix) | रज्जुः | | |
| (x) | भुवः | | |
| (xi) | भूमिः | | |
| (xii) | संस्कृतिः | | |
| (xiii) | गरीयसी | | |
| (xiv) | भक्तिः | | |
| (xv) | आशा | | |

# प्रथमः स्तबकः

## 1.3 तृतीयः पाठः

### [ अजन्तनपुंसकलिङ्गाः शब्दाः ]

**सावधानं पठत–**

[ ध्यान से पढ़ें। Read carefully. ]

**इकारान्तः नपुं.**



आकाशात् **वारि** पतति।



माता **दधि** मथ्नाति।



हरिणस्य **अक्षि** रमणीयम्।



एतस्य **अस्थि** भग्नम्।

**उकारान्तः नपुं.**




कूप्यां **मधु** अस्ति।



बालकस्य नेत्राभ्याम् एकैकम् **अश्रु** पतति।



कृषकस्य **श्मश्रु** कृष्णम्।



वीरस्य **जानु** दृढम्।

📖 **एतानि वाक्यानि पठत—**

[इन वाक्यों को पढ़ें। Read the following sentences.]

**वारि** वहति।

**दधि** मधुरम् अस्ति।

**अक्षि** सुन्दरम् अस्ति।

**मधु** स्रवति।

**वस्तु** अस्ति।

**अम्बु** पतति।

☞ स्थूलाक्षरैः लिखितानि पदानि अजन्तनपुंसकलिङ्गशब्दानां प्रथमायाः एकवचनरूपाणि सन्ति।

**प्रथमाविभक्तिः त्रिषु वचनेषु (नपुंसकलिङ्गे)**

📖 **अधोलिखितानि वाक्यानि पठत–**

[अधोलिखित वाक्यों को पढ़ें। Read the following sentences.]

| एक. | द्वि. | बहु. |
|---|---|---|
|  |  |  |
| **अक्षि** सुन्दरम् अस्ति। | **अक्षिणी** सुन्दरे स्तः। | **अक्षीणि** सुन्दराणि सन्ति। |
|  |  |  |
| **श्मश्रु** कृष्णम् अस्ति। | **श्मश्रुणी** कृष्णे स्तः। | **श्मश्रूणि** कृष्णानि सन्ति। |
|  |  |  |
| **जानु** आघातितम् अस्ति। | **जानुनी** आघातिते स्तः। | **जानूनि** आघातितानि सन्ति। |

**एतानि वाक्यानि पठत—**

[ इन वाक्यों को पढ़ें। Read the following sentences. ]

| | | |
|---|---|---|
| **अक्षि** सुन्दरम् अस्ति। | **अक्षिणी** सुन्दरे स्तः। | **अक्षीणि** सुन्दराणि सन्ति। |
| **अस्थि** दृढम् अस्ति। | **अस्थिनी** दृढे स्तः। | **अस्थीनि** दृढानि सन्ति। |
| **वारि** वहति। | **वारिणी** वहतः। | **वारीणि** वहन्ति। |
| **मधु** स्रवति। | **मधुनी** स्रवतः। | **मधूनि** स्रवन्ति। |
| **वस्तु** तिष्ठति। | **वस्तुनी** तिष्ठतः। | **वस्तूनि** तिष्ठन्ति। |
| **श्मश्रु** दीर्घम् अस्ति। | **श्मश्रुणी** दीर्घे स्तः। | **श्मश्रूणि** दीर्घाणि सन्ति। |

**अधोलिखितानां अजन्तनपुंसकशब्दानां प्रथमायां रूपाणि पठत—**

[ अधोनिर्दिष्ट अजन्तनपुंसक शब्दों के प्रथमा विभक्ति रूपों को पढ़ें। Read the nominative declension of the following neuter words ending in vowels. ]

| **प्रातिपदिकम्** | **प्रथमायां रूपाणि** | | |
|---|---|---|---|
| **फल** | फलं | फले | फलानि |
| **वारि** | वारि | वारिणी | वारीणि |
| **मधु** | मधु | मधुनी | मधूनि |

**अवधेयम्**

- ⇨ अकारान्तानां नपुंसकशब्दानां **फल** इति शब्दवत् रूपं बोध्यम्।
- ⇨ इकारान्तानां नपुंसकशब्दानां **वारि** इति शब्दवत् रूपम्।
- ⇨ उकारान्तानां नपुंसकशब्दानां **मधु** इति शब्दवत् रूपम्।

**अजन्तनपुंसकलिङ्गाः शब्दाः**

**सावधानं रूपाणि पठत—**

[ इन रूपों को ध्यान से पढ़े। Read these declensions carefully. ]

| प्रातिपदिकम् | एक. | द्वि. | बहु. |
|---|---|---|---|
| **वारि** | वारि | वारिणी | वारीणि |
| **दधि** | दधि | दधिनी | दधीनि |
| **अक्षि** | अक्षि | अक्षिणी | अक्षीणि |
| **मधु** | मधु | मधुनी | मधूनि |
| **जानु** | जानु | जानुनी | जानूनि |

**अभ्यासः — 15**

**अधोनिर्दिष्टानां पदानां प्रातिपदिकम् अन्त्यवर्णं च लिखत—**

[ अधोनिर्दिष्ट पदों के मूलशब्द एवं अन्त्यवर्ण लिखें। Write the base and the ending letter of the following words. ]

| शब्दरूपम् | प्रातिपदिकम् | अन्तनिर्देशः |
|---|---|---|
| उदा. वारि | ........**वारि**..... | ....**इकारान्तः**..... |
| 1. दधि | | |
| 2. अस्थि | | |
| 3. अक्षि | | |
| 4. सक्थि | | |
| 5. मधु | | |
| 6. वस्तु | | |
| 7. श्मश्रु | | |
| 8. अम्बु | | |
| 9. अश्रु | | |
| 10. जानु | | |

## अभ्यासः — 16

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| उदा. | सुन्दरम् | **अक्षि** । | सुन्दरे | **अक्षिणी** । | सुन्दराणि | **अक्षीणि** । | (अक्षि) |
| 1. | मधुरं | । | मधुरे | । | मधुराणि | । | (दधि) |
| 2. | पलितं | । | पलिते | । | पलितानि | । | (श्मश्रु) |
| 3. | दृढम् | .................... । | दृढे | । | दृढानि | । | (अस्थि) |
| 4. | पिङ्गम् | । | पिङ्गे | । | पिङ्गानि | । | (अक्षि) |
| 5. | शीतलम् | । | शीतले | । | शीतलानि | । | (अम्बु) |
| 6. | शुष्कं | । | शुष्के | । | शुष्काणि | । | (दारु) |
| 7. | अधिकं | । | अधिके | । | अधिकानि | । | (मधु) |
| 8. | दीर्घं | । | दीर्घे | । | दीर्घाणि | । | (जानु) |

**अजन्त-नपुंसकलिङ्ग-शब्दाः**

## पुष्पं पुष्पं विचिन्वीत

'**उद्यानं**' नाम तद् यत्र वृक्षाः लताश्च विशिष्टयोजनया रोपिताः वर्धिताः च सन्ति। संस्कृत-भाषायाम् 'उद्यानम्' इत्यस्य कृते **उपवनम्** इति शब्दः अपि प्रसिद्धः अस्ति। पुष्पोद्यानं, फलोद्यानम् इति च मुख्यतया द्विविधम् उद्यानं भवति। कानिचन **उद्यानानि** एतादृशानि अपि भवन्ति यत्र पुष्पवृक्षाः, फलवृक्षाश्चेति उभयविधाः वृक्षाः भवन्ति। अस्माकं विद्यालयस्य प्राङ्गणे एकं तादृशम् उद्यानं वर्तते यत्र फलवृक्षेषु **पक्वफलानि** पुष्पवृक्षेषु च **सुन्दराणि पुष्पाणि** शोभन्ते। पक्षिणः वृक्षे उपविश्य फलानि खादन्ति। कदाचित् मर्कटाः अपि आगत्य एषु वृक्षेषु उपविशन्ति। ते फलानि खादन्ति, **पत्राणि** पुष्पाणि च त्रोटयन्ति। विद्यालयस्य परिचारकाः रक्षकाश्च अधः पतितानि फलानि गृहं नयन्ति। मह्यम् आम्रम् आमलकम् चेति **द्वे फले**, कमलं पाटलं चेति **द्वे पुष्पे** च अतीव रोचेते। अत एव अवसरे प्राप्ते अहं **ते** एव फले **ते** एव पुष्पे च उद्यानात् चिनोमि। परन्तु रक्षकाः मां तस्मात् आचरणात् निवारयन्ति।



एतस्य उद्यानस्य दक्षिणतः एकः तडागः वर्तते। तस्य तडागस्य **वारि** अतीव निर्मलं वर्तते। शशाः, चिक्रोडाः, पक्षिणः च तडागाद् वारि पीत्वा सन्तोषम् अनुभवन्ति। वृक्षेषु मधुमक्षिकाः **मधुच्छत्राणि** निर्मान्ति। तेषु मधुच्छत्रेषु प्रचुरं **मधु** वर्तते। उद्यानस्य रक्षकाः तेभ्यः मधु सङ्गृह्य छात्रेभ्यः यच्छन्ति तथा स्वगृहमपि नयन्ति। अस्मिन् उपवने बहुविधाः वृक्षाः सन्ति। तेषु वृक्षेषु शुष्काणि **दारूणि** इन्धनयोग्यानि भवन्ति। समीपस्थ-ग्रामेभ्यः श्रमिक-महिलाः आगत्य अस्मात् उपवनात् दारूणि सङ्गृह्णन्ति। परन्तु विद्यालयस्य परिचारकाः तदर्थं ताभ्यः कुप्यन्ति।

वृक्षाः खलु न केवलं **वस्तूनि** भवन्ति। तेषु प्राणाः अपि भवन्ति इति न केवलं वैदिकं विज्ञानं किन्तु आधुनिकं वनस्पति-विज्ञानम् अपि प्रमाणयति। यद्यपि मनुष्यवत् एतेषाम् **अक्षीणि** अन्यानि अङ्गानि च न भवन्ति, यद्यपि छेदने सति एते मनुष्यवत् **अश्रूणि** न त्यजन्ति तथापि एते कष्टम् अनुभवन्ति। अतः वनस्पतिहिंसा अस्माकं प्राचीन-शास्त्रे निषिद्धा अस्ति। "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुम् असाम्प्रतम्" इति अस्माकं पूर्वजैः सघोषम् उक्तमस्ति। एतादृशेन वचनेन वृक्षच्छेदन-प्रवृत्तिः सर्वथा निषिद्धा वर्तते। आधुनिकाः अपि वृक्षच्छेदनं न प्रोत्साहयन्ति। वनेषु उपवनेषु च अनावश्यकं वृक्षच्छेदनं शासनेन निषिद्धमस्ति। अस्मिन् **प्रसङ्गे** अस्माकं प्राचीन-परम्परायाम् अपरा अपि काचन विशिष्टा सूक्तिः प्रसिद्धा वर्तते– "पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्" इति। एतादृशीं सूक्तिं वयं जीवने अवतारयामः चेत् वृक्षच्छेदनं न भविष्यति। तेन पर्यावरणं सन्तुलितं स्वच्छं च स्थास्यति।

◆◆◆

**सुभाषितम्**

⇨ दशकूपसमा वापी दशवापीसमो ह्रदः।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः॥

⇨ पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्।
मालाकार इवारामे न यथाङ्गारकारकः॥

⇨ छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥

⇨ धत्ते भरं कुसुम-पत्र-फलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च।
यो देहमर्पयति चान्यसुखस्य हेतोः
तस्मै वदान्यगुरवे तरवे नमोऽस्तु॥

## अभ्यासः — 17

1. **अधोलिखितानां पदानां बहुवचनरूपाणि लिखत–**
[अधोलिखित पदों के बहुवचन रूप लिखें। Write the plural forms of the following words.]

| | | बहुवचनम् | | | बहुवचनम् |
|---|---|---|---|---|---|
| (i) | पुष्पम् | | (ii) | फलम् | |
| (iii) | पत्रम् | | (iv) | वारि | |
| (v) | दधि | | (vi) | अक्षि | |
| (vii) | दारु | | (viii) | मधु | |
| (ix) | वस्तु | | (x) | श्मश्रु | |

2. **अधोलिखितानां पदानां वचनं निर्दिशत–**
[ अधोलिखित पदों के वचन का निर्देश करें। Write the number of the following words. ]

| | | वचनम् | | | वचनम् |
|---|---|---|---|---|---|
| (i) | फले | | (ii) | दारूणि | |
| (iii) | वारिणी | | (iv) | दधि | |
| (v) | जानूनि | | (vi) | पुष्पाणि | |
| (vii) | मधुनी | | (viii) | दधीनि | |
| (ix) | अक्षिणी | | (x) | वस्तूनि | |
| (xi) | श्मश्रुणी | | (xii) | अस्थीनि | |
| (xiii) | सक्थिनी | | (xiv) | अश्रुणी | |

3. **अधोलिखितानां प्रश्नानाम् उत्तरं लिखत–**

[ अधोलिखित प्रश्नों का उत्तर लिखें। Answer the following questions. ]

(i) पुष्पवृक्षेषु कानि शोभन्ते ?

।

(ii) तडागस्य किं निर्मलं वर्तते ?

............................................................................................................ ।

(iii) मधुच्छत्रेषु प्रचुरं किं वर्तते ?

।

(iv) वृक्षेषु कानि इन्धनयोग्यानि भवन्ति ?

।

(v) छेदने सति वृक्षाः किं न त्यजन्ति ?

।

# प्रथमः स्तबकः

## 1.4 चतुर्थः पाठः

### [ हलन्तपुंलिङ्गाः शब्दाः ]

📖 **अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

| एक. | द्वि. | बहु. |
|---|---|---|
|  |  |  |
| **ऋत्विक्** यजति। | **ऋत्विजौ** यजतः। | **ऋत्विजः** यजन्ति। |
|  |  |  |
| **शक्तिमान्** पराक्रमं प्रदर्शयति। | **शक्तिमन्तौ** पराक्रमं प्रदर्शयतः। | **शक्तिमन्तः** पराक्रमं प्रदर्शयन्ति। |
|  |  |  |
| **सुहृद्** आगच्छति। | **सुहृदौ** मिलतः। | **सुहृदः** गच्छन्ति। |



**राजा** न्यायं करोति ।



**राजानौ** वार्तां कुरुतः ।



**राजानः** युध्यन्ते ।



**विद्यार्थी** लिखति ।



**विद्यार्थिनौ** लिखतः ।



**विद्यार्थिनः** लिखन्ति ।



**विद्वान्** पूज्यः भवति ।



**विद्वांसौ** पूज्यौ भवतः ।



**विद्वांसः** पूज्याः भवन्ति ।



**युवा** धावति ।



**युवानौ** धावतः ।



**युवानः** धावन्ति ।

**एतानि वाक्यानि पठत—**

[ इन वाक्यों को पढ़ें। Read the following sentences. ]

| | | |
|---|---|---|
| **वणिक्** वाणिज्यं करोति। | **वणिजौ** वाणिज्यं कुरुतः। | **वणिजः** वाणिज्यं कुर्वन्ति। |
| **भिषक्** औषधं ददाति। | **भिषजौ** औषधं दत्तः। | **भिषजः** औषधं ददति। |
| **सम्राट्** प्रजाः पालयति। | **सम्राजौ** प्रजाः पालयतः। | **सम्राजः** प्रजाः पालयन्ति। |
| **धीमान्** आदरं प्राप्नोति। | **धीमन्तौ** आदरं प्राप्नुतः। | **धीमन्तः** आदरं प्राप्नुवन्ति। |
| **बुद्धिमान्** अर्थं जानाति। | **बुद्धिमन्तौ** अर्थं जानीतः। | **बुद्धिमन्तः** अर्थं जानन्ति। |
| **भक्तिमान्** देवम् अर्चति। | **भक्तिमन्तौ** देवम् अर्चतः। | **भक्तिमन्तः** देवम् अर्चन्ति। |
| **धनवान्** गौरवं लभते। | **धनवन्तौ** गौरवं लभेते। | **धनवन्तः** गौरवं लभन्ते। |
| **ज्ञानवान्** कीर्तिं प्राप्नोति। | **ज्ञानवन्तौ** कीर्तिं प्राप्नुतः। | **ज्ञानवन्तः** कीर्तिं प्राप्नुवन्ति। |
| **श्रद्धावान्** ज्ञानं लभते। | **श्रद्धावन्तौ** ज्ञानं लभेते। | **श्रद्धावन्तः** ज्ञानं लभन्ते। |
| **मन्त्री** भाषणं करोति। | **मन्त्रिणौ** भाषणं कुरुतः। | **मन्त्रिणः** भाषणं कुर्वन्ति। |
| **अधिकारी** कार्यं निर्वहति। | **अधिकारिणौ** कार्यं निर्वहतः। | **अधिकारिणः** कार्यं निर्वहन्ति। |
| **विज्ञानी** अध्ययनं करोति। | **विज्ञानिनौ** अध्ययनं कुरुतः। | **विज्ञानिनः** अध्ययनं कुर्वन्ति। |
| **योगी** तपः आचरति। | **योगिनौ** तपः आचरतः। | **योगिनः** तपः आचरन्ति। |
| **पुमान्** पृच्छति। | **पुमांसौ** पृच्छतः। | **पुमांसः** पृच्छन्ति। |

☞ स्थूलाक्षरैः लिखितानि पदानि हलन्तपुंलिङ्गशब्दानां प्रथमायाः रूपाणि सन्ति।

**नूतनक्रियारूपम्**

**लभते** = प्राप्नोति।

## हलन्तपुंलिङ्गाः शब्दाः

**एतानि प्रथमान्तरूपाणि स्मरत—**

[ इन प्रथमान्त रूपों को स्मरण करें। Remember these nominative declensions. ]

### प्रथमायां रूपाणि

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **वणिज्** | वणिक् | वणिजौ | वणिजः |
| **सम्राज्** | सम्राट् | सम्राजौ | सम्राजः |
| **धीमत्** | धीमान् | धीमन्तौ | धीमन्तः |
| **महत्** | महान् | महान्तौ | महान्तः |
| **सुहृद्** | सुहृद् | सुहृदौ | सुहृदः |
| **राजन्** | राजा | राजानौ | राजानः |
| **आत्मन्** | आत्मा | आत्मानौ | आत्मानः |
| **मन्त्रिन्** | मन्त्री | मन्त्रिणौ | मन्त्रिणः |
| **गुणिन्** | गुणी | गुणिनौ | गुणिनः |
| **विद्वस्** | विद्वान् | विद्वांसौ | विद्वांसः |

## अभ्यासः — 18

✍ **अवशिष्टानि रूपाणि लिखत–**
[ अवशिष्ट रूप लिखें। Complete the remaining declension. ]

| | | | |
|---|---|---|---|
| उदा. | **मरुत्** | **मरुतौ** | **मरुतः** । |
| 1. | | धीमन्तौ | । |
| 2. | | | धनवन्तः । |
| 3. | महान् | | । |
| 4. | | भिषजौ | । |
| 5. | | | बुद्धिमन्तः । |
| 6. | राजा | | । |
| 7. | | अधिकारिणौ | । |
| 8. | सुहृद् | | । |
| 9. | | | सम्राजः । |
| 10. | | विद्वांसौ | । |
| 11. | हनुमान् | | । |
| 12. | | | बलिनः । |
| 13. | | भवन्तौ | । |
| 14. | | | पुमांसः । |
| 15. | गतिमान् | | । |
| 16. | | विद्यार्थिनौ | । |
| 17. | | | आत्मानः । |

## अभ्यासः — 19

**रिक्तस्थाने यथोचितं रूपं लिखत–**

[ रिक्तस्थान में यथोचित रूप लिखें। Write appropriate forms in the blank space. ]

| | | | |
|---|---|---|---|
| उदा. | महान्तः | पूज्याः सन्ति। | (महान्तः / महान् / महान्तम्) |
| 1. | | सम्यक् पठति। | (बुद्धिमन्तौ / बुद्धिमन्तः / बुद्धिमान्) |
| 2. | | प्रयोगं कुरुतः। | (विज्ञानिनः / विज्ञानिना / विज्ञानिनौ) |
| 3. | | वाणिज्यं कुरुतः। | (वणिजा / वणिजौ / वणिजः) |
| 4. | | वदति। | (पुंसः / पुमांसः / पुमान्) |
| 5. | | साहाय्यं करोति। | (सुहृदौ / सुहृद् / सुहृदः) |
| 6. | | गौरवं लभन्ते। | (धनवन्तः / धनवान् / धनवतः) |
| 7. | | अस्ति। | (सम्राजः / सम्राट् / सम्राजौ) |
| 8. | | सर्वत्र पूज्यते। | (विद्वान् / विद्वांसः / विदुषः) |
| 9. | | सर्वं जानीतः। | (बुद्धिमतः / बुद्धिमन्तौ / बुद्धिमान्) |
| 10. | | जलधिं तरति। | (हनुमान् / हनुमन्तः / हनुमन्तम्) |
| 11. | | समालोचनं कुरुतः। | (मन्त्री / मन्त्रिणौ / मन्त्रिणः) |
| 12. | | गर्वं प्रदर्शयन्ति। | (धनी / धनिनः / धनिनम्) |
| 13. | | शासनं कुर्वन्ति। | (सम्राजः / सम्राट् / सम्राजा) |
| 14. | | लोककल्याणं कुरुतः। | (योगी / योगिनौ / योगिना) |
| 15. | | यागं करोति। | (ऋत्विजः / ऋत्विजा / ऋत्विक्) |
| 16. | | सम्मानं प्राप्नुवन्ति। | (गुणी / गुणिनः / गुणिना) |
| 17. | | अवगुणं न प्रकाशयतः। | (मतिमान् / मतिमन्तः / मतिमन्तौ) |
| 18. | | चर्चायां निरताः। | (धीमान् / धीमन्तौ / धीमन्तः) |
| 19. | | परद्रव्येषु गृध्यति। | (लोभिनौ / लोभी / लोभिनः) |

## अभ्यासः – 20

**कः किं न करोति इति कोष्ठकस्थ-शब्देषु क्रियानुरूपां विभक्तिं प्रयुज्य लिखत–**

[ कौन क्या नहीं करता- यह कोष्ठकस्थ शब्दों में क्रियानुरूप विभक्ति जोड़कर लिखें। Write who does not do what by adding case-ending to the words given in the bracket as per the verbal form. ]

| | | | |
|---|---|---|---|
| उदा. | (राजन्) | **राजा** | भीरुः न भवतु । |
| | (तपस्विन्) | **तपस्विनौ** | पुण्यम् अपेक्षेते । |
| | (दिविषद्) | **दिविषदः** | मर्त्यलोके न भवन्ति । |
| 1. | (गुणिन्) | | अपशब्दं न वदति । |
| 2. | (शक्तिमत्) | | धैर्यं न जहाति । |
| 3. | (योगिन्) | | कोपं न प्रदर्शयति । |
| 4. | (आत्मन्) | | न विनश्यति । |
| 5. | (सम्राज्) | | व्यसनी न भवेत् । |
| 6. | (पुंस्) | | कृपणः न भवेत् । |
| 7. | (मायाविन्) | | विश्वसनीयः न भवति । |
| 8. | (ऋत्विज्) | | देवनिन्दनं न कुरुतः । |
| 9. | (धीमत्) | | आलस्यं न प्रदर्शयतः । |
| 10. | (महात्मन्) | | विपदि न विचलतः । |
| 11. | (सुहृद्) | | आपद्गतं न त्यजन्ति । |
| 12. | (अश्वारोहिन्) | | आकाशे न सञ्चरतः । |
| 13. | (बलिन्) | | योद्धारौ युध्यतः । |
| 14. | (श्रीमत्) | | भिक्षां न याचन्ते । |
| 15. | (भिषज्) | | रुग्णान् न उपेक्षन्ते । |
| 16. | (राजन्) | | सज्जनान् न दण्डयन्ति । |
| 17. | (मतिमत्) | | अकार्ये न प्रवर्तन्ते । |
| 18. | (विवेकिन्) | | सहसा क्रियां न कुर्वन्ति । |
| 19. | (शीलवत्) | | सदाचारं न त्यजन्ति । |
| 20. | (आततायिन्) | | दयां न प्रदर्शयन्ति । |

## विवरणम्

### अन्तिमं कथं जानीमः?

[ अन्तिम कैसे जानें। How to know the endings ? ]

व्यञ्जनान्तानां बहुवचने यत् अन्तिमं व्यञ्जनं दृश्यते तदन्तः एव सः शब्दः भवति। यथा– 'वणिजः' इत्यत्र अन्तिमं व्यञ्जनं भवति जकारः, अतः एषः जकारान्तः। 'धीमन्तः' इत्यत्र अन्तिमं व्यञ्जनं भवति तकारः, अतः 'धीमत् शब्दः तकारान्तः'।

***एवम्*** ⇨ ऋत्विक्, भिषक्, सम्राट् इत्यादयः जकारान्ताः।
(यतः बहुवचनस्य अन्तिमं व्यञ्जनं जकारः अस्ति)

⇨ धीमान्, बुद्धिमान्, धनवान् इत्यादयः तकारान्ताः।

⇨ राजा, आत्मा, मन्त्री, योगी इत्यादयः नकारान्ताः।

⇨ विद्वान् इत्येषः सकारान्तः। 'पुमान्' अपि तथैव।

व्यञ्जनान्तशब्दानां रूपज्ञानाय अन्तिमवर्णस्य ज्ञानं परम् आवश्यकं भवति। एकस्य व्यञ्जनान्तस्य शब्दस्य रूपाणि सावधानं पश्यन्ति चेत् तत्सदृशानां व्यञ्जनान्तानां रूपविषये ज्ञानं सरलतया भवति।

**अवधेयम्**

⇨ एकवचनान्तरूपं दृष्ट्वा अन्तनिर्णयं मा कुरुत। प्रत्युत तदर्थं बहुवचनस्य अन्तिमं व्यञ्जनं पश्यत।

| | **एक.** | **बहु.** | **एक.** | **बहु.** |
|---|---|---|---|---|
| **यथा** | वणिक् | वणिजः | सम्राट् | सम्राजः |
| | राजा | राजानः | आत्मा | आत्मानः |
| | विद्वान् | विद्वांसः | धीमान् | धीमन्तः |
| | मन्त्री | मन्त्रिणः | पुमान् | पुमांसः |

⇨ पूर्वोक्तः नियमः व्यजनान्तविषये एव, न तु स्वरान्तविषये।

**यथा–** हरयः, गुरवः, दधीनि इत्यादिषु बहुवचनरूपेषु अन्ते यकार-वकार-नकारादयः दृश्यन्ते इत्यतः ते यकारान्ताः, वकारान्ताः नकारान्ताः च सन्ति इति निर्णयं मा कुरुत।

## अभ्यासः — 21

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| प्रथमायाम् एक. | बहुवचनरूपम् | अन्तिमं व्यञ्जनम् | प्रातिपदिकम् |
|---|---|---|---|
| उदा. वणिक् | वणिजः | जकारः | वणिज् |
| 1. ऋत्विक् | | | |
| 2. सुहृत् | | | |
| 3. स्वामी | | | |
| 4. बुद्धिमान् | | | |
| 5. भिषक् | | | |
| 6. विद्वान् | | | |
| 7. आत्मा | | | |
| 8. सम्राट् | | | |
| 9. पुमान् | | | |
| 10. शक्तिमान् | | | |
| 11. मरुत् | | | |
| 12. विद्यार्थी | | | |
| 13. महान् | | | |
| 14. तेजस्वी | | | |
| 15. विज्ञानी | | | |
| 16. हस्ती | | | |
| 17. गुणवान् | | | |
| 18. भवान् | | | |

## अभ्यासः — 22

**अधोनिर्दिष्टानाम् अन्त्यवर्णं निर्दिशत—**

[अधोनिर्दिष्ट पदों के अन्त्यवर्ण का निर्देश करें। Point out the ending letter of the following words.]

| | एक. | बहु. | अन्तनिर्देशः |
|---|---|---|---|
| उदा. | वणिक् | वणिजः | जकारान्तः |
| 1. | पयोमुक् | पयोमुचः | |
| 2. | भवान् | [illegible] | |
| 3. | श्रीमान् | श्रीमन्तः | |
| 4. | भगवान् | भगवन्तः | |
| 5. | हनूमान् | हनूमन्तः | |
| 6. | बली | बलिनः | |
| 7. | गतिमान् | गतिमन्तः | |
| 8. | योगी | योगिनः | |
| 9. | द्विट् | द्विषः | |
| 10. | पठन् | पठन्तः | |

**हलन्त-पुंलिङ्ग-शब्दाः**

# आपत्सु मित्रं जानीयात्

द्वापरयुगस्य कथा अस्ति। **भगवान्** श्रीकृष्णः द्वारकायाः **राजा** आसीत्। तस्य अनेके **सहपाठिनः सुहृदः** च आसन्। ते सर्वे मिलित्वा वने गाः चारयन्ति स्म। तेषु सुहृत्सु कृष्णः सुदामा च अन्तरङ्गौ **सुहृदौ** आस्ताम्। सुदामा कृष्णस्य अतीव प्रियः आसीत्। तस्मिन् कृष्णस्य **भूयान्** स्नेहः आसीत्। प्रौढे वयसि मथुरां विहाय कृष्णः द्वारका-पुरीं गतवान्। तत्र सः **राजा** अभवत्। एवं तस्य बाल्य-सुहृद्भ्यः साक्षात् सम्पर्कः विच्छिन्नः अभवत्।



आरम्भात् एव **सुदामा** निर्धनः आसीत्। सः न केवलं कृष्णस्य **सुहृद्** आसीत् किन्तु तस्य भक्तः अपि आसीत्। दारिद्र्यवशात् यद्यपि सुदामा महति कष्टे आसीत् तथापि तत्प्रतीकाराय किञ्चित् न अकरोत्। सः केवलं कृष्णं भजति स्म। तद् दृष्ट्वा तस्य पत्नी तम् उक्तवती– "आर्यपुत्र ! भवतः सुहृद् इदानीं द्वारकायाः **राजा** वर्तते। **भवान्** तं मिलित्वा किमर्थं स्वकष्टविषये न सूचयति ? सः भवतः साहाय्यम् अवश्यमेव आचरिष्यति।"

आदौ सुदामा तदर्थम् उद्यतः न अभवत्। स्वमतं सम्पोषयन् सः पत्नीं प्रबोधितवान्– "स्वार्थाय सुहृदे कष्टं न दातव्यं किल ! अपरं च, किं त्वं न जानासि यत् कृष्णः इदानीं **महान् राजा** वर्तते। राजकार्येषु व्यग्रतया कदाचित् सः अस्मान् विस्मृतवान् स्यात्। अत एव एतादृश्यां स्थितौ केवलं स्वार्थाय तेन सह मम मेलनम् उचितं न भाति" इति।

सुदाम्नः मन्तव्यं श्रुत्वा तस्य पत्नी पुनः आग्रहं कृतवती– "नहि नहि आर्यपुत्र ! कृष्णस्य विषये मया बहुधा श्रुतमस्ति। सः तु **विद्वान्, गुणग्राही, सहृत्प्रेमी,** भक्तानाम् उद्धारकः, दरिद्राणां च पोषकः अस्ति। अतः सः एवं न आचरिष्यति। **भवान्** एकवारं गत्वा तं मिलतु स्वकष्टं च श्रावयतु" इति।

पत्न्याः आग्रहेण उत्साहितः सुदामा द्वारका-यात्रायै सज्जः अभवत्। पद्भ्यां **गच्छन्** सः द्वारकां प्राप्तवान्। राजद्वारे **राजकर्मचारिणः** तस्य प्रवेशं न अनुमतवन्तः। "**राजा** कृष्णः मम **सुहृद्** अस्ति" इति **सुदामा** स्वपरिचयं प्रस्तुतवान्। किन्तु **कर्मचारिणः** तस्य वाचि न विश्वसितवन्तः। ते तस्य परिहासं कृतवन्तः। अस्मिन् एव अवसरे कृष्णः दूरात् सुदामानं दृष्ट्वा स्वयं तत्र आगतवान्। आलिङ्गनपूर्वकम् अभिनन्द्य सः सुदामानम् अन्तःपुरं नीतवान्। परिचयं सम्प्राप्य सत्यभामा सुदाम्नः पादौ प्रक्षाल्य वस्त्राञ्चलेन प्रोञ्छितवती। आगमनसमये सुदाम्नः पत्नी कृष्णस्य कृते पृथुकान् प्रेषितवती। सुदामा सङ्कोचवशात् तान् न निष्कासयति स्म। परन्तु अनवधानात् यदा पोट्टलिका अधः पतिता तदा कृष्णः झटिति ताम् उन्मोच्य सहर्षं पृथुकान् खादितवान्। सुदामा राजप्रासादे कतिचिद् दिनानि उषित्वा रिक्तहस्तः एव गृहं प्रत्यागतवान्। सः **इच्छन्** अपि सङ्कोचवशात् स्वप्रयोजनविषये मित्रं वक्तुं न पारितवान्। परन्तु **भगवान् भावग्राही** वर्तते। सः कथ्यम् अकथ्यं सर्वं तथ्यं जानाति। गृहम् आगत्य सुदामा दृष्टवान् यत् तस्य गृहस्य रूपं परिवर्तितम् अस्ति। तस्य पत्नी अपि बहुमूल्यैः आभूषणैः अलङ्कृता वर्तते। एतत् सर्वं कथं घटितम् इति विषये सुदामा आश्चर्यं प्रकटितवान्। "**श्रीमन्** ! भवतः गमनात्परम् कश्चन बालपथिकः अस्माकं गृहम् आगतवान्। तस्य आगमनमात्रेण एतत् सर्वं स्वतः अजायत" इति पत्नी तं सूचितवती। तत् श्रुत्वा नूनम् एतत् कृष्णस्य कार्यम् अस्तीति सुदामा ज्ञातवान्।



◆◆◆

## सुभाषितम्

➪ आपत्सु मित्रं जानीयाद् बान्धवान् विभवक्षये।

➪ कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते॥

➪ ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥

## अभ्यासः – 23

1. **पाठाधारेण रिक्तस्थानानि पूरयत–**

[ पाठ के आधार से रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the lesson. ]

(i) श्रीकृष्णः द्वारकायाः ______ आसीत्।

(ii) सः न केवलं कृष्णस्य ______ आसीत्।

(iii) श्रीकृष्णः इदानीं ______ राजा वर्तते।

(iv) राजा कृष्णः मम ______ अस्ति।

(v) परन्तु भगवान् ______ वर्तते।

2. **अधोलिखितानां पदानां प्रातिपदिकं लिखत–**

[ अधोलिखित पदों के प्रातिपदिक लिखें। Write the base of the following words. ]

| | प्रातिपदिकम् | | प्रातिपदिकम् |
|---|---|---|---|
| (i) राजा | | (ii) विद्वान् | |
| (iii) सुहृद् | | (iv) भावग्राही | |
| (v) भवान् | | (vi) भगवान् | |

3. **अधोलिखितानां प्रातिपदिकानां प्रथमायां रूपाणि लिखत–**

[ अधोलिखित प्रातिपदिकों के प्रथमा के रूप लिखें । Write the nominative declension of the following words. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| (i) भवत् | | | |
| (ii) गुणिन् | | | |
| (iii) राजन् | | | |
| (iv) सम्राज् | | | |
| (v) विद्वस् | | | |

# प्रथमः स्तबकः

## 1.5 पञ्चमः पाठः

### [ हलन्तस्त्रीलिङ्गाः शब्दाः ]

**अधोलिखितानि वाक्यानि पठत–**

[अधोलिखित वाक्यों को पढ़ें। Read the following sentences.]

| एक. | द्वि. | बहु. |
|---|---|---|
|  |  |  |
| **योषित्** दूरदर्शनं पश्यति। | **योषितौ** मेघं पश्यतः। | **योषितः** दूरदर्शनं पश्यन्ति। |
|  |  |  |
| **स्रक्** अस्ति। | **स्रजौ** स्तः। | **स्रजः** सन्ति। |
|  |  |  |
| **अप्सराः** नृत्यति। | **अप्सरसौ** नृत्यतः। | **अप्सरसः** नृत्यन्ति। |

## एतानि वाक्यानि पठत–

[ इन वाक्यों को पढ़ें। Read the following sentences. ]

| | | |
|---|---|---|
| **वाक्** मधुरा अस्ति। | **वाचौ** मधुरे स्तः। | **वाचः** मधुराः सन्ति। |
| मूर्तौ **स्रक्** अस्ति। | मूर्त्योः **स्रजौ** स्त। | मूर्तिषु **स्रजः** सन्ति। |
| **सरित्** वहति। | **सरितौ** वहतः। | **सरितः** वहन्ति। |
| **विपद्** आपतति। | **विपदौ** आपततः। | **विपदः** आपतन्ति। |
| **परिषद्** भवति। | **परिषदौ** भवतः। | **परिषदः** भवन्ति। |
| **समित्** ज्वलति। | **समिधौ** ज्वलतः। | **समिधः** ज्वलन्ति। |
| **दिक्** शून्या भवति। | **दिशौ** शून्ये भवतः। | **दिशः** शून्याः भवन्ति। |
| **विद्युत्** विद्योतते। | **विद्युतौ** विद्योतेते। | **विद्युतः** विद्योतन्ते। |

☞ स्थूलाक्षरैः लिखितानि पदानि हलन्तस्त्रीलिङ्गशब्दानां प्रथमायाः रूपाणि सन्ति।

## हलन्तस्त्रीलिङ्गाः शब्दाः

🗁 **अधोलिखितानि रूपाणि स्मरत–**

[ अधोलिखित रूपों को स्मरण करें। Remember the following declensions. ]

**प्रथमायां रूपाणि**

| प्रातिपदिकम् | एक. | द्वि. | बहु. |
|---|---|---|---|
| **त्वच्** | त्वक् | त्वचौ | त्वचः |
| **वाच्** | वाक् | वाचौ | वाचः |
| **स्रज्** | स्रक् | स्रजौ | स्रजः |
| **सरित्** | सरित् | सरितौ | सरितः |
| **तडित्** | तडित् | तडितौ | तडितः |
| **विद्युत्** | विद्युत् | विद्युतौ | विद्युतः |
| **आपद्** | आपत् | आपदौ | आपदः |
| **विपद्** | विपत् | विपदौ | विपदः |
| **सम्पद्** | सम्पत् | सम्पदौ | सम्पदः |
| **शरद्** | शरत् | शरदौ | शरदः |
| **संसद्** | संसत् | संसदौ | संसदः |
| **परिषद्** | परिषत् | परिषदौ | परिषदः |
| **प्रतिपद्** | प्रतिपत् | प्रतिपदौ | प्रतिपदः |
| **समिध्** | समित् | समिधौ | समिधः |
| **क्षुध्** | क्षुत् | क्षुधौ | क्षुधः |
| **दिश्** | दिक् | दिशौ | दिशः |
| **प्रावृष्** | प्रावृट् | प्रावृषौ | प्रावृषः |
| **आशिष्** | आशीः | आशिषौ | आशिषः |
| **अप्सरस्** | अप्सराः | अप्सरसौ | अप्सरसः |

## अभ्यासः — 24

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example.]

| | एक. | द्वि. | बहु. | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|---|
| उदा. | योषित् | **योषितौ** | योषितः | 9. | | शरदौ | |
| 1. | वाक् | | वाचः | 10. | परिषत् | | |
| 2. | | स्रजौ | | 11. | | प्रतिपदौ | |
| 3. | त्वक् | त्वचौ | | 12. | क्षुत् | | |
| 4. | आपत् | | आपदः | 13. | | | सरितः |
| 5. | | विपदौ | | 14. | | तडितौ | |
| 6. | समित् | | | 15. | | | योषितः |
| 7. | | | आशिषः | 16. | दिक् | | |
| 8. | सम्पत् | | | 17. | | विद्युतौ | |

## अभ्यासः — 25

✍ **यथोदाहरणम् उचित-वाक्यैः रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार उचित वाक्यों से रिक्तस्थानों की पूर्ति करें। Fill in the blanks with appropriate sentences as shown in the example. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| उदा. | **अप्सराः नृत्यति।** | **अप्सरसौ नृत्यतः।** | **अप्सरसः नृत्यन्ति।** |
| 1. | सरित् प्रवहति । | | |
| 2. | | स्रजौ स्तः । | |
| 3. | आपत् आयाति । | | |

4. संपदः वर्तन्ते ।

5. शरत् राजति ।

6. परिषदौ प्रचलतः ।

7. समिधः ज्वलन्ति ।

8. विद्युत् विलसति ।

9. योषितौ गायतः ।

10.

## अभ्यासः — 26

**प्रदत्तवाक्यानि एकवचने परिवर्त्य लिखत—**

[प्रदत्त वाक्यों को एकवचन में परिवर्तित कर लिखें। Rewrite the sentences by changing the given sentence into singular.]

| | **बहु.** | **एक.** |
|---|---|---|
| उदा. | **दिशः अन्धकारयुताः।** | **दिक् अन्धकारयुता** । |
| 1. | कण्ठे स्रजः शोभन्ते । | । |
| 2. | मुखात् संस्कृतवाचः स्फुरन्ति । | । |
| 3. | जीवने रमणीयाः शरदः आयान्ति । | । |
| 4. | ग्रीष्मानन्तरं प्रावृषः भवन्ति । | । |
| 5. | गगने तडितः द्योतन्ते । | । |
| 6. | शिष्याय आशिषः सन्तु । | । |
| 7. | विद्युतः विद्योतन्ते । | । |
| 8. | गृहे सम्पदः सन्ति । | । |

## अभ्यासः – 27

प्रदत्त-वाक्यानि बहुवचने परिवर्त्य लिखत–

[ प्रदत्त वाक्यों को बहुवचन में परिवर्तित कर लिखें। Convert the singular sentences into plural ones. ]

| | एक. | बहु. |
|---|---|---|
| उदा. | सम्पत् गर्वं जनयति। | सम्पदः गर्वं जनयन्ति । |
| 1. | शिशूनां **वाक्** मधुरा। | । |
| 2. | जीवने **विपद्** आगता। | । |
| 3. | अत्र **परिषत्** प्रचलति। | । |
| 4. | **योषित्** जलम् आनयति। | । |
| 5. | **सरित्** प्रवहति। | । |
| 6. | **उपनिषत्** ब्रह्मतत्त्वं बोधयति। | । |
| 7. | **विद्युत्** शीघ्रगामिनी वर्तते। | । |
| 8. | **अप्सराः** तपोभङ्गं करोति। | । |
| 9. | कानने **समित्** वर्तते। | । |
| 10. | **दृक्** विशाला अस्ति। | । |

## अभ्यासः – 28

अधोलिखित-शब्दानां बहुवचनान्तरूपम् अन्त्यवर्णं च निर्दिशत–

[ अधोलिखित शब्दों के बहुवचनान्त रूप तथा अन्त्यवर्ण का निर्देश करें। Point out the plural forms and the ending letters of the words given below.]

| एक. | बहु. | अन्त्यनिर्देशः |
|---|---|---|
| उदा. स्रक् | स्रजः | जकारान्तः |
| 1. आपत् | | |
| 2. समित् | | |
| 3. प्रावृट् | | |

| एक. | बहु. | अन्त्यनिर्देशः |
|---|---|---|
| 4. आशीः | | |
| 5. सरित् | | |
| 6. उपानत् | | |
| 7. दिक् | | |
| 8. क्षुत् | | |
| 9. संसत् | | |
| 10. उपनिषत् | | |

## अभ्यासः — 29

**अन्त्यवर्णं निर्दिशत—**

[ अन्त्यवर्ण का निर्देश करें। Point out the ending letters. ]

| | एक. | बहु. | अन्त्यनिर्देशः |
|---|---|---|---|
| यथा | स्रक् | स्रजः | जकारान्तः |
| 1. | विपत् | विपदः | |
| 2. | सम्पत् | सम्पदः | |
| 3. | विद्युत् | विद्युतः | |
| 4. | परिषत् | परिषदः | |
| 5. | तडित् | तडितः | |
| 6. | योषित् | योषितः | |
| 7. | प्रतिपत् | प्रतिपदः | |
| 8. | शरत् | शरदः | |
| 9. | त्वक् | त्वचः | |
| 10. | वाक् | वाचः | |

**हलन्त-स्त्रीलिङ्ग-शब्दाः**

## यत्र नार्यस्तु पूज्यन्ते

अस्माकं भारतीय-संस्कृतौ नारीणां भूमिका महत्त्वपूर्णा वर्तते। **योषित्**-स्त्री-महिला-प्रभृतयः 'नारी' इत्यस्य पर्यायवाचिनः शब्दाः सन्ति। वैदिकयुगे मैत्रेयी-गार्गी-प्रभृतयः महत्यः **योषितः** अभवन्। सीता-सावित्री-द्रौपदी-कुन्ती-प्रभृतयः पुराणयुगस्य उल्लेखयोग्याः **योषितः** आसन्। लक्ष्मी-पार्वती-सरस्वत्यादयः देवलोकस्य **योषितः** सन्ति। तासु लक्ष्मीः विष्णोः पार्वती च शिवस्य पत्नी अस्ति। इमे **देवयोषितौ** परमपूज्ये स्तः। रम्भा-मेनका-उर्वशी-प्रभृतयः **अप्सरसः** अपि स्वर्गस्य **योषितः** सन्ति। तासु रम्भा, मेनका च प्रसिद्धे **अप्सरसौ** आस्ताम्। यस्मिन् गृहे योषिताम् आदरः भवति तत्र देवाः निवसन्ति इति अस्माकं शास्त्रेषु उक्तमस्ति– "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इति।



पुरुषापेक्षया स्त्रीणां **वाक्** प्रायः मधुरा भवति। न केवलं **वाक्** किन्तु तासां स्वभावः अपि मधुरः भवति। लोकव्यवहारे वाचः स्वभावस्य च अधिकं महत्त्वं भवति। यदि कस्यचित् **वाक् दृषदिव** कठोरा भवति तर्हि सः लोक-व्यवहारे न कदापि सफलः भवति। वस्तुतः उत्तमनारीणां मधुरया वाचा व्यवहारेण **दृषदा** तुल्याः कठोराः जनाः अपि द्रवीभूताः भवन्ति।



समाजे नारी बह्वीषु भूमिकासु तिष्ठति। क्वचित् मातृरूपेण, क्वचित् भगिनी-रूपेण क्वचित् च जायारूपेण। परन्तु एतासु भूमिकासु तस्याः मातृ-भूमिका सर्वोपरि परिगणिता भवति। अस्यां भूमिकायां सा सन्ततिभ्यः आशिषः प्रयच्छति। मातुः **आशिषः** सन्तानानां सर्वं कार्यं साधयन्ति। कुन्त्याः आशीर्भिः पाण्डवाः महाभारतयुद्धे विजयिनः अभवन्। नारीणाम् **आशीः** न केवलं स्वसन्ततीनां कृते किन्तु अपरेषां कृते अपि भवति। गान्धारी दुर्योधनाय आशीः-प्रदानसमये 'अक्षतमस्तु पुण्यं जगति धर्मस्य भवतु जयः'' इति उक्तवती। पाण्डवानां पक्षे धर्मः आसीत्, अत एव पाण्डवाः विजयिनः अभवन्। नारीणाम् आशीर्भिः सन्तानानां जीवनस्य **दिक्** निर्धारिता भवति। उत्तमां दिशं प्राप्य ते जीवने उन्नतिं कर्तुम् अर्हन्ति।

◆◆◆

## सुभाषितम्

- मातृदेवो भव ।
- न मातुर्दैवतं परम्।
- हितं मनोहारि च दुर्लभं वचः।
- जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।
- कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।
- यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।<br>यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥

## अभ्यासः — 30

1. **पाठानुसारेण रिक्तस्थानानि पूरयत—**
[ पाठ के आधार पर रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the lesson. ]

(i) सीता-सावित्री-प्रभृतयः पुराणयुगस्य ................ आसन् ।

(ii) रम्भा-मेनका-प्रभृतयः स्वर्गस्य ................ सन्ति ।

(iii) स्त्रीणां ................ मधुरा भवति ।

(iv) मातुः ................ सन्तानानां सर्वं कार्यं साधयन्ति ।

(v) आशिर्भिः सन्तानानां ................ निर्धारिता भवति ।

2. **अधोलिखितानां पदानां प्रातिपदिकं लिखत—**
[ अधोलिखित पदों के प्रातिपदिक लिखें। Write the base of the following words. ]

| | | प्रातिपदिकं | | | प्रातिपदिकं |
|---|---|---|---|---|---|
| (i) | योषितः | | (ii) | अप्सरसः | |
| (iii) | वाक् | | (iv) | आशिषः | |

3. **सूक्तिं पूरयत—**
[ सूक्ति की पूर्ति करें। Fill in the good-saying. ]

(i) यत्र नार्यस्तु पूज्यन्ते ................ ।

(ii) अक्षतमस्तु पुण्यं ................ ।

(iii) कुपुत्रो जायेत ................ ।

(iv) जननी जन्मभूमिश्च ................ ।

(v) हितं मनोहारि ................ ।

# प्रथमः स्तबकः

## 1.6 षष्ठः पाठः

### [ हलन्तनपुंसकलिङ्गाः शब्दाः ]

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

| एक. | द्वि. | बहु. |
|---|---|---|
|  |  |  |
| काणस्य एकं **चक्षुः**। | हरिणस्य सुन्दरे **चक्षुषी**। | शिवस्य त्रीणि **चक्षूंषि**। |
|  |  |  |
| कृषकस्य **सद्म**। | कृषकयोः **सद्मनी**। | कृषकाणां **सद्मानि**। |
|  |  |  |
| **दाम** अस्ति। | **दामनी** स्तः। | **दामानि** सन्ति। |



**धनुः** अस्ति।



**धनुषी** स्तः।



**धनूंषि** सन्ति।

### एतानि वाक्यानि पठत—

[इन वाक्यों को पढ़ें। Read the following sentences.]

| | | |
|---|---|---|
| रोगिसेवा **महत्** कार्यं भवति। | रोगिसेवा गोसेवा च **महती** कार्ये भवतः। | लोकहिताय सर्वाणि **महन्ति** कार्याणि भवन्ति। |
| पुरी जगन्नाथस्य **धाम** अस्ति। | पुरी द्वारका च विष्णोः **धामनी** स्तः। | पुरी, द्वारका, बदरीनाथः रामेश्वरः च **धामानि** सन्ति। |
| दीर्घं **दाम** अस्ति। | दीर्घे **दामनी** स्तः। | दीर्घाणि **दामानि** सन्ति। |
| तस्य **नाम** किम् ? | भवतः **नामनी** द्वे। | भगवतः **नामानि** अनेकानि। |
| राष्ट्रपतेः **सद्म** सुन्दरं भवति। | राष्ट्रपतेः प्रधानमन्त्रिणः च **सद्मनी** सुन्दरे भवतः। | राजनेतॄणां **सद्मानि** सुन्दराणि भवन्ति। |
| शिवस्य **धनुः** महत् आसीत्। | कर्णार्जुनयोः **धनुषी** बृहती आस्ताम्। | वीराणां **धनूंषि** बृहन्ति भवन्ति। |
| मीनस्य **चक्षुः** सुन्दरं भवति। | हरिणस्य **चक्षुषी** आयते भवतः। | अप्सरसां **चक्षूंषि** सुन्दराणि भवन्ति। |

☞ स्थूलाक्षरैः लिखितानि पदानि हलन्तनपुंसकलिङ्गशब्दानां प्रथमायाः रूपाणि सन्ति।

## हलन्तनपुंसकलिङ्गशब्दाः

अधोलिखितानि रूपाणि स्मरत—

[ अधोलिखित रूपों को स्मरण करें। Remember the following declensions. ]

| प्रातिपदिकम् | एक. | द्वि. | बहु. |
|---|---|---|---|
| जगत् | जगत् | जगती | जगन्ति |
| बृहत् | बृहत् | बृहती | बृहन्ति |
| महत् | महत् | महती | महन्ति |
| शकृत् | शकृत् | शकृती | शकृन्ति |
| दीव्यत् | दीव्यत्-द् | दीव्यती | दीव्यन्ति |
| हृद् | हृत् | हृदी | हृन्दि |
| कर्मन् | कर्म | कर्मणी | कर्माणि |
| धामन् | धाम | धामनी/धाम्नी | धामानि |
| व्योमन् | व्योम | व्योमनी/व्योम्नी | व्योमानि |
| सामन् | साम | सामनी | सामानि |
| दामन् | दाम | दामनी | दामानि |
| शर्मन् | शर्म | शर्मणी | शर्माणि |
| वेश्मन् | वेश्म | वेश्मनी | वेश्मानि |
| नामन् | नाम | नामनी/नाम्नी | नामानि |
| सद्मन् | सद्म | सद्मनी | सद्मानि |
| वर्मन् | वर्म | वर्मणी | वर्माणि |
| हविष् | हविः | हविषी | हवींषि |
| वपुष् | वपुः | वपुषी | वपूंषि |
| धनुष् | धनुः | धनुषी | धनूंषि |
| आयुष् | आयुः | आयुषी | आयूंषि |
| चक्षुष् | चक्षुः | चक्षुषी | चक्षूंषि |
| पयस् | पयः | पयसी | पयांसि |
| मनस् | मनः | मनसी | मनांसि |
| तपस् | तपः | तपसी | तपांसि |
| यशस् | यशः | यशसी | यशांसि |

## अभ्यासः — 31

✍ **उदाहरणानुरूपम् प्रातिपदिकम् अन्त्यवर्णं च निर्दिशत–**

[ उदाहरण के अनुसार मूलशब्द एवं अन्त्यवर्ण का निर्देश करें। Point out the base and their ending letters as shown in the example. ]

| | एक. | द्वि. | बहु. | प्रातिपदिकम् | अन्तनिर्देशः |
|---|---|---|---|---|---|
| उदा. | पयः | पयसी | पयांसि | पयस् | सकारान्तः |
| 1. | व्योम | व्योमनी/व्योम्नी | व्योमानि | | |
| 2. | बृहत् | बृहती | बृहन्ति | | |
| 3. | कर्म | कर्मणी | कर्माणि | | |
| 4. | वयः | वयसी | वयांसि | | |
| 5. | मनः | मनसी | मनांसि | | |
| 6. | तपः | तपसी | तपांसि | | |
| 7. | नाम | नामनी/नाम्नी | नामानि | | |
| 8. | सरः | सरसी | सरांसि | | |
| 9. | अहः | अहनी/अह्नी | अहानि | | |
| 10. | सद्म | सद्मनी | सद्मानि | | |

## अभ्यासः — 32

✍ **द्विवचनं बहुवचनं च लिखत–**

[ द्विवचन एवं बहुवचन लिखें। Write the dual and plural.]

| | एक. | द्वि. | बहु. | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|---|
| उदा. | जगत् | जगती | जगन्ति | | | | |
| 1. | अहः | | | 6. | आयुः | | |
| 2. | पयः | | | 7. | वेश्म | | |
| 3. | यशः | | | 8. | चक्षुः | | |
| 4. | कर्म | | | 9. | हविः | | |
| 5. | नाम | | | 10. | धनुः | | |

## अभ्यासः — 33

✍ **कोष्ठके स्थितस्य शब्दस्य उचितरूपेण रिक्तस्थानं पूरयत—**

[ कोष्ठक में दिये गये शब्दों के उचित रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the appropriate forms of the words given in the bracket. ]

| | | |
|---|---|---|
| उदा. | नारीणां ....**मनांसि**.... कोमलानि भवन्ति। | (मनस्) |
| 1. | एतत् जनकस्य अस्ति। | (धनुष्) |
| 2. | सिंहस्य पिङ्गे स्तः। | (चक्षुष्) |
| 3. | सप्ताहे सप्त भवन्ति। | (अहन्) |
| 4. | मम द्वे स्तः। | (सद्मन्) |
| 5. | इमे विशाले। | (सरस्) |
| 6. | श्रमशीलस्य अनेकानि भवन्ति। | (कर्मन्) |
| 7. | दुर्जनस्य कलुषितं भवति। | (मनः) |
| 8. | गोः मधुरम्। | (पयस्) |
| 9. | हवनकुण्डे प्रभूतानि अर्प्यन्ते। | (हविष्) |
| 10. | एतानि धनिकस्य । | (वेश्मन्) |
| 11. | राजपथे मन्दिराणि सन्ति। | (बृहत्) |
| 12. | कालिदासस्य जगति सुप्रसिद्धम्। | (नामन्) |
| 13. | हरिणस्य सुन्दरे भवतः। | (चक्षुष्) |
| 14. | लोकोत्तराणां वज्रादपि कठोराणि कुसुमादपि च मृदूनि भवन्ति। | (चेतस्) |
| 15. | वैकुण्ठं विष्णोः । | (धामन्) |
| 16. | कायक्लेशं जनयन्ति। | (तपस्) |
| 17. | शार्ङ्गं गाण्डीवं च कृष्णार्जुनयोः । | (धनुष्) |
| 18. | मनुष्यस्य अनवरतं क्षीयते। | (आयुः) |
| 19. | गुरूणां पालनीयानि। | (वचस्) |
| 20. | अद्य मेघावृतम् अस्ति। | (व्योमन्) |

**हलन्त-नपुंसकलिङ्ग-शब्दाः**

## कवयः क्रान्तदर्शिनः

इह संसारे अन्येभ्यः जन्मभ्यः **नरजन्म** दुर्लभमस्ति। तदपेक्षया विद्या अधिकं दुर्लभा वर्तते। किन्तु विद्यापेक्षया कवित्वम् अधिकं दुर्लभं भवतीति काचन प्रसिद्धा सूक्तिः अस्ति। वस्तुतः विद्याध्ययनं **कविकर्म** चेति द्वे अपि **तपसी** भवतः। ये तादृंशि **तपांसि** आचरन्ति ते लोके अवश्यमेव यशस्विनः भवन्ति।

अस्माकं भारतवर्षे बहवः संस्कृत-कवयः अभवन्। तेषु वाल्मीकिः आदिकविः आसीत्। व्यासादयः अपि महान्तः कवयः अभवन्। वाल्मीकिव्यास-प्रभृतयः ऋषिकवयः आसन्। तेषां **वचांसि** पवित्राणि भवन्ति। अत एव



वेदाः, उपनिषदः पुराणानि च पवित्र-ग्रन्थरूपेण स्वीकृतानि सन्ति। कालिदास-भवभूति-प्रभृतयः अद्भुताः महाकवयः अत्युत्तमानि काव्यानि विरचय्य प्रभूतानि **यशांसि** अलभन्त।

यद्यपि सहृदयपाठकस्य कवेः च **मनसी** समाने स्तः तथापि कवेः **मनः** विशेषेण कल्पना-कुशलं संवेदनशीलं च भवति। समाजे जायमानाः घटनाः सर्वे पश्यन्ति। परन्तु सर्वे ताभिः घटनाभिः प्रभाविताः न भवन्ति। सहृदयाः कवयः स्वकीय-परिवेशेन भृशं प्रभाविताः भवन्ति। तेषां द्रवीभूतानि **चेतांसि** काव्यरूपेण प्रवहन्ति। यदा कश्चन व्याधः क्रौञ्चमिथुनात् एकम् अवधीत्, तदा व्यथितस्य वाल्मीकेः शोकः श्लोकरूपं प्राप्तवान्। फलतः अद्य उत्कृष्टं महाकाव्यं रामायणम् अस्माकं समक्षं वर्तते।



न केवलं शोकः किन्तु **प्रेम** अपि काव्यस्य उपजीव्यं भवति। बहुषु महाकाव्येषु नायक-नायिकानां **प्रेमाणि** वर्णितानि सन्ति। मानवीय-प्रेम्णा सह **प्रकृतिप्रेम** अपि महाकवेः कालिदासस्य काव्यानां विषयः आसीत्। एते

आसीत्। एते महाकवयः स्वकविकर्मणा "यत्र न गच्छति रविः, तत्र गच्छति कविः" इत्येतादृशं वचः चरितार्थयन्ति! वस्तुतः **कविजगत्** सामान्यजनानां जगतः भिन्नमेव भवति। कवयः स्व-स्वजगतः ब्रह्माणः भवन्ति। ते प्रजापतेः सम्पूर्णानि जगन्ति स्व-स्व-शैल्या स्वजगति समावेशयन्ति। ते न केवलं भूतं वर्तमानं किन्तु **भविष्यत्** अपि सम्यक् पश्यन्ति। अत एव सुष्ठु खलु उच्यते "कवयः क्रान्तदर्शिनः" इति।

◆◆◆

## सुभाषितम्

⇨ कवीनां मानसं नौमि तरन्ति प्रतिभाम्भसि।
यत्र हंसवयांसीव भुवनानि चतुर्दश॥

⇨ नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥

⇨ मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥

⇨ अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥

⇨ जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्॥

⇨ यानेव शब्दान् वयमालपामो यानेव शब्दान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति॥

## अभ्यासः — 34

1. **पाठानुसारेण रिक्तस्थानानि पूरयत—**
[ पाठ के आधार पर रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the lesson. ]

(i) अन्येभ्यः जन्मभ्यः __________ दुर्लभम् अस्ति।
(ii) विद्याध्ययनं कविकर्म चेति द्वे __________ भवतः।
(iii) ऋषिकवीनां __________ पवित्राणि भवन्ति।
(iv) महाकवयः काव्यानि विरचय्य __________ अलभन्त।
(v) कवीनां द्रवीभूतानि __________ काव्यरूपेण प्रवहन्ति।
(vi) कवयः स्व-स्वजगतः __________ भवन्ति।

2. **प्रथमायाः त्यक्त-रूपाणि लिखत—**
[ प्रथमा के त्यक्तरूपों को लिखें। Write the remaining forms of nominative declension. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| (i) | जन्म | | |
| (ii) | | | तपांसि |
| (iii) | | मनसी | |
| (iv) | | | वचांसि |
| (v) | प्रेम | | |

3. **अधोलिखितानां पदानां प्रातिपदिकं लिखत—**
[ अधोलिखित पदों के प्रातिपदिक लिखें। Write the base of the following words. ]

| | | प्रातिपदिकम् | | | प्रातिपदिकम् |
|---|---|---|---|---|---|
| (i) | तपः | | (ii) | प्रेम | |
| (iii) | जन्म | | (iv) | ब्रह्म | |
| (v) | यशः | | (vi) | चेतः | |
| (vii) | कर्म | | (viii) | जगत् | |
| (ix) | मनः | | (x) | वचः | |

अजन्त-हलन्त-शब्दानां प्रथमा विभक्तिः

# तस्मै पाणिनये नमः

**पाणिनिः** अस्माकं युगस्य **महान्** वैयाकरणः अस्ति। तस्य **अष्टाध्यायी** इति व्याकरणग्रन्थः विश्वप्रसिद्धः वर्तते। अस्य ग्रन्थस्य वैज्ञानिकतां दृष्ट्वा **विद्वांसः** पाणिनिं 'महासङ्गणकः' (Super Computer) इत्याख्यया विभूषयन्ति। क्रीस्तोः पूर्वं सप्तमशताब्द्यां पाणिनेः **जन्म** अभवत् इति ऐतिहासिकाः प्रमाणयन्ति। पाणिनेः **माता दाक्षी** आसीत्। अतः तस्य **नाम** दाक्षीपुत्रः इति अभवत्। "पणिनः" इति तस्य **पिता** आसीत्। अतः तस्य **नाम पाणिनिः** अभवत्। सः शलातुरग्राम**निवासी** आसीत्। अत एव तस्य 'शालातुरीयः' इति **नाम** अपि प्रसिद्धम् अस्ति। इत्थम् आहीकः, **शालङ्किः**, शालातुरीयः, दाक्षीपुत्रः इत्यादीनि पाणिनेः **नामानि** सन्ति। परन्तु एतेषु नामसु **पाणिनिः** इति **नाम** सुप्रसिद्धम् अभवत्। सम्प्रति काबुल-सिन्धु-नदीसङ्गमतः नातिदूरे अफगानिस्तान-देशे वर्तमानस्य लहुर-ग्रामस्य प्राचीनं नाम 'शलातुरः' आसीत् इति **विद्वांसः** विश्वसन्ति। शलातुरग्रामे चतस्रः शताब्दीः यावत् निरन्तरं पाणिनीय-व्याकरणस्य अध्ययनं प्रावर्तत इति प्रवादः वर्तते। शलातुर-ग्रामवासिनां मनसि पाणिनेः कृतिं प्रति **महती प्रीतिः महत्** च **प्रेम** वर्तते स्म। पाणिनेः काचित् शिलाप्रतिमा अद्यापि तत्र वर्तते इति ऐतिहासिकाः वदन्ति।

आचार्यः वर्षः पाणिनेः **गुरुः** आसीत्। पाणिनिविषये काचित् **किंवदन्ती** श्रूयते - बाल्यकाले **पाणिनिः** अतीव **मन्दबुद्धिः** आसीत्। मन्दबुद्धित्वात् सर्वे **सहपाठिनः** तं परिहसन्ति स्म। अध्ययनं नाम **महत् तपः** भवति। अध्ययने असफलः सः **दुःखी सन्** हिमालयं गतवान्। तत्र गत्वा च सः महत् तपः आचरितवान्। तेन प्रसन्नः **भगवान्** महेश्वरः तस्मै नूतनां काञ्चित् व्याकरणप्रक्रियां प्रदत्तवान्। एवं हि श्रूयते यत् ताण्डवनृत्यानन्तरं सनकादिसिद्धान् उद्धर्तुं शिवः स्व-ढक्कां चतुर्दशवारम् अवादयत्। ततः अ-इ-उ-ण्, ऋ-लृ-क् इत्यादीनि चतुर्दश प्रत्याहार-सूत्राणि निर्गतानि। तानि सूत्राणि महेश्वरप्रदत्तानि सन्ति अतः तानि 'माहेश्वरसूत्राणि' इति अभिहितानि भवन्ति।



पाणिनीय-व्याकरणं **सर्वातिशायि** वर्तते। इदं संक्षिप्तं सुव्यवस्थितं च अस्ति। किं बहुना ? पाणिनेः व्याकरणम् ऐन्द्रादीनि प्राचीनानि व्याकरणानि अतिशेते। विद्याभ्यासकाले पाणिनिं परि**हसन्तः सहपाठिनः सुहृदः** पाणिनेः वैशिष्ट्यम् अङ्गीकृतवन्तः। कात्यायनः पाणिनीयम् अष्टकम् अधिकृत्य वार्तिकग्रन्थम् अलिखत्। कात्यायनस्य अपरं नाम वररुचिः अस्ति। वार्तिकग्रन्थः वाक्यग्रन्थः अपि उच्यते। वस्तुतः कात्यायनस्य वार्तिकानि पाणिनीय-व्याकरणस्य पूरकाणि व्याख्यानरूपाणि च सन्ति।



**पाणिनिः**



**कात्यायनः**



**पतञ्जलिः**

ततः **पतञ्जलिः** अष्टाध्याय्याः वार्तिकानां च व्याख्यारूपं महाभाष्यं व्यरचयत्। एतस्य कालः क्रीस्तोः पूर्वं द्वितीयशताब्दी आसीत् इति **इतिहासविदः** प्रमाणयन्ति। वस्तुतः व्याकरणशिक्षणप्रसङ्गे अष्टाध्यायी-महाभाष्ययोः एतादृशं महत्त्वम् अवर्द्धत येन तयोः प्रशस्तौ काचन विशिष्टा **सूक्तिः** प्रसिद्धा अभवत्– 'अष्टाध्यायी-महाभाष्ये द्वे व्याकरणपुस्तके' इति।

**पाणिनिः** न केवलं **महान्** वैयाकरणः प्रत्युत **महान् कविः** अपि आसीत्। 'पातालविजयम्' इति तस्य **पद्यमयी काव्यकृतिः** वर्तते। पातालविजयस्य 'जाम्बवतीविजयम्' इति अपरमपि **नाम** अस्ति। यद्यपि अद्य इदं काव्यं न उपलभ्यते तथापि तस्मात् केचन श्लोकाः इतस्ततः उद्धृताः दृश्यन्ते। पञ्चतन्त्रस्य श्लोकः अस्मान् सूचयति यत् कश्चन सिंहः पाणिनिं व्यापादितवान्। तत्र उच्यते– "सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः।" यस्मिन् दिने सिंहः पाणिनिं व्यापादितवान् तदा त्रयोदशी **तिथिः** आसीत्। अत एव अद्यापि पारम्परिक-शिक्षानुष्ठानेषु त्रयोदश्यां तिथौ व्याकरणस्य पठन-पाठने न भवतः। वस्तुतः "पाणिनिसमो वैयाकरणः न भूतो न भविष्यति" इति यदि वदामः तर्हि न काऽपि **अतिशयोक्तिः** भविष्यति। यावत् लोके गङ्गा-गोदावर्यादयः **सरितः** प्रवहन्ति, यावत् विन्ध्यहिमवन्तौ महीभृतौ स्तः, यावत् च **दैवी वाक्** संस्कृतं जीवति तावत् **पाणिनिः** अमरतां भजति। येन पाणिनिना महेश्वरात् चतुर्दश-प्रत्याहारसूत्ररूपम् अक्षरसमाम्नायम् अधिगम्य कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।

◆◆◆

## अवधेयम्

1. अइउण् 2. ऋलृक् 3. एओङ् 4. ऐऔच् 5. हयवरट् 6. लण् 7. ञमङणनम् 8. झभञ् 9. घढधष् 10. जबगडदश् 11. खफछठथचटतव् 12. कपय् 13. शसषर् 14. हल् – इति चतुर्दश माहेश्वराणि सूत्राणि।

## सुभाषितम्

➪ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

➪ अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥

➪ पाणिनीयं शब्दशास्त्रं पदसाधुत्व-लक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥

➪ नृत्तावसाने नटराजराजो ननाद ढक्कां नव-पञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ॥

➪ सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः ।
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम् ॥
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम् ।
अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः ॥

➪ पाणिनिं सूत्रकारं च भाष्यकारं पतञ्जलिम् ।
वाक्यकारं वररुचिं प्रणतोऽस्मि मुनित्रयम् ॥

## अभ्यासः — 35

1. **पाठाधारेण रिक्तस्थानानि पूरयत—**

[ पाठ के आधार पर रिक्तस्थानों की पूर्ति करें। Fill in the blanks on the basis of the present lesson. ]

(i) पाणिनिः वैयाकरणः अस्ति ।

(ii) पाणिनेः दाक्षी आसीत् ।

(iii) पाणिनेः पणिनः आसीत् ।

(iv) पाणिनेः वर्षः आसीत् ।

(v) पाणिनेः कात्यायनः आसीत् ।

2. **अधोलिखितानां प्रश्नानाम् उत्तरं लिखत—**

[ अधोलिखित प्रश्नों के उत्तर लिखें। Answer the following questions. ]

(i) दाक्षीपुत्रः कः आसीत् ?

।

(ii) पाणिनेः समयः कदा आसीत् ?

...................................................................................... ।

(iii) शलातुरः कुत्र अस्ति ?

।

(iv) पाणिनिः तपः आचरितुं कुत्र गतवान् ?

।

(v) महाभाष्यस्य रचयिता कः आसीत् ?

।

(vi) पतञ्जलेः कालः कः अस्ति ?

।

(vii) पाणिनेः व्याकरणग्रन्थस्य नाम किम् ?

।

3. **अधोलिखितानां पदानां प्रातिपदिकं लिखत—**

[अधोलिखित पदों के प्रातिपदिक लिखें। Write the crude forms of the following words.]

| | | प्रातिपदिकम् | | | प्रातिपदिकम् |
|---|---|---|---|---|---|
| (i) | महान् | । | (ii) | सहपाठी | । |
| (iii) | माता | । | (iv) | तिथिः | । |
| (v) | निवासी | ............................ । | (vi) | वाक् | । |
| (vii) | तपः | । | (viii) | गुरुः | ............................ । |
| (ix) | भगवान् | ............................ । | (x) | प्रेम | ............................ । |

4. **अधोलिखितानां पदानां बहुवचनरूपाणि लिखत—**

[अधोलिखित पदों के बहुवचन रूप लिखें। Write the plural forms of the following words.]

| | एक. | बहु. | | एक. | बहु. |
|---|---|---|---|---|---|
| (i) | माता | । | (ii) | भगवान् | । |
| (iii) | पिता | ............................ । | (iv) | प्रेम | । |
| (v) | महान् | । | (vi) | प्रीतिः | । |
| (vii) | नाम | । | (viii) | सुहृद् | । |
| (ix) | विद्वान् | । | (x) | वाक् | । |
| (xi) | गुरुः | । | (xii) | सरित् | । |
| (xiii) | सहपाठी | । | (xiv) | सूक्तिः | । |
| (xv) | तपः | ............................ । | (xvi) | योद्धा | । |
| (xvii) | गौः | । | (xviii) | राजा | । |
| (xix) | वधूः | । | (xx) | कर्म | । |

**5. अधोलिखितानां प्रथमान्तपदानां लिङ्गं वचनम् अन्तिमवर्णं च निर्दिशत–**

[ अधोलिखित प्रथमान्त पदों के लिङ्ग, वचन एवं अन्तिमवर्ण का निर्देश करें। Point out the gender, number and the ending letter of the following words of nominative case. ]

| | पदानि | लिङ्गम् | वचनम् | अन्त्यनिर्देशः |
|---|---|---|---|---|
| (i) | पाणिनिः | पुंलिङ्गम् | एकवचनम् | इकारान्तः |
| (ii) | विद्वांसः | | | |
| (iii) | जन्म | | | |
| (iv) | माता | | | |
| (v) | प्रीतिः | | | |
| (vi) | महत् | | | |
| (vii) | प्रेम | | | |
| (viii) | गुरुः | | | |
| (ix) | दुःखी | | | |
| (x) | कृतिः | | | |
| (xi) | भगवान् | | | |
| (xii) | इतिहासविदः | | | |
| (xiii) | महान् | | | |
| (xiv) | कविः | | | |
| (xv) | सहपाठिनः | | | |
| (xvi) | उक्तिः | | | |
| (xvii) | सरितः | | | |
| (xviii) | शताब्दी | | | |
| (xix) | सूत्राणि | | | |
| (xx) | तपः | | | |

सुभाषितेषु प्रथमाप्रयोगाः

# सुभाषितानि

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव॥

माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा॥

जनिता चोपनेता च यश्च विद्यां प्रयच्छति।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः॥

राजपत्नी गुरोः पत्नी मित्रपत्नी तथैव च।
पत्नीमाता स्वमाता च पञ्चैताः मातरः स्मृताः॥

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम्।
कीर्तिं च दिक्षु वितनोति तनोति लक्ष्मीं
किं किं न साधयति कल्पलतेव विद्या॥

न तातो न माता न बन्धुर्न दाता,
न पुत्रो न पुत्री न भृत्यो न भर्ता।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि!

यत्र राजा स्वयं चौरः सामात्यः सपुरोहितः ।
तत्राहं किं करिष्यामि यथा राजा तथा प्रजाः ॥

नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी ।
गुणी च गुणरागी च विरलः सरलो जनः ॥

गर्जति शरदि न वर्षति, वर्षति वर्षासु निस्स्वनो मेघः ।
नीचो वदति न कुरुते, न वदति सुजनः करोत्येव ॥

धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गमाः ॥

काकचेष्टो बकध्यानः श्वाननिद्रस्तथैव च ।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः ॥

◆◆◆

कथायां प्रथमाप्रयोगाः

## पञ्चतन्त्रस्य कथामुखम्



दाक्षिणात्ये जनपदे महिलारोप्यं नाम एकं नगरम् आसीत्। तत्र अमरशक्तिः नाम राजा अभवत्। तस्य बहुशक्तिः उग्रशक्तिः अनन्तशक्तिः च इति त्रयः पुत्राः आसन्। ते परम-दुर्मेधसः शास्त्रविमुखाः च आसन्। तान् पुत्रान् शास्त्रविमुखान् अवलोक्य राजा चिन्तितः अभवत्। एकदा सः सचिवान् आहूय उक्तवान्– "भवन्तः जानन्ति यत् मम पुत्राः शास्त्रविमुखाः अविवेकिनः च सन्ति। एतान् अवलोक्य महद् दुःखं जायते। यथा एतेषां बोधः भवति तथा कश्चन उपायः करणीयः"। तत्र एकः मन्त्री अवदत्– "एते बालकाः व्याकरणम् अधीत्य अन्यानि शास्त्राणि पठन्तु। ततः परं प्रबुद्धाः भविष्यन्ति"। तेषां मन्त्रिणां मध्ये एकः सुमतिः नाम मन्त्री आसीत्। स उक्तवान् यत् "एतेषां प्रबोधनार्थं किमपि संक्षिप्तं शास्त्रम् आवश्यकम्। तदर्थं विष्णुशर्मा नाम लब्धकीर्तिः समर्थः च कश्चन ब्राह्मणः अस्ति। तस्मै एतान् समर्पयतु। स नूनम् एतान् शीघ्रं प्रबुद्धान् करिष्यति"। एतद् आकर्ण्य भूपतिः विष्णुशर्माणम् आहूय अकथयत्– "भगवन्! मम अनुग्रहार्थं भवान् एतान् मम पुत्रान् कृपया शास्त्रनिपुणान् करोतु। अहं भवतां तोषाय ग्रामशतं दास्यामि"। तत् श्रुत्वा विष्णुशर्मा राजानम् उक्तवान्– "देव! अहम् अर्थलिप्सुः नास्मि। अतः विद्याविक्रयणं न करोमि। किन्तु भवतः प्रार्थनया षण्मासाभ्यन्तरे भवतः एतान् पुत्रान् अवश्यं नीतिशास्त्रे विचक्षणान् करिष्यामि"। राजा तस्य प्रतिज्ञां श्रुत्वा विस्मयान्वितः प्रमुदितः च जातः। तान् कुमारान् तस्मै सादरं समर्प्य सः नृपतिः परां निर्वृतिं प्राप्तवान्। विष्णुशर्मा महाराजस्य पुत्रान् आदाय ततः प्रस्थितवान्। अपि च मित्रप्राप्ति-मित्रभेद-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि इति पञ्च तन्त्राणि रचयित्वा तान् पाठितवान्। ते राजपुत्राः अपि मासषट्केन एव शास्त्रनिपुणाः सञ्जाताः। ततः आरभ्य एतत् पञ्चतन्त्रं नाम नीतिशास्त्रं सुकुमारमतीनां बालानां कृते भूतले प्रथितम् अभवत्।

◆◆◆

# द्वितीयः स्तबकः

## 2.1 प्रथमः पाठः

### [ द्वितीया विभक्तिः ]

**अजन्तशब्दानां द्वितीयाप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



भक्तः **ऋषिं** प्रणमति।



बालः **ऋषी** पृच्छति।



महाराजः **ऋषीन्** नमति।



छात्रः **कपिं** पश्यति।



नटः **कपी** नर्तयति।



कृषकः **कपीन्** अपसारयति।



माता **शिशुं** लालयति।



पिता **शिशू** आटयति।



पितामही **शिशून्** बोधयति।



सहाध्यायी **वटुम्** आह्वयति ।



गृहिणी **वटू** भोजयति ।



आचार्यः **वटून्** पाठयति ।



माता **विक्रेतारं** शाकमूल्यं पृच्छति ।



शालिनी **विक्रेतारौ** आह्वयति ।



वित्तमन्त्री **विक्रेतॄन्** उद्बोधयति ।



दर्शकाः **अभिनेतारं** पश्यन्ति ।



प्रशंसकः **अभिनेतारौ** अभिवादयति ।



अध्यक्षः **अभिनेतॄन्** सम्मानयति ।

स्त्री.



मूर्तिकारः **मूर्तिं** निर्माति ।



नागरिकः **मूर्ती** नयति ।



अर्चकः **मूर्तीः** पूजयति ।


छात्रः **लेखनीं** स्थापयति ।


शिक्षकः **लेखन्यौ** ददाति ।


आपणिकः **लेखनीः** दर्शयति ।


गृहिणी **सम्मार्जनीं** क्रीणाति ।


कर्मकरः **सम्मार्जन्यौ** नयति ।


विक्रेता **सम्मार्जनीः** बध्नाति ।


गोपालः **धेनुं** दोग्धि ।


कृषकः **धेनू** नयति ।


कृष्णः **धेनूः** चारयति ।


स्नुषा **श्वश्रूं** सेवते ।


वधूः **श्वश्र्वौ** उपवेशयति ।


सीता **श्वश्रूः** प्रणमति ।



माता शिशोः **तनुं** प्रक्षालयति ।



सीता कुशलवयोः **तनू** अभ्यञ्जयति ।



वैद्यः शिशूनां **तनूः** निरीक्षते ।



शिशुः **मातरम्** अनुगच्छति ।



युधिष्ठिरः **मातरौ** नमति ।



रामः **मातॄः** नमति ।

**नपुं.**



अर्जुनः मत्स्यस्य **अक्षि** पश्यति ।



माता शिशुम् **अक्षिणी** दर्शयति ।



हनुमान् रावणस्य **अक्षीणि** पश्यति ।



कपिः **जानु** कण्डूयते ।



मल्लः **जानुनी** मर्दयति ।



क्रीडकाः वस्त्रावरणेन **जानूनि** रक्षन्ति ।

**अजन्तशब्दानां द्वितीयाप्रयोगाः**

📖 **अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**

| | | |
|---|---|---|
| छात्राः **कपिं** पश्यन्ति। | छात्राः **कपी** पश्यन्ति। | छात्राः **कपीन्** पश्यन्ति। |
| भक्तः **यतिं** वन्दते। | भक्तः **यती** वन्दते। | भक्तः **यतीन्** वन्दते। |
| जनाः **गिरिम्** अवलोकन्ते। | जनाः **गिरी** अवलोकन्ते। | जनाः **गिरीन्** अवलोकन्ते। |
| शिष्यः **गुरुं** नमति। | शिष्यः **गुरू** नमति। | शिष्यः **गुरून्** नमति। |
| माता **शिशुं** लालयति। | माता **शिशू** लालयति। | माता **शिशून्** लालयति। |
| अहं **बन्धुम्** आह्वयामि। | अहं **बन्धू** आह्वयामि। | अहं **बन्धून्** आह्वयामि। |
| वयं **कार्यकर्तारं** सूचयामः। | वयं **कार्यकर्तारौ** सूचयामः। | वयं **कार्यकर्तॄन्** सूचयामः। |
| संयोजकः **वक्तारम्** उपवेशयति। | संयोजकः **वक्तारौ** उपवेशयति। | संयोजकः **वक्तॄन्** उपवेशयति। |
| सर्वे **अभिनेतारं** सम्मानयन्ति। | सर्वे **अभिनेतारौ** सम्मानयन्ति। | सर्वे **अभिनेतॄन्** सम्मानयन्ति। |

**स्त्री.**

| | | |
|---|---|---|
| सा **कलाकृतिं** पश्यति। | सा **कलाकृती** पश्यति। | सा **कलाकृतीः** पश्यति। |
| सः **धेनुं** प्रेषयति। | सः **धेनू** प्रेषयति। | सः **धेनूः** प्रेषयति। |
| माता **दुहितरम्** आह्वयति। | माता **दुहितरौ** आह्वयति। | माता **दुहितॄः** आह्वयति। |
| जनाः **वधूं** पश्यन्ति। | जनाः **वध्वौ** पश्यन्ति। | जनाः **वधूः** पश्यन्ति। |

**नपुं.**

| | | |
|---|---|---|
| सः **अक्षि** स्पृशति। | सः **अक्षिणी** स्पृशति। | ते **अक्षीणि** स्पृशन्ति। |
| सः **सक्थि** पश्यति। | सः **सक्थिनी** पश्यति। | ते **सक्थीनि** पश्यन्ति। |
| सः **जानु** स्पृशति। | सः **जानुनी** स्पृशति। | ते **जानूनि** स्पृशन्ति। |

## अजन्तशब्दानां द्वितीयारूपाणि

**रूपाणि स्मरत—**

[ रूपों का स्मरण करें। Remember the declension. ]

**पुं.**

| | | | |
|---|---|---|---|
| इकारान्तः (कपि) | कपिम् | कपी | कपीन् |
| उकारान्तः (गुरु) | गुरुम् | गुरू | गुरून् |
| ऋकारान्तः (कर्तृ) | कर्तारम् | कर्तारौ | कर्तॄन् |
| ऋकारान्तः (पितृ) | पितरम् | पितरौ | पितॄन् |
| ओकारान्तः (गो) | गाम् | गावौ | गाः |

**स्त्री.**

| | | | |
|---|---|---|---|
| इकारान्तः (मति) | मतिम् | मती | मतीः |
| ईकारान्तः (नदी) | नदीम् | नद्यौ | नदीः |
| उकारान्तः (तनु) | तनुम् | तनू | तनूः |
| ऊकारान्तः (वधू) | वधूम् | वध्वौ | वधूः |
| ऋकारान्तः (स्वसृ) | स्वसारम् | स्वसारौ | स्वसॄः |
| ऋकारान्तः (मातृ) | मातरम् | मातरौ | मातॄः |

**नपुं.**

| | | | |
|---|---|---|---|
| इकारान्तः (वारि) | वारि | वारिणी | वारीणि |
| इकारान्तः (दधि) | दधि | दधिनी | दधीनि |
| उकारान्तः (मधु) | मधु | मधुनी | मधूनि |

## अभ्यासः — 36

✍ **प्रथमाबहुवचनान्तं द्वितीयाबहुवचनान्तं च रूपं लिखत—**

[ प्रथमा-बहुवचनान्त और द्वितीया-बहुवचनान्त रूप लिखें। Write the plural forms of nominative and accusative. ]

| | | | प्र. बहु. | द्विती. बहु. |
|---|---|---|---|---|
| उदा. | मुनिः | (पुं.) | मुनयः | मुनीन् |
| | गुरुः | (पुं.) | गुरवः | गुरून् |
| 1. | रविः | (पुं.) | | |
| 2. | कविः | (पुं.) | | |
| 3. | शिशुः | (पुं.) | | |
| 4. | धाता | (पुं.) | | |
| 5. | भ्राता | (पुं.) | | |
| 6. | मतिः | (स्त्री.) | | |
| 7. | श्रुतिः | (स्त्री.) | | |
| 8. | मूर्तिः | (स्त्री.) | | |
| 9. | कृतिः | (स्त्री.) | | |
| 10. | छदिः | (स्त्री.) | | |
| 11. | नीतिः | (स्त्री.) | | |
| 12. | भक्तिः | (स्त्री.) | | |
| 13. | रज्जुः | (स्त्री.) | | |
| 14. | हनुः | (स्त्री.) | | |
| 15. | धेनुः | (स्त्री.) | | |
| 16. | चञ्चुः | (स्त्री.) | | |
| 17. | श्वश्रूः | (स्त्री.) | | |
| 18. | भ्रूः | (स्त्री.) | | |
| 19. | माता | (स्त्री.) | | |
| 20. | स्वसा | (स्त्री.) | | |
| 21. | वारि | (नपुं.) | | |
| 22. | अस्थि | (नपुं.) | | |
| 23. | मधु | (नपुं.) | | |
| 24. | जानु | (नपुं.) | | |
| 25. | अश्रु | (नपुं.) | | |

**हलन्तशब्दानां द्वितीयाप्रयोगाः**

## अधोलिखितानि वाक्यानि पठत–

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



कृष्णः **सुहृदं** सुदामानम् आलिङ्गति।



गोपाः कृष्णबलरामौ **सुहृदौ** नमन्ति।



रामः **सुहृदः** वानरान् बोधयति।



ग्रामीणः **मन्त्रिणं** वदति।



सभाध्यक्षः **मन्त्रिणौ** सम्मानयति।



प्रधानमन्त्री **मन्त्रिणः** सम्बोधयति।



दूतः **राजानं** सूचयति।



महाराजः **राजानौ** सन्धिप्रस्तावं लेखयति।



जनकः सीतायाः स्वयंवरे **राज्ञः** अभिनन्दति।

स्त्री.



ऋषिः पवित्रां **सरितम्** अवगाहते ।



भक्तः गङ्गायमुने **सरितौ** अर्चति ।



**सरितः** उभयतः आश्रमाः भवन्ति ।



इन्द्रः **अप्सरसं** प्रेषयति ।



इन्द्रः **अप्सरसौ** अभिनन्दति ।



इन्द्रः **अप्सरसः** पश्यति ।

नपुं.



सैनिकः **वर्म** धारयति ।



सैनिकौ **वर्मणी** धारयतः ।



सैनिकाः **वर्माणि** धारयन्ति ।



मल्लः **वपुः** दर्शयति ।



मल्लौ **वपुषी** दर्शयतः ।



मल्लाः **वपूंषि** दर्शयन्ति ।

## हलन्तशब्दानां द्वितीयाप्रयोगाः

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

### पुं.

शिक्षकः **बुद्धिमन्तं** छात्रम् इच्छति। शिक्षकः **बुद्धिमन्तौ** छात्रौ इच्छति। शिक्षकः **बुद्धिमतः** छात्रान् इच्छति।

त्वं **महान्तं** जनम् अनुसर। त्वं **महान्तौ** जनौ अनुसर। त्वं **महतः** जनान् अनुसर।

जनाः **मन्त्रिणं** वदन्ति। जनाः **मन्त्रिणौ** वदन्ति। जनाः **मन्त्रिणः** वदन्ति।

सभासदः **राजानं** पश्यन्ति। सभासदः **राजानौ** पश्यन्ति। सभासदः **राज्ञः** पश्यन्ति।

### स्त्री.

जनाः **सरितं** तरन्ति। जनाः **सरितौ** तरन्ति। जनाः **सरितः** तरन्ति।

### नपुं.

सः **बृहत्** मन्दिरं निर्माति। सः **बृहती** मन्दिरे निर्माति। सः **बृहन्ति** मन्दिराणि निर्माति।

भवान् **नाम** उच्चारयतु। भवान् **नामनी** उच्चारयतु। भवान् **नामानि** उच्चारयतु।

## हलन्तशब्दानां द्वितीयारूपाणि

### अधोनिर्दिष्टानि रूपाणि स्मरत—

[ अधोलिखित रूपों का स्मरण करें। Remember the following declension. ]

**पुं.**

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| जकारान्त | (वणिज्) | वणिजम् | वणिजौ | वणिजः |
| तकारान्तः | (मरुत्) | मरुतम् | मरुतौ | मरुतः |
| तकारान्तः | (पचत्) | पचन्तम् | पचन्तौ | पचतः |
| तकारान्तः | (धीमत्) | धीमन्तम् | धीमन्तौ | धीमतः |
| तकारान्तः | (महत्) | महान्तम् | महान्तौ | महतः |
| नकारान्तः | (मन्त्रिन्) | मन्त्रिणम् | मन्त्रिणौ | मन्त्रिणः |
| नकारान्तः | (आत्मन्) | आत्मानम् | आत्मानौ | आत्मनः |
| नकारान्तः | (राजन्) | राजानम् | राजानौ | राज्ञः |

**स्त्री.**

| | | | | |
|---|---|---|---|---|
| तकारान्तः | (सरित्) | सरितम् | सरितौ | सरितः |
| धकारान्तः | (क्षुध्) | क्षुधम् | क्षुधौ | क्षुधः |
| षकारान्तः | (प्रावृष्) | प्रावृषम् | प्रावृषौ | प्रावृषः |
| षकारान्तः | (आशिष्) | आशिषम् | आशिषौ | आशिषः |

**नपुं.**

| | | | | |
|---|---|---|---|---|
| तकारान्तः | (बृहत्) | बृहत् | बृहती | बृहन्ति |
| नकारान्तः | (नामन्) | नाम | नामनी | नामानि |
| षकारान्तः | (वपुष्) | वपुः | वपुषी | वपूंषि |
| सकारान्तः | (मनस्) | मनः | मनसी | मनांसि |

## अभ्यासः — 37

✍ **हलन्तशब्दानां द्वितीयान्तानि रूपाणि लिखत—**

[ निम्नलिखित हलन्त शब्दों का द्वितीयान्त रूप लिखें। Write the accusative declension of the words ending in consonant. ]

| | | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| 1. | वणिज् | (पुं०) | | | |
| 2. | गोमत् | (पुं०) | | | |
| 3. | भवत् | (पुं०) | | | |
| 4. | धीमत् | (पुं०) | | | |
| 5. | महत् | (पुं०) | | | |
| 6. | मरुत् | (पुं०) | | | |
| 7. | आत्मन् | (पुं०) | | | |
| 8. | गुणिन् | (पुं०) | | | |
| 9. | ज्ञानिन् | (पुं०) | | | |
| 10. | मन्त्रिन् | (पुं०) | | | |
| 11. | विद्वस् | (पुं०) | | | |
| 12. | पुंस् | (पुं०) | | | |
| 13. | वेधस् | (पुं०) | | | |
| 14. | बृहत् | (नपुं०) | | | |
| 15. | नामन् | (नपुं०) | | | |
| 16. | धनुष् | (नपुं०) | | | |
| 17. | वपुष् | (नपुं०) | | | |
| 18. | चक्षुष् | (नपुं०) | | | |
| 19. | हविष् | (नपुं०) | | | |
| 20. | मनस् | (नपुं०) | | | |

## अभ्यासः — 38

✍ **स्थूलाक्षरैः लिखितानां शब्दानां वचनानुसारं द्वितीयान्त-रूपाणि लिखित्वा वाक्यानि पूरयत—**

[ स्थूलाक्षर में लिखित शब्दों के वचनानुसार द्वितीयान्त रूप लिखकर वाक्यों की पूर्ति करें। Complete the sentences with the accusative forms according to the number used in the bold words. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | | **(कविः)** | **(रविः)** | **(हरिः)** | | |
| | | ↓ | ↓ | ↓ | | |
| | अहं | कविं | रविं | हरिं | च आह्वयामि। | |
| | | **(यतिः)** | **(ऋषिः)** | **(मुनिः)** | | |
| | | ↓ | ↓ | ↓ | | |
| 1. | अहं | | | | च वन्दे। | |
| | | **(गुरुः)** | **(भानुः)** | **(बन्धुः)** | | |
| | | ↓ | ↓ | ↓ | | |
| 2. | ते | | | | च नमन्ति। | |
| | | **(कलाकृतिः)** | **(मूर्तिः)** | **(धेनुः)** | | |
| | | ↓ | ↓ | ↓ | | |
| 3. | त्वं | | | | च पश्यसि। | |
| | | **(श्वश्रूः)** | **(माता)** | **(भ्रातरः)** | | |
| | | ↓ | ↓ | ↓ | ↓ | |
| 4. | भवान् | | | | च आह्वयतु। | |
| | | **(मुनिः)** | **(माता)** | **(पिता)** | **(धेनवः)** | |
| | | ↓ | ↓ | ↓ | ↓ | |
| 5. | वयं | | | | | च प्रणमामः। |
| | | **(वारि)** | **(मधु)** | **(रज्जुः)** | | |
| | | ↓ | ↓ | ↓ | | |
| 6. | यूयं | | | | च आनयत। | |

| | | | | | |
|---|---|---|---|---|---|
| | | **(यतिः)** | **(मूर्तयः)** | **(बन्धवः)** | |
| | | ↓ | ↓ | ↓ | |
| 7. | वयं | | | | च पश्यामः। |
| | | **(कलाकृतयः)** | **(मूर्तयः)** | **(रज्जुः)** | |
| | | ↓ | ↓ | ↓ | |
| 8. | ते | | | | च क्रीणन्ति। |
| | | **(गुरवः)** | **(बन्धवः)** | **(भ्रातरः)** | |
| | | ↓ | ↓ | ↓ | |
| 9. | वयं | | | | च अवलोकयामः। |
| | | **(माता)** | **(भ्रातरः)** | **(स्वसारः)** | |
| | | ↓ | ↓ | ↓ | |
| 10. | अहं | | | | च पोषयामि। |
| | | **(धीमान्)** | **(बुद्धिमान्)** | **(शक्तिमान्)** | |
| | | ↓ | ↓ | ↓ | |
| 11. | भवन्तः | | | | च सत्कुर्वन्तु। |
| | | **(वणिक्)** | **(ऋत्विक्)** | **(भिषक्)** | |
| | | ↓ | ↓ | ↓ | |
| 12. | अहं | | | | च सत्करोमि। |
| | | **(अधिकारिणः)** | **(विज्ञानिनः)** | **(योगिनौ)** | |
| | | ↓ | ↓ | ↓ | |
| 13. | भवन्तः | | | | च सत्कुर्वन्तु। |
| | | **(विद्यार्थी)** | **(सुहृद्)** | | |
| | | ↓ | ↓ | | |
| 14. | भवन्तः | | | च प्रेषयन्ति। | |
| | | **(धनवन्तः)** | **(बुद्धिमन्तः)** | **(शक्तिमन्तः)** | |
| | | ↓ | ↓ | ↓ | |
| 15. | भवन्तः | | | | च सम्मानयन्तु। |

## अभ्यासः — 39

✍ **उदाहरणानुसारं वाक्यानि लिखत—**

[ उदाहरण के अनुसार वाक्य लिखें। Write the sentences as shown in the example. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| **उदा.** | गुरुः | तत्र | **गुरवः** | सन्ति। | **गुरून्** | आह्वयतु। |
| 1. | अधिकारी | तत्र | | सन्ति। | | प्रेषयतु। |
| 2. | कार्यकर्ता | तत्र | | सन्ति। | | आह्वयतु। |
| 3. | कविः | तत्र | | सन्ति। | | पश्यतु। |
| 4. | भिषक् | तत्र | | सन्ति। | | वदतु। |
| 5. | धीमान् | तत्र | | सन्ति। | | पृच्छतु। |
| 6. | मन्त्री | तत्र | | सन्ति। | | निवेदयतु। |
| 7. | वणिक् | तत्र | | सन्ति। | | आह्वयतु। |
| 8. | भ्राता | तत्र | | सन्ति। | | कथयतु। |
| 9. | स्वसा | तत्र | | सन्ति। | | आह्वयतु। |
| 10. | बन्धुः | तत्र | | सन्ति। | | नयतु। |
| 11. | योगी | तत्र | | सन्ति। | | प्रणमतु। |
| 12. | दुहिता | तत्र | | सन्ति। | | आह्वयतु। |
| 13. | वधूः | तत्र | | सन्ति। | | आह्वयतु। |
| 14. | वक्ता | तत्र | | सन्ति। | | वदतु। |
| 15. | अभिनेता | तत्र | | सन्ति। | | पश्यतु। |
| 16. | सुहृद् | तत्र | | सन्ति। | | आनयतु। |
| 17. | शिशुः | तत्र | | सन्ति। | | नयतु। |
| 18. | ऋत्विक् | तत्र | | सन्ति। | | पूजयतु। |
| 19. | बुद्धिमान् | तत्र | | सन्ति। | | पृच्छतु। |
| 20. | विद्यार्थी | तत्र | | सन्ति। | | पाठयतु। |

## उभयतः, परितः, धिक्, विना, अधितिष्ठति इत्यादीनां प्रयोगे द्वितीया

**एतानि वाक्यानि पठत—**

[ इन वाक्यों को पढ़ें। Read these sentences. ]

**विद्यालयम् उभयतः** वृक्षाः सन्ति।

**नगरीं परितः** वाटिकाः सन्ति।

**ईश्वरनिन्दकान् धिक्**।

**संस्कृतं विना** भारतीयसंस्कृतेः ज्ञानं न भवति।

राजा **नगरम् अधितिष्ठति**।

**रामेश्वरं परितः** सागरः अस्ति।

**कृष्णम् उभयतः** गोपाः सन्ति।

**संसद्भवनं परितः** राजमार्गाः सन्ति।

**नेतारं विना** राष्ट्रं समृद्धं न भवति।

छात्रः **गुरुं विना** वेदान् न पठति।

संस्कृतस्य **निन्दकं धिक्**।

**राष्ट्रपतिम् उभयतः** सैन्यानि भवन्ति।

**धनं विना** सुखं नास्ति।

**विज्ञानं विना** राष्ट्रस्य विकासः न सम्भवति।

वैज्ञानिकाः **प्रयोगशालाम् अधितिष्ठन्ति**।

**मातरं परितः** शिशवः क्रीडन्ति।

**गुरु-निन्दकं धिक्**।

**गुरुम् उभयतः** छात्राः पठन्ति।

अध्यक्षः **आसनम् अधितिष्ठति**।

सर्वः **मण्डपम् अधितिष्ठति**।

### अवधेयम्

⇨ उभयतः, सर्वतः, अभितः, परितः, समया, निकषा, हा, प्रति, धिक्, विना उपर्युपरि, अधोऽधः, अध्यधि इत्येतेषां योगे द्वितीया विभक्तिः भवति।

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥

⇨ अधिपूर्वकस्य 'स्था'-धातोः प्रयोगे द्वितीया विभक्तिः भवति।
**यथा** नगरम् अधितिष्ठति।

## अभ्यासः — 40

I.

| | | |
|---|---|---|
| नदी | | वृक्षाः |
| मन्दिरम् | | उद्यानानि |
| नगरम् | | वाप्यौ |
| सज्जनः | | दुर्जनाः |
| पूजकः | | भक्ताः |
| कृष्णः | **उभयतः** | गोपाः |
| गौः | | वत्साः |
| भूमिः | | लोकाः |
| नदी | | तटे |
| गुरुः | | छात्राः |
| गृहम् | | वृक्षौ |

II.

| | | |
|---|---|---|
| दीपः | | कीटाः |
| रामेश्वरम् | | सागरः |
| क्षेत्रम् | | जलम् |
| अहम् | | मित्राणि |
| देशः | | सैनिकाः |
| कथावाचकः | **परितः** | भक्ताः |
| वधूः | | स्त्रियः |
| धेनुः | | घासाः |
| द्रौपदी | | शाटिका |
| माता | | पुत्राः |
| विद्यालयः | | प्राचीराणि |

✍ **उपरि दत्तयोः मञ्जूषयोः आधारेण यथोदाहरणं वाक्यानि लिखत—**

[ ऊपर दी गई मञ्जूषाओं के आधार पर उदाहरण के अनुसार वाक्य लिखें। Write the sentneces on the basis of the boxes given above as shown in the example. ]

| | I. | | II. |
|---|---|---|---|
| उदा. | **नदीम् उभयतः** वृक्षाः सन्ति । | उदा. | **दीपं परितः** कीटाः सन्ति । |
| 1. | । | 1. | । |
| 2. | । | 2. | । |
| 3. | । | 3. | । |
| 4. | । | 4. | । |
| 5. | । | 5. | । |
| 6. | । | 6. | । |
| 7. | । | 7. | । |
| 8. | । | 8. | । |
| 9. | । | 9. | । |
| 10. | । | 10. | । |

## अभ्यासः — 41

**कोष्ठके दत्तस्य पदस्य साहाय्येन उत्तराणि लिखत–**

[ कोष्ठक में प्रदत्त पद की सहायता से उत्तर लिखें। Write the answers with the help of the words given in the brackets. ]

उदा. **किं विना** मीनः न जीवति ? (जलम्)

**जलं विना** मीनः न जीवति।

1. किं विना प्राणी न जीवति ? (वायुः)

   ।

2. किं विना मुक्तिः नास्ति। (ज्ञानम्)

   ।

3. किं विना गृहम् अपूर्णम् अस्ति। (गृहिणी)

   ।

4. किं विना पाठः कण्ठस्थः न भवति ? (अभ्यासः)

   ।

5. किं विना भाषायाः शुद्धं ज्ञानं न भवति ? (व्याकरणम्)

   ।

6. किं विना जीवनं व्यर्थम् अस्ति ? (विद्या)

   ।

7. किं विना सभा न शोभते ? (वृद्धः)

   ।

8. किं विना प्रीतिः न भवति ? (सद्व्यवहारः)

   ।

9. किं विना सफलता नास्ति ? (श्रमः)

   ।

10. किं विना सुखं नास्ति। (शान्तिः)

    ।

## अभ्यासः — 42

✍ **प्रथमवाक्यस्य आधारेण 'धिक्' शब्दयुक्तं द्वितीयं वाक्यं लिखत–**

[ प्रथम वाक्य के आधार पर 'धिक्' शब्द युक्त द्वितीय वाक्य लिखें। Write sentences with the use of *'dhik'* on the basis of the first sentence. ]

उदा. ये राजनीतिज्ञाः सेवां न कुर्वन्ति।

तान् **राजनीतिज्ञान् धिक्** ।

1. ये आरक्षकाः चोरं न गृह्णन्ति।

तान् ।

2. ये ब्राह्मणाः वेदान् न पठन्ति।

तान् ।

3. ये पुत्राः सेवया पितरौ न प्रीणयन्ति।

तान् ।

4. ये वैद्याः रोगिणाम् उपचारं न कुर्वन्ति।

तान् ।

5. यः कर्मचारी कर्म न करोति।

तम् ।

6. कक्षायां ये अध्येतारः न पठन्ति।

तान् ।

7. यः विद्यार्थी ब्रह्मचर्यं न पालयति।

तम् ।

8. याः भार्याः भर्तारम् न सेवन्ते।

ताः ।

9. या माता शिशुं न पाययति।

ताम् ।

## अभ्यासः — 43

✍ **'तिष्ठति' इत्येतस्य स्थाने 'अधितिष्ठति' इत्येतत् क्रियापदम् उपयुज्य द्वितीयां विभक्तिं संयोज्य वाक्यानि लिखत–**

[ 'तिष्ठति' के स्थान पर 'अधितिष्ठति' क्रियापद लिखकर द्वितीया विभक्ति युक्त वाक्य लिखें। Replace the word *'tiṣṭhati'* with *'adhitiṣṭhati'* and write the sentences using accusative case. ]

| | |
|---|---|
| उदा. शिवः **हिमालये तिष्ठति**। | शिवः **हिमालयम् अधितिष्ठति** । |
| 1. विष्णुः **वैकुण्ठे तिष्ठति**। | 1. । |
| 2. राजा **सिंहासने तिष्ठति**। | 2. । |

| | | | |
|---|---|---|---|
| 3. | मम भगिनी **देहल्यां तिष्ठति**। | 3. | । |
| 4. | तस्याः पतिः **गेहे तिष्ठति**। | 4. | । |
| 5. | शकुन्तला **आश्रमे तिष्ठति**। | 5. | । |
| 6. | देवाः **स्वर्गे तिष्ठन्ति**। | 6. | । |
| 7. | ईश्वरः **हृदये तिष्ठति**। | 7. | । |
| 8. | सिंहः **अरण्ये तिष्ठति**। | 8. | । |
| 9. | ग्राहः **जले तिष्ठति**। | 9. | । |
| 10. | पक्षिणः **वृक्षे तिष्ठन्ति**। | 10. | ............ । |

## अभ्यासः — 44

**वाक्यानि संशोधयत—**

[ वाक्यों का संशोधन करें। Correct the sentences. ]

| | | | |
|---|---|---|---|
| **उदा.** | गृहस्य परितः उद्यानम् अस्ति। | | **गृहं** परितः उद्यानम् अस्ति । |
| 1. | ग्रामस्य उभयतः नद्यौ वहतः। | 1. | । |
| 2. | सभापतिः मंचे अधितिष्ठति। | 2. | । |
| 3. | भूमेः उभयतः जलम् अस्ति। | 3. | । |
| 4. | चौरस्य धिक्। | 4. | । |
| 5. | अनुशासनस्य विना विद्यालयः न चलति। | 5. | । |
| 6. | मार्गं उभयतः मित्राणि सन्ति। | 6. | । |
| 7. | सरोवरस्य परितः बकाः सन्ति। | 7. | । |
| 8. | भक्ष्यस्य परितः गृध्राः डयन्ते। | 8. | । |
| 9. | रमेशस्य अर्धं वाक्यं मूर्धे अधितिष्ठति। | 9. | । |
| 10. | वेदनिन्दकस्य धिक्। | 10. | । |

**द्विकर्मकाणि वाक्यानि**

**अधोनिर्दिष्टानि वाक्यानि पठत–**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

गोपः **गां पयः** दोग्धि।
वृद्धः **माणवकं पन्थानं** पृच्छति।
भिक्षुकः **श्रेष्ठिनं धनं** याचति।
बालकः **अन्धं ग्रामं** नयति।
साधुः **नागरिकान् हितं** वदति।
शिशुः **मातरं भोजनं** पृच्छति।
कविः **सहृदयान् कवितां** श्रावयति।
वाल्मीकिः **सीताम् आश्रमम्** अनयत्।
साधुः **महिलां भाग्यं** ब्रवीति।
गोपाः **कृष्णं वृन्दावनं** पृच्छन्ति।
कर्मचारिणः **श्रमिकान् कार्यं** कथयन्ति।
पिता **पुत्रं विद्यालयं** नयति।
अध्यापकाः **छात्रान् पाठं** पृच्छन्ति।
मुनिः **दुष्टान् विनयम्** अयाचत्।
दुहितरः **अजां पयः** अदुहन्।
गोपालः **गां ग्रामं** हरति।
भृत्यः **द्रव्यं विपणीं** वहति।
भक्ताः जगन्नाथस्य **रथं गुण्डिचा-मन्दिरं** कर्षन्ति।

**विवरणम्**

☞ एते प्रयोगाः द्विकर्मकाः सन्ति। एकं मुख्यं कर्म, अपरं च गौणं कर्म भवति। यथा– प्रथमोदाहरणे 'पयः' मुख्यं कर्म, 'गाम्' इति गौणं कर्म। एवम् एव द्वितीयोदाहरणे 'पन्थानं' मुख्यं कर्म, 'माणवकं' च गौणं कर्म वर्तते। तृतीयोदाहरणे 'धनं' मुख्यं कर्म 'श्रेष्ठिनम्' इति गौणं कर्म। एवम् एव अन्यत्रापि क्रियया यस्य साक्षात् संबन्धः तत् मुख्यं कर्म बोध्यम्।

☞ ये प्रयोग द्विकर्मक हैं। एक मुख्य कर्म और दूसरा गौण। जैसे प्रथम उदाहरण में 'पयः' मुख्यकर्म है और 'गाम्' गौण। इसी प्रकार द्वितीय उदाहरण में 'पन्थानं' मुख्य कर्म है और 'माणवकं' गोण कर्म। तृतीय उदाहरण में 'धनं' मुख्य कर्म है और 'श्रेष्ठिनम्' गौण कर्म। इसी तरह अन्यत्र भी जिसका क्रिया से साक्षात् संबन्ध है, उसे मुख्य कर्म समझना चाहिए।

☞ These are the uses having two objects (*karma*). One of them is main *karma* and the other is subordinate. For example in the first example '*Payaḥ*' is main *Karma* whereas the word *gām* is subordinate. Similarly in the second example panthānam is main *karma* and *māṇavakam* is subordinate. In the thrid example '*dhanam*' is main *karma* wheras *śreṣṭhinam* is subordinate one. The other cases may be also considered this way.

## अभ्यासः — 45

✍ **अधोनिर्दिष्टं वाक्यद्वयं योजयित्वा एकं वाक्यं लिखत—**

[ अधोनिर्दिष्ट दोनों वाक्यों को जोड़कर एक वाक्य लिखें। Make one sentence by joining the two sentences given below. ]

**उदा.** अध्यापकः **छात्रं** पृच्छति। अध्यापकः **प्रश्नं** पृच्छति।
अध्यापकः **छात्रं प्रश्नं** पृच्छति।

1. गोपः **गां** दोग्धि। गोपः **पयः** दोग्धि।

   ……………………………………………… ।

2. बालकः **गुरुम्** अपृच्छत्। बालकः **गृहकार्यम्** अपृच्छत्।

   ……………………………………………… ।

3. साधुः **बालकं** वदति। साधुः **धर्मं** वदति।

   ……………………………………………… ।

4. वृद्धः **जनान्** कथयति। वृद्धः **कथां** कथयति।

   ……………………………………………… ।

5. याचकः **धनिकं** याचति। याचकः **धनं** याचति।

   ……………………………………………… ।

6. यात्रापत्रनिरीक्षकः **यात्रिणः** पृच्छति। यात्रापत्रनिरीक्षकः **यात्रापत्रं** पृच्छति।

   ……………………………………………… ।

7. गुरुः **छात्रं** बोधयति। गुरुः **पाठं** बोधयति।

   ……………………………………………… ।

8. रमेशः **मित्रं** कथयति। रमेशः **यात्रावृत्तान्तं** कथयति।

   ……………………………………………… ।

9. गोपालः **अविनीतं** याचति। गोपालः **विनयं** याचति।

   ……………………………………………… ।

10. वाल्मीकिः **लवकुशौ** अकथयत्। वाल्मीकिः **रामायणम्** अकथयत्।

   ……………………………………………… ।

## अभ्यासः – 46

✍ **कोष्ठकेषु प्रदत्तान् शब्दान् आश्रित्य यथोदाहरणं वाक्यानि रचयत–**

[ कोष्ठक में प्रदत्त शब्दों का प्रयोग कर उदाहरण के अनुसार वाक्यों की रचना करें। Make sentences with the help of words given in the bracket as shown in the example. ]

| | | | | |
|---|---|---|---|---|
| **उदा.** | अध्यापकः | (छात्रः , | प्रश्नः) | पृच्छति। |
| | अध्यापकः | **छात्रं** | **प्रश्नं** | पृच्छति । |
| 1. | बालकः | (वृद्धः , | उद्यानम्) | नयति। |
| | | | | । |
| 2. | रामः | (हनुमान् , | मार्गः) | अपृच्छत्। |
| | | | | । |
| 3. | माता | (पुत्री , | कार्यम्) | वदति। |
| | | | | । |
| 4. | वाल्मीकिः | (नारदः , | हितः) | उपादिशत्। |
| | | | | । |
| 5. | श्रीकृष्णः | (अर्जुनः , | गीता) | अवोचत्। |
| | | | | । |
| 6. | दशरथः | (कैकेयी , | सङ्ग्रामः) | अनयत्। |
| | | | | । |
| 7. | दिलीपः | (नन्दिनी , | आश्रमः) | अनयत्। |
| | | | | । |
| 8. | ज्येष्ठः | (कनिष्ठः , | प्रश्नः) | पृच्छति। |
| | | | | । |

| | | | | |
|---|---|---|---|---|
| 9. | त्वम् | (मित्रम् , | वृत्तान्तः) | पृच्छ । |

।

| | | | | |
|---|---|---|---|---|
| 10. | त्वम् | (पिता , | व्यथा) | वद । |

।

| | | | | |
|---|---|---|---|---|
| 11. | गोपाः | (गावः , | पयः) | दुहन्तु । |

.............................. ।

| | | | | |
|---|---|---|---|---|
| 12. | विश्वामित्रः | (हरिश्चन्द्रः , | राज्यम्) | अयाचत् । |

।

| | | | | |
|---|---|---|---|---|
| 13. | निर्धनाः | (कृपणः , | धनम्) | न याचन्तु । |

।

| | | | | |
|---|---|---|---|---|
| 14. | सः | (सभासद्, | प्रतिवेदनम्) | अकथयत् । |

।

| | | | | |
|---|---|---|---|---|
| 15. | पितामहः | (पौत्रः , | कथा) | कथयति । |

।

| | | | | |
|---|---|---|---|---|
| 16. | रामः | (सीता , | वनम्) | अनयत् । |

।

| | | | | |
|---|---|---|---|---|
| 17. | छात्रः | (धनिकम् , | वृत्तिः) | अयाचत् । |

।

| | | | | |
|---|---|---|---|---|
| 18. | पत्नी | (पतिः , | वृतान्तः) | पृच्छति । |

।

| | | | | |
|---|---|---|---|---|
| 19. | दयानन्दः | (शिष्यः , | वेदाः) | अपाठयत् । |

।

**द्वितीया विभक्तिः**

## विश्व-पुस्तक-प्रदर्शनी

**विद्यां** विना मनुष्यः पशुसदृशः भवति। विद्याभ्यासाय पुस्तकानां महती आवश्यकता वर्तते। विश्वस्य प्रायः सर्वासु भाषासु पुस्तकानि लिखितानि सन्ति। बह्वीभिः भाषाभिः निबद्धानि बहूनां देशानां पुस्तकानि एकत्र द्रष्टुं क्रेतुं च प्रतिवर्षं नवदेहल्यां विश्वपुस्तक-प्रदर्शनी आयोजिता भवति।




अहं गतमासे **नवदिल्लीं** गतवान्। मम शिक्षिका माता च तत्र गतवत्यौ। वयं तत्र **विश्व-पुस्तक-प्रदर्शनीं** द्रष्टुं गतवन्तः। अहं तां **महानगरीं** प्रथमवारं गतवान् आसम्। न केवलं भारतात् अपि तु विश्वस्य नैकेभ्यः देशेभ्यः जनाः **इमां पुस्तक-प्रदर्शनीं** द्रष्टुम् आगतवन्तः। ते **पुस्तक-विक्रेतॄन्** परितः समवेताः सन्तः भारतीय-भाषाभिः वैदेशिक-भाषाभिश्च रचितानि पुस्तकानि क्रीणन्ति स्म। तत्र द्वौ संस्कृत-पुस्तक-विक्रेतारौ आस्ताम्। **तौ** निकषा अपि बहवः जनाः आसन्। अहम् अपि तत्र गन्तुं **शिक्षिकां मातरं** च उक्तवान्। मम शिक्षयित्री **एकाम् अष्टाध्यायीं** क्रीतवती। तत्र स्थापितयोः अन्ययोः द्वयोः पुस्तकयोः **बृहतीम् आकृतिं** दृष्ट्वा तद्-विषये **पुस्तक-विक्रेतारम्** अहम् अपृच्छम्। तयोः पुस्तकयोः **नाम** अपि ज्ञातुम् इष्टवान्।

''श्रीमद्भागवतम् अत्र भागद्वये अस्ति'' इति पुस्तकविक्रेता **माम्** उक्तवान्। अहं **श्रीमद्भागवतं** क्रेतुं **मातरं** प्रेरितवान्, माता **तं ग्रन्थं** क्रीतवती। मम शिक्षिका **गङ्गावतरणचम्पूम्** अपि क्रीतवती।

संस्कृत-पुस्तकापणस्य पार्श्वे हिन्दी-पुस्तकापणः आसीत्। तस्य पार्श्वे च आङ्ग्ल-पुस्तकापणः। **तौ आपणौ** परितः महान् जन-सम्मर्दः आसीत्। तत्र मम शिक्षिका माम् उपदिष्टवती 'जनाः **हिन्दीम् आङ्ग्लं** च प्रकामं वदन्तु। तयोः **पुस्तकानि** अपि पठन्तु। परन्तु अस्माकं **मूलभाषां संस्कृतं भारतीयां संस्कृतिं** च न विस्मरन्तु'। '**संस्कृतं संस्कृतिं** च **निन्दतः जनान्** धिक्' इति सा **संस्कृतविरोधिनः जनान्** भर्त्सितवती अपि। ततः वयं हिन्दी-पुस्तकापणं गतवन्तः। अहं **रामायणीं कथाम्** आधृत्य तुलसीदासेन **विरचितं रामचरितमानसं** क्रेतुम् ऐच्छम्। परन्तु तत् पुस्तकं तत्र नासीत्। अतः प्रेमचन्दस्य **द्वौ उपन्यासौ** क्रीत्वा वयम् **आङ्ग्ल-पुस्तकापणं** गतवन्तः। मम माता भगिन्याः कृते **त्रीणि आङ्ग्ल-पुस्तकानि** क्रीतवती। **पुस्तकप्रदर्शनीम्** उभयतः विपणी आस्ताम्। वयम् **उभे** अपि **विपणी** गत्वा ततः **विविध-वस्तूनि** च क्रीत्वा **अतिथिगृहं** प्रत्यागतवन्तः।

◆◆◆

## अभ्यासः — 47

**1. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत—**

[ अधोलिखित प्रश्नों के उत्तर लिखें। Write the answers of the following questions. ]

(i) गतमासे बालकः कुत्र गतवान् ?

।

(ii) शिक्षिका किं किं क्रीतवती ?

(iii) बालकः श्रीमद्भागवतं क्रेतुं कुत्र गतवान् ?

।

(iv) कौ परितः जनसम्मर्दः आसीत् ?

।

(v) शिक्षिका कान् 'धिक्' इति उक्तवती ?

।

(vi) बालकः किं क्रेतुम् ऐच्छत् ?

।

(vii) ते किं क्रीत्वा आङ्ग्लपुस्तकापणं गतवन्तौ ?

।

(viii) माता भगिन्याः कृते किं क्रीतवती ?

।

(ix) ते कुत्र गत्वा विविधवस्तूनि क्रीतवन्तः ?

।

(x) ते किं क्रीत्वा अतिथिगृहं प्रत्यागतवन्तः ?

।

## 2. उदाहरणानुसारं रिक्तस्थानं पूरयत–

[ उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example.]

| | | | | |
|---|---|---|---|---|
| उदा. | छात्रः | ....विद्यालयं.... | गच्छति। | (विद्यालय - एक.) |
| (i) | कार्यदर्शी | | प्रोत्साहयति। | (कार्यकर्तृ - बहु.) |
| (ii) | माता | | शिशुं दर्शयति। | (पक्षिन् - बहु.) |
| (iii) | शिक्षकः | | उत्तरं बोधयति। | (अध्येतृ - बहु.) |
| (iv) | पार्थः | | विना विद्यालयं न गच्छति। | (स्वसृ - एक.) |
| (v) | नेतारः | | विना निर्वाचनक्षेत्रं न गच्छन्ति। | (सुहृत् - बहु.) |
| (vi) | | परितः पिपीलिकाः सन्ति। | | (शर्करा - एक.) |
| (vii) | | परितः भक्ताः सन्ति। | | (मन्दिर - एक.) |
| (viii) | | धिक्। | | (भ्रष्टाधिकारिन् - बहु.) |
| (ix) | | धिक्। | | (देशनिन्दक - एक.) |
| (x) | | उभयतः नेत्रे स्तः। | | (नासिका - बहु.) |
| (xi) | | उभयतः रोगिणः सन्ति। | | (भिषक् - एक.) |
| (xii) | राष्ट्रपतिः | | अधितिष्ठति। | (स्वभवन - एक.) |
| (xiii) | कच्छपः | | अधितिष्ठति। | (जल - एक.) |
| (xiv) | रावणः | | वरं याचते। | (महेश्वर - एक.) |

## 3. अधोलिखितानां शब्दानां द्वितीयाविभक्तौ त्रिषु वचनेषु रूपाणि लिखत–

[ अधोलिखित शब्दों की द्वितीया विभक्ति के तीनों वचनों में रूप लिखें। Write the accusative forms of the following words in all the three numbers. ]

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| (i) | दुहिता | | | |
| (ii) | मन्त्री | | | |
| (iii) | योगी | | | |
| (iv) | वधूः | | | |
| (v) | वक्ता | | | |

(vi) शिशुः

(vii) ऋत्विक्

(viii) विद्यार्थी

(ix) कविः

(x) जानु

(xi) स्वसा

(xii) वणिक्

(xiii) भ्राता

(xiv) बन्धुः

(xv) अधिकारी

**4. अन्त्यवर्णं वचनं च निर्दिशत—**

[ अन्त्यवर्ण और वचन का निर्देश करें। Point out the end-letter as well as the number.]

| | | अन्तनिर्देशः | वचनम् |
|---|---|---|---|
| उदा. | शिरसी | सकारान्तः | द्विवचनम् |
| (i) | कुक्षिम् | | |
| (ii) | कटीः | | |
| (iii) | नामनी | | |
| (iv) | अक्षि | | |
| (v) | भित्तयः | | |
| (vi) | कर्तारः | | |
| (vii) | गुरुः | | |
| (viii) | मातरौ | | |
| (ix) | मन्त्री | | |

5. **उदाहरणानुसारं कर्मस्थाने निर्दिष्टानि प्रथमान्तपदानि द्वितीयान्तानि विधाय वाक्यानि रचयत—**

[ उदाहरण के अनुसार कर्म के स्थानपर निर्दिष्ट प्रथमान्त पदों में द्वितीया करके वाक्य बनाएँ। Convert the nominative case-endings to the accusative and make sentences as shown in the examples. ]

| | कर्ता | कर्म | क्रिया |
|---|---|---|---|
| | सः | **भूमिः** | खनति |
| (i) | | दधि | मथ्नाति |
| (ii) | | मधु | लेढि |
| (iii) | | सूक्तयः | चिनोति |
| (iv) | | ग्रन्थिः | उद्घाटयति |
| (v) | | धनुः | भञ्जयति |
| (vi) | | संन्यासिनः | भोजयति |
| (vii) | | भ्रमिः | भ्रामयति |
| (viii) | | विद्यार्थिनौ | बोधयति |
| (ix) | | स्वसा | पश्यति |
| (x) | | विक्रेतारः | आह्वयति |
| (xi) | | वस्तुनी | क्रीणाति |
| (xii) | | जानु | कण्डूयते |
| (xiii) | | अस्थि | योजयति |
| (xiv) | | कशेरुः | परीक्षते |

**उदा.** सः **भूमिं** खनति।

(i) ........................................ ।

(ii) ।

(iii) ........................................ ।

(iv) ।

(v) ।

(vi) ।

(vii) ।

(viii) ........................................ ।

(ix) ।

(x) ।

(xi) ।

(xii) ........................................ ।

(xiii) ।

(xiv) ।

**सुभाषितेषु द्वितीयाप्रयोगाः**

# सुभाषितानि

**विना** वेदं विना गीतां विना रामायणीं कथाम्।
**विना** कविं कालिदासं भारतं भारतं नहि ॥

य[illegible] [illegible]म्।
त[illegible] पू[illegible] [illegible] [illegible] ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

रङ्कं करोति राजानं राजानं रङ्कमेव च।
धनिनं निर्धनं चैव निर्धनं धनिनं विधिः ॥

सन्तापयन्ति कमपथ्यभुजं न रोगाः
दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्त्रीकृता न विषयाः परिपीडयन्ति ॥

◆◆◆

## कथायां द्वितीयाप्रयोगाः

### मित्रसम्प्राप्तिः

दाक्षिणात्ये जनपदे काञ्ची नाम नगरी आसीत्। काञ्चीं नगरीं निकषा एकः न्यग्रोधतरुः आसीत्। लघुपतनकः नाम वायसः तं तरुम् अधितिष्ठति स्म। सः एकदा तरुं निकषा कञ्चन दुरात्मानं व्याधम् अपश्यत्। तं दृष्ट्वा सः अचिन्तयत्– "धिक् एतं पापात्मानं यः प्राणिनः हन्ति। किञ्च किम् एतेन निन्दावचनेन। इदानीं वटवासिनः पक्षिणः बोधयामि, अन्यथा एषः व्याधः तान् ग्रहीष्यति"। ततः सः सर्वान् वटवासिनः पक्षिणः अबोधयत्– "भोः पक्षिणः ! दुर्मनसं व्याधं पश्यत, एषः हस्ते तण्डुलान् जालं च गृहीत्वा आगच्छति। जालं प्रसार्य तण्डुलान् विकिरिष्यति। तण्डुलान् खादितुं मा गच्छत, अन्यथा सः भवतः सर्वान् जालेन बद्ध्वा नेष्यति"।



तावता व्याधः तत्र आगच्छत्। तं प्रदेशं दृष्ट्वा सः अचिन्तयत्– "समीचीनं स्थानम् एतत्। एषः न्यग्रोधः वृक्षः। एतं तरुम् उभयतः जलम् अस्ति। तरुम् उपर्युपरि पक्षिणः उड्डयन्ते। ते कदाचित् जलं पातुं तरुम् अधिष्ठातुं वा अत्र आगमिष्यन्ति। तण्डुलान् दृष्ट्वा जाले पतिष्यन्ति। अतः तरुम् अभितः जालं प्रसारयामि"। एवं विचिन्त्य सः जालं प्रसारितवान् तण्डुलान् च विकीर्णवान्। अनन्तरं तरुं समया शान्तः अतिष्ठत्। ते पक्षिणः अपि लघुपतनकस्य वाचं स्मृत्वा तान् तण्डुलान् न अस्पृशन्।

अत्रान्तरे लघुपतनकः नगरीम् उपर्युपरि कपोतसमूहम् अपश्यत्। चित्रग्रीवः नाम कपोतराजः बहुभिः कपोतैः सह तं तरुप्रदेशम् आगच्छत्। सर्वे कपोताः तरुं परितः तण्डुलान् अपश्यन्। यद्यपि लघुपतनकः तान् पक्षिणः न्यवारयत् तथापि क्षुधं शमयितुं कपोताः तान् तण्डुलान् खादितुं तत्र अपतन्। एवं च ते सर्वे जाले बद्धाः अभवन्।

क्रमशः .....

# द्वितीयः स्तबकः

## 2.2 द्वितीयः पाठः

### [ तृतीया विभक्तिः ]

**अजन्तशब्दानां तृतीयाप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



बालकः **पाणिना** खादति।



शिष्यः **पाणिभ्यां** नमस्करोति।



चतुर्भुजः **पाणिभिः** शोभते।



अर्चकः **साधुना** सह अर्चति।



सुरेशः **साधुभ्यां** सह गच्छति।



महाराजः **साधुभिः** सह विचारयति।



कृष्णः **भ्रात्रा** बलरामेण सह गच्छति।



रामः लक्ष्मण-भरताभ्यां **भ्रातृभ्यां** सह भाषते।



युधिष्ठिरः **भ्रातृभिः** सह गुरुं प्रणमति।

स्त्री.



सेवकः **द्रोण्या** जलम् पूरयति ।



महिला **द्रोणीभ्यां** जलम् आनयति ।



बालाः **द्रोणीभिः** लताः सिञ्चन्ति ।



शिशिरः **कूप्या** दुग्धं पिबति ।



बालकः **कूपीभ्याम्** जलं पिबति ।



भक्ताः **कूपीभिः** गङ्गाजलम् आनयन्ति ।



यशोदा **रज्ज्वा** कृष्णं बध्नाति ।



सञ्चालकः **रज्जुभ्यां** जवनिकाम् अपसारयति ।



कृषकः **रज्जुभिः** काष्ठानि बध्नाति ।



पुत्रः **मात्रा** सह खादति।



राजकुमारः **मातृभ्यां** सह शालां गच्छति।



भरतः **मातृभिः** सह देवं पूजयति।

**नपुं.**



काणः **अक्ष्णा** पश्यति।



जनः **अक्षिभ्यां** पर्वतं पश्यति।



शिवः **अक्षिभिः** शोभते।



मल्लः **जानुना** प्रहरति।



शिशुः **जानुभ्यां** चलति।



शिशवः **जानुभिः** चलन्ति।

## अजन्तशब्दानां तृतीयाप्रयोगाः

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

### पुं.

| | | |
|---|---|---|
| शिशुः **पाणिना** खादति। | छात्रः **पाणिभ्यां** खनति। | जनाः **पाणिभिः** कार्यं कुर्वन्ति। |
| **साधुना** सह राजा उपविशति। | **साधुभ्यां** सह पण्डितः विचारयति। | **साधुभिः** सह जनाः आलापं कुर्वन्ति। |
| जगन्नाथः **भ्रात्रा** सह रथयात्रां करोति। | सुभद्रा **भ्रातृभ्यां** सह विराजते। | रामः **भ्रातृभिः** समं तिष्ठति। |
| **दात्रा** विना महत्कार्यं न भवति। | **दातृभ्यां** विना एतत् कार्यम् अपूर्णम्। | **दातृभिः** विना दरिद्राः कष्टम् अनुभवन्ति। |
| जनाः **गवा** बहुकार्यं साधयन्ति। | कृषिकः **गोभ्यां** क्षेत्रं कर्षति। | **गोभिः** गृहं पवित्रं भवति। |

**अवधेयम्**

| | | |
|---|---|---|
| भूपतिना | भूपतिभ्याम् | भूपतिभिः |
| पत्या | पतिभ्याम् | पतिभिः |

पतिशब्दस्य रूपं तृतीया-एकवचने 'पत्या' इति भवति। पतिशब्दान्तस्य (यदा समासे पतिशब्दः अन्ते भवति तदा) 'भूपतिना' इतिवत् रूपं भवति।

### स्त्री.

| | | |
|---|---|---|
| **मालया** कण्ठः शोभते। | **मालाभ्यां** नारी भूषिता। | **मालाभिः** देवः शोभते। |
| **पङ्क्त्या** छात्राः गच्छन्ति। | **पङ्क्तिभ्यां** सारसाः यान्ति। | **पङ्क्तिभिः** छात्राः तिष्ठन्ति। |
| **पुत्र्या** माता सन्तुष्यति। | **पुत्रीभ्यां** पिता हृष्यति। | **पुत्रीभिः** किं न साध्यते ? |
| **धेन्वा** कृष्णः शोभते। | **धेनुभ्यां** गृहं शोभते। | **धेनुभिः** गोशाला शोभते। |
| **वध्वा** गृहं सुशोभते। | **वधूभ्यां** श्वश्रूः नन्दति। | **वधूभिः** गृहस्थाः नन्दन्ति। |
| **मात्रा** सह शिशुः क्रीडति। | **मातृभ्यां** बालकृष्णः मोदते। | **मातृभिः** सह शिशवः क्रीडन्ति। |

**नपुं.**

**अक्ष्णा** काणः गीतं गायति। **अक्षिभ्यां** जनाः पश्यन्ति। **अक्षिभिः** सहस्राक्षः इन्द्रः शोभते।
**जानुना** मल्लः प्रहरति। **जानुभ्यां** क्रीडापटुः क्रीडति। **जानुभिः** वीराः शोभन्ते।

**नूतनक्रियारूपम्**

**शोभन्ते** = सुशोभिताः भवन्ति।

**अजन्तशब्दानां तृतीयारूपाणि**

**एतानि शब्दरूपाणि पठत कण्ठस्थं च कुरुत–**

[ इन शब्दरूपों को पढ़ें एवं कण्ठस्थ करें। Read and remember these declension. ]

| | | | | | |
|---|---|---|---|---|---|
| **पुं.** | इकारान्तः | (पाणि) | पाणिना | पाणिभ्याम् | पाणिभिः |
| | उकारान्तः | (साधु) | साधुना | साधुभ्याम् | साधुभिः |
| | ऋकारान्तः | (भ्रातृ) | भ्रात्रा | भ्रातृभ्याम् | भ्रातृभिः |
| | ओकारान्तः | (गो) | गवा | गोभ्याम् | गोभिः |
| **स्त्री.** | इकारान्तः | (पङ्क्ति) | पङ्क्त्या | पङ्क्तिभ्याम् | पङ्क्तिभिः |
| | ईकारान्तः | (नदी) | नद्या | नदीभ्याम् | नदीभिः |
| | उकारान्तः | (चञ्चु) | चञ्च्वा | चञ्चुभ्याम् | चञ्चुभिः |
| | ऊकारान्तः | (वधू) | वध्वा | वधूभ्याम् | वधूभिः |
| | ऋकारान्तः | (मातृ) | मात्रा | मातृभ्याम् | मातृभिः |
| **नपुं.** | इकारान्तः | (अक्षि) | अक्ष्णा | अक्षिभ्याम् | अक्षिभिः |
| | उकारान्तः | (जानु) | जानुना | जानुभ्याम् | जानुभिः |

## अभ्यासः — 48

✍ **मञ्जूषाप्रदत्त-शब्दानाम् अग्रे कोष्ठके निर्दिष्टवचनानुसारेण तृतीयाविभक्तौ रूपाणि लिखत—**

[ मञ्जूषा में प्रदत्त शब्दों के आगे कोष्ठक में दिये गये वचन के अनुसार तृतीया विभक्त्यन्त रूपों को लिखें। Write the declension in instrumental case as per the number pointed out in the bracket against the words given in the box. ]

| | | | |
|---|---|---|---|
| उदा. i. शिशुना | ix. | xvii. | xxiv. |
| ii. | x. | xviii. | xxv. |
| iii. | xi. | xix. | xxvi. |
| iv. | xii. | xx. | xxvii. |
| v. | xiii. | xxi. | xxviii. |
| vi. | xiv. | xxii. | xxix. |
| vii. | xv. | xxiii. | xxx. |
| viii. | xvi. | | |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| i. | शिशुः | (1) | xi. | विष्णुः | (2) | xxi. | जानु | (3) |
| ii. | पाणिः | (3) | xii. | दाता | (1) | xxii. | अक्षि | (1) |
| iii. | भ्राता | (1) | xiii. | छदिः | (3) | xxiii. | अश्रु | (2) |
| iv. | गौः | (1) | xiv. | लता | (2) | xxiv. | अस्थि | (2) |
| v. | जगद्गुरुः | (1) | xv. | धेनुः | (1) | xxv. | मधु | (3) |
| vi. | ऋषिः | (3) | xvi. | देवी | (1) | xxvi. | अधिवक्ता | (2) |
| vii. | जामाता | (2) | xvii. | माता | (2) | xxvii. | श्मश्रु | (3) |
| viii. | शम्भुः | (1) | xviii. | वधूः | (1) | xxviii. | दधि | (1) |
| ix. | दाशरथिः | (1) | xix. | अङ्गुलिः | (1) | xxix. | दुहिता | (3) |
| x. | अभियन्ता | (3) | xx. | वारि | (2) | xxx. | चञ्चुः | (1) |

[ 1. एकवचनम् 2. द्विवचनम् 3. बहुवचनम् ]

## हलन्तशब्दानां तृतीयाप्रयोगाः

### अधोलिखितानि वाक्यानि पठत–

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

पुं.



कृष्णः **सुहृदा** सुदाम्ना सह मिलति।



गोपः कृष्णबलरामाभ्यां **सुहृद्भ्यां** सह क्रीडति।



महाभारते कृष्णः **सुहृद्भिः** पाण्डवैः सह आसीत्।



**राज्ञा** सह राज्ञी उपविशति।



**राजभ्यां** सह सैनिकाः सन्ति।



**राजभिः** सह चक्रवर्ती शोभते।



राजा **मन्त्रिणा** सह विमृशति।



राजा **मन्त्रिभ्यां** सह उपविशति।



राजा **मन्त्रिभिः** परिवेष्टितः अस्ति।



**मरुता** कम्पते वृक्षः।



शीतोष्णाभ्यां **मरुद्भ्यां** शिशुः रक्षणीयः।



प्रचण्डैः **मरुद्भिः** तरङ्गाः उच्छलन्ति।

**स्त्री.**



**सरिता** सह आश्रमः शोभते।



**सरिद्भ्यां** प्रयागः शोभते।



**सरिद्भिः** भारतं शोभते।



शिवः भक्तम् **आशिषा** योजयति।



माता पुत्रं पुत्रवधूं च **आशीर्भ्यां** योजयति।



ऋषयः शिष्यान् **आशीर्भिः** योजयन्ति।

**नपुं.**



भक्तस्य **तपसा** देवः प्रसीदति।



ज्ञानेन भक्त्या च इति **तपोभ्यां** मुक्तिः सुकरा।



दानवानां **तपोभिः** देवाः प्रसन्नाः।

## हलन्तशब्दानां तृतीयाप्रयोगाः

### एतानि वाक्यानि पठत–
[ इन वाक्यों को पढ़ें। Read these sentences. ]

**पुं.**

| | | |
|---|---|---|
| **मरुता** कम्पते लता। | शीतोष्णाभ्यां **मरुद्भ्यां** स्वास्थ्यं प्रभावितम्। | प्रचण्डैः **मरुद्भिः** जीवनं दुष्करम्। |
| **धीमता** सह परामृशतु। | **धीमद्भ्यां** सह राजा आलोचयति। | **धीमद्भिः** सभा सफला भवति। |
| **मन्त्रिणा** सह सेनाध्यक्षः युद्धक्षेत्रं गच्छति। | **मन्त्रिभ्यां** नृपतिः राजकार्यं निर्वहति। | राष्ट्रपतिः **मन्त्रिभिः** शासनं चालयति। |
| भवान् **महता** जनेन सह उपविशतु। | **महद्भ्यां** भुजाभ्यां शोभते रामः। | **महद्भिः** पुरुषैः शोभते सभा। |
| **राज्ञा** राजधानी शोभते। | **राजभ्यां** सन्धिः क्रियते। | **राजभिः** एषः देशः धन्यः अभवत्। |

**स्त्री.**

| | | |
|---|---|---|
| **सरिता** शोभते नगरम्। | कटकनगरं **सरिद्भ्यां** परिवेष्टितम् अस्ति। | वयं **सरिद्भिः** कृषिकार्यं कुर्मः। |

**नपुं.**

| | | |
|---|---|---|
| अहं **बृहता** पात्रेण जलम् आनयामि। | कर्मकरौ **बृहद्भ्यां** पात्राभ्यां तण्डुलान् आनयतः। | पूजकाः **बृहद्भिः** पात्रैः प्रसादं वितरन्ति। |
| **मनसा** चिन्तितं कर्म **वचसा** न प्रकाशयेत्। | सुहृदोः **मनोभ्यां** मैत्री शोभते। | नराणां शुद्धैः **मनोभिः** ऐक्यं जायते। |

## हलन्तशब्दानां तृतीयारूपाणि

**एतानि शब्दरूपाणि पठत—**

[ इन शब्दरूपों को पढ़ें। Read these declensions. ]

**पुं.**

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| तकारान्तः | (मरुत्) | मरुता | मरुद्भ्याम् | मरुद्भिः |
| तकारान्तः | (धीमत्) | धीमता | धीमद्भ्याम् | धीमद्भिः |
| तकारान्तः | (महत्) | महता | महद्भ्याम् | महद्भिः |
| नकारान्तः | (मन्त्रिन्) | मन्त्रिणा | मन्त्रिभ्याम् | मन्त्रिभिः |
| नकारान्तः | (आत्मन्) | आत्मना | आत्मभ्याम् | आत्मभिः |
| नकारान्तः | (राजन्) | राज्ञा | राजभ्याम् | राजभिः |

**स्त्री.**

| | | | | |
|---|---|---|---|---|
| चकारान्तः | (त्वच्) | त्वचा | त्वग्भ्याम् | त्वग्भि |
| जकारान्तः | (स्रज्) | स्रजा | स्रग्भ्याम् | स्रग्भिः |
| तकारान्तः | (सरित्) | सरिता | सरिद्भ्याम् | सरिद्भिः |
| धकारान्तः | (क्षुध्) | क्षुधा | क्षुद्भ्याम् | क्षुद्भिः |
| षकारान्तः | (प्रावृष्) | प्रावृषा | प्रावृड्भ्याम् | प्रावृड्भिः |
| षकारान्तः | (आशिष्) | आशिषा | आशीर्भ्याम् | आशीर्भिः |

**नपुं.**

| | | | | |
|---|---|---|---|---|
| तकारान्तः | (बृहत्) | बृहता | बृहद्भ्याम् | बृहद्भिः |
| नकारान्तः | (नामन्) | नाम्ना | नामभ्याम् | नामभिः |
| सकारान्तः | (मनस्) | मनसा | मनोभ्याम् | मनोभि |

## अभ्यासः — 49

✍ **प्रातिपदिकं लिखित्वा तत्र 'आ' इति योजयित्वा तृतीयायाः एकवचनान्तरूपाणि लिखत–**
[ मूल शब्द लिखकर उसमें 'आ' जोड़ने के पश्चात् तृतीया विभक्ति में एकवचनान्त रूप लिखें। Write the base, add 'ā' to it and then write the declension in instrumental singular. ]

| प्रथमैकवचनान्तम् | प्रातिपदिकम् | + आ | = तृ. एकवचनान्तम् |
|---|---|---|---|
| उदा. वणिक् | वणिज् | + आ | = वणिजा |
| 1. वाक् | | | |
| 2. त्वक् | | | |
| 3. स्रक् | | | |
| 4. दिक् | | | |
| 5. प्रावृट् | | | |
| 6. सरित् | | | |
| 7. तडित् | | | |
| 8. विद्युत् | | | |
| 9. आपत् | | | |
| 10. परिषत् | | | |
| 11. प्रतिपत् | | | |
| 12. विपत् | | | |
| 13. शरत् | | | |
| 14. सम्पत् | | | |
| 15. संसद् | | | |
| 16. समित् | | | |
| 17. योषित् | | | |
| 18. क्षुत् | | | |
| 19. आशीः | | | |

📖 **अधोदर्शितेषु उदाहरणेषु कोष्ठकस्थं वर्णपरिवर्तनं सावधानं पठत–**

[अधोलिखित उदाहरण में कोष्ठक में स्थित वर्ण परिवर्तन को ध्यान से पढ़ें। Observe carefully the change of letters given in the brackets of the examples.]

| | **प्रातिपदिकम्** | **तृतीया-द्विवचने** | **तृतीया-बहुवचने** |
|---|---|---|---|
| 1. | मरुत् | मरुद्भ्याम् | मरुद्भिः |
| | मरु [त्] | मरु [द्] भ्याम् | मरु [द्] भिः |
| | | मरुत् – त् → [द्] | |
| 2. | ऋत्विज् | ऋत्विग्भ्याम् | ऋत्विग्भिः |
| | ऋत्वि [ज्] | ऋत्वि [ग्] भ्याम् | ऋत्वि [ग्] भिः |
| | | ऋत्विज् – ज् → [ग्] | |
| 3. | गुणिन् | गुणिभ्याम् | गुणिभिः |
| | गुणि [न्] | गुणि [ ] भ्याम् | गुणि [ ] भिः |
| | | गुणिन् – न् → [X] | |
| 4. | चन्द्रमस् | चन्द्रमोभ्याम् | चन्द्रमोभिः |
| | चन्द्रम [स्] | चन्द्रम [ो] भ्याम् | चन्द्रम [ो] भिः |
| | | चन्द्रमस् – स् → [ओ] | |

5.




**अवधेयम्**

सम्राज्-सम्राड्भ्याम्, पुंस्-पुम्भ्याम्, षष्-षड्भ्याम्, अदस्-अमूभ्याम्, आशिष्-आशीर्भ्याम् इत्यादयः केचन अपवादाः सन्ति।

## अभ्यासः — 50

✍ **तृतीयायाम् अन्येषां शब्दानां रूपाणि लिखत—**

[ तृतीया के अनुसार शब्दरूप लिखें। Write the declension as shown in the example.]

1. **यथा** भवत् ........**भवता**........ ........**भवद्भ्याम्**........ ........**भवद्भिः**........

सरित्

गच्छत्

श्रीमत्

भगवत्

जगत्

2. **यथा** मन्त्रिन् ........**मन्त्रिणा**........ ........**मन्त्रिभ्याम्**........ ........**मन्त्रिभिः**........

राजन्

करिन्

आत्मन्

ब्रह्मन्

नामन्

| | | | |
|---|---|---|---|
| 3. **यथा** स्रज् | **स्रजा** | **स्रग्भ्याम्** | **स्रग्भिः** |
| भिषज् | | | |
| वणिज् | | | |
| ऋत्विज् | | | |

| | | | |
|---|---|---|---|
| 4. **यथा** मनस् | **मनसा** | **मनोभ्याम्** | **मनोभिः** |
| वेधस् | | | |
| सरस् | | | |
| पयस् | | | |
| अप्सरस् | | | |

| | | | |
|---|---|---|---|
| 5. **यथा** हविष् | **हविषा** | **हविर्भ्याम्** | **हविर्भिः** |
| धनुष् | | | |
| चक्षुष् | | | |
| आयुष् | | | |
| वपुष् | | | |

## करणे तृतीया

**अधोनिर्दिष्टानि वाक्यानि सावधानं पठत—**

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read carefully the following sentences. ]

1. भक्ताः **पङ्क्तिभिः** मन्दिरं प्रविशन्ति।
2. कृषकः **गोभ्यां** क्षेत्रं कर्षति।
3. भगिनी **महता आनन्देन** गीतं गायति।
4. पक्षिणः **चञ्चुभिः** भक्षयन्ति।
5. **कायेन मनसा वाचा** प्रणमामि पुनः पुनः।

## अभ्यासः — 51

✍ **कोष्ठके निर्दिष्टानां शब्दानाम् उपयुक्तेन रूपेण रिक्तस्थानानि पूरयत–**

[ कोष्ठक में निर्दिष्ट शब्दों के उचित रूप से रिक्तस्थान भरें। Fill in the blanks with the appropriate forms of the words given in the brackets. ]

| | | |
|---|---|---|
| उदा. | (परशुः) | कृषिकः ......**परशुना**...... वृक्षं छिनत्ति। |
| 1. | (पाणी) | पूजकः ............ पुष्पम् अर्पयति। |
| 2. | (वारि) | ............ सरोवरः परिपूर्णः अस्ति। |
| 3. | (अग्निः) | ............ तण्डुलं पचति। |
| 4. | (व्याधिः) | हर्षवर्धनः ............ पीडितः आसीत्। |
| 5. | (उपाधिः) | पण्डितः 'महामहोपाध्यायः' इति ............ मण्डितः। |
| 6. | (तरुः) | ............ लता संवर्धिता भवति। |
| 7. | (चञ्चुः) | पक्षिणः ............ आहारं स्वीकुर्वन्ति। |
| 8. | (भ्रूः) | सैनिकः ............ क्रोधं प्रदर्शयति। |
| 9. | (तनुः) | महिलाः ............ कोमलाः भवन्ति। |
| 10. | (कृतयः) | कालिदासः ............ अमरः जातः। |
| 11. | (बुद्धिः) | मनुष्यः ............ श्रेष्ठः जीवः अस्ति। |
| 12. | (पयः) | ............ वर्धते तनुः। |
| 13. | (तपः) | पार्वती ............ शिवं प्राप्तवती। |
| 14. | (भक्तिः) | वयं ............ श्रीजगन्नाथं प्रणमामः। |
| 15. | (प्रीतिः) | वयं ............ सम्भाषणं कुर्मः। |
| 16. | (युक्तिः) | ............ कार्यं सिध्यति। |
| 17. | (योगी) | ............ तपःसिद्धिः प्राप्ता। |
| 18. | (अम्बु) | ............ सस्यानि सिञ्चति सः। |

**विना / सह —योगे तृतीया**

📖 **अधोनिर्दिष्टानि वाक्यानि सावधानं पठत—**

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read carefully the following sentences. ]

1. **धनेन विना** सुखं नास्ति।
2. **गुरुणा विना** शिक्षा अपूर्णा।
3. **गृहिण्या विना** गृहं शून्यम्।
4. **वारिणा विना** मत्स्यः न जीवति।
5. **मरुता विना** जीवनं न भवति।
6. **भूपतिना सह** अनुचराः यान्ति।
7. **मात्रा सह** शिशुः गच्छति।
8. **मरुता सह** सुगन्धः आयाति।
9. **ऋत्विजा सह** यजमानः अस्ति।
10. **धीमद्भिः सह** शास्त्रचर्चा करणीया।

## अभ्यासः — 52

✍ **वचननिर्देशानुगुणं तृतीया-विभक्त्यन्तरूपैः रिक्तस्थानानि पूरयत—**

[ वचन निर्देश के अनुसार तृतीया विभक्त्यन्त रूप से रिक्तस्थान भरें। Fill in the blanks with the instrumental forms as the number pointed out. ]

| | | | |
|---|---|---|---|
| उदा. | (मुनिः-1) | **मुनिना** | सह शिष्यः आश्रमे वसति। |
| 1. | (यतिः-3) | **यतिभिः** | विना धर्मरक्षणं न सम्भवति। |
| 2. | (अरिः-2) | **अरिभ्यां** | सह वीरः युद्धरतः आसीत्। |
| 3. | (गिरिः-1) | ........ | विना निर्झरः न प्रवहति। |
| 4. | (भ्राता-2) | ........ | सह सुभद्रा पूजिता भवति। |
| 5. | (तरुः-1) | ........ | विना आतपः बाधते। |
| 6. | (माता-1) | ........ | विना शिशोः सुखं नास्ति। |
| 7. | (पुत्रः-3) | ........ | सह पिता भ्रमेत्। |
| 8. | (कार्यकर्ता-1) | ........ | सह अधिकारी वार्तालापं कृतवान्। |
| 9. | (तपः-1) | ........ | विना कार्यसिद्धिः कुतः ? |
| 10. | (स्वसा-1) | ........ | सह भ्राता पठिष्यति। |
| 11. | (दुहिता-1) | ........ | सह माता नदीम् अगच्छत्। |
| 12. | (शष्कुलिः-1) | ........ | सह वयं दुग्धं पिबामः। |
| 13. | (रात्रिः-1) | ........ | विना चन्द्रमाः न शोभते। |

**एतानि वाक्यानि अवधानपूर्वकं पठत–**

[ इन वाक्यों को ध्यान से पढ़ें। Read these sentences carefully. ]

यात्रिणः **लोकयानेन** यात्रां कुर्वन्ति।

प्रधानमन्त्री **विमानेन** विदेशम् अगच्छत्।

पर्यटकाः **नौकायानेन** भ्रमन्ति।

तीर्थयात्रिणः **रेलयानेन** गच्छेयुः।

अहं **मारुतियानेन** नगरं गमिष्यामि।

**अवधेयम्**

एतेषु उदाहरणवाक्येषु यानवाचकशब्देषु तृतीया प्रयुक्ता अस्ति।

## अभ्यासः – 53

**अधोनिर्दिष्टानां शब्दानां तृतीयारूपाणि रिक्तस्थानेषु योजयत–**

[ अधोनिर्दिष्ट शब्दों के तृतीयान्त रूप रिक्त स्थानों में जोड़ें। Fill in the blanks with instrumental forms of the words given. ]

| | | | | |
|---|---|---|---|---|
| **उदा.** | ( रथः ) | अर्जुनः | **रथेन** | युद्धक्षेत्रम् अगच्छत्। |
| 1. | ( शकटः ) | कृषिकाः | | धान्यं वहन्ति। |
| 2. | ( वायुयानम् ) | महात्मा गान्धी | | विदेशम् अगच्छत्। |
| 3. | ( उष्ट्रशकटः ) | राजस्थानप्रदेशे जनाः | | भारं वहन्ति। |
| 4. | ( नौका ) | कलिङ्गाः | | वाणिज्यम् अकुर्वन्। |
| 5. | ( द्विचक्रिका ) | छात्राः | | विद्यालयं यान्ति। |
| 6. | ( त्रिचक्रिका ) | नगरेषु | | नागरिकाः भ्रमन्ति। |
| 7. | ( वातानुकूलितयानम् ) | वृद्धाः | | दूरदेशं गच्छन्ति। |
| 8. | ( व्योमयानम् ) | नेतारः | | विदेशं यास्यन्ति। |
| 9. | ( रोगिवाहनम् ) | रुग्णाः झटिति | | चिकित्सालयं गच्छन्ति। |
| 10. | ( लोकयानम् ) | वयं | | तिरुमलमन्दिरं गमिष्यामः। |

## 'सदृश'-योगे तृतीया

**एतानि वाक्यानि अवधानपूर्वकं पठत—**

[ इन वाक्यों को ध्यान से पढ़ें। Read these sentences carefully. ]

**अर्जुनेन** सदृशः वीरः विरलः।

**पित्रा** सदृशः पुत्रः अस्ति।

**मनुष्येण** सदृशः बुद्धिमान् प्राणी नास्ति।

**मात्रा** सदृशी पुत्री।

**चन्द्रेण** सदृशं मुखम्।

**अवधेयम् ·**

एतेषु उदाहरणेषु सदृशार्थशब्दस्य योगे तृतीया विभक्तिः प्रयुक्ता अस्ति।

### अभ्यासः — 54

**कोष्ठके निर्दिष्टशब्दानाम् समुचितरूपेण रिक्तस्थानं पूरयत—**

[ कोष्ठक में निर्दिष्ट शब्दों के उचित रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the appropriate form of the words given in the brackets. ]

| | | | |
|---|---|---|---|
| उदा. | **मात्रा** | सदृशः पुत्रः। | (माता) |
| 1. | | सदृशः दाता नास्ति। | (कर्णः) |
| 2. | | सदृशः सुरेशः। | (मनोज) |
| 3. | | सदृशः काचः। | (मणिः) |
| 4. | | सदृशी रज्जुः। | (सर्पः) |
| 5. | | सदृशः बलशाली। | (गजः) |
| 6. | | सदृशः क्रीडापटुः। | (अभिनेता) |
| 7. | | सदृशः शिष्यः। | (गुरुः) |

## 'रूप्यकादि'-योगे तृतीया

### अधोनिर्दिष्टानि वाक्यानि अवधानपूर्वकं पठत–

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read these sentences carefully. ]

अहं **दशभिः रूप्यकैः** एतां लेखनीं क्रीतवान्।

माता **शतेन मुद्राभिः** वस्त्रं क्रीणाति।

भगिनी **पञ्चभिः रूप्यकैः** लेखनीम् आनयति।

आपणिकः **षष्ट्या रूप्यकैः** वस्तूनि दत्तवान्।

भवान् इदं पुस्तकं **चतुर्भिः रूप्यकशतैः** क्रीणातु।

भवती **कियता मूल्येन** क्रीतवती ?

**अवधेयम्**

एतेषु उदाहरणेषु रूप्यकादिशब्दस्य योगे तृतीया विभक्तिः प्रयुक्ता अस्ति।

## अभ्यासः – 55

### रिक्तस्थानानि पूरयत–

[ रिक्तस्थानों की पूर्ति करें। Fill in the blanks. ]

**उदा.** 1. अहं ......**दशभिः**...... ......**रूप्यकैः**...... (दश रूप्यकाणि) सम्भाषणपुस्तकं क्रीणामि।

2. भक्तः ......**अष्टाभिः**...... ................ (अष्ट मुद्राः) पुष्पाणि स्वीकरोति।

3. शिक्षकः ......**पञ्चभिः**...... ................ (पञ्च रूप्यकाणि) पुस्तकानि क्रीतवान्।

4. भवती ......**कतिभिः**...... ................ (कति मुद्राः) शाटिकाम् आनीतवती।

5. अहं ......**द्वादशभिः**...... ................ (द्वादश रूप्यकाणि) आरक्षणं कृतवान्।

## तृतीया विभक्तिः

### होलिकोत्सवः

भारतवर्षे द्वादशसु मासेषु त्रयोदश उत्सवाः भवन्ति इति काचन प्रसिद्धिः वर्तते। होलिकोत्सवः तेषु अन्यतमः। भारतीय-संस्कृतौ होलिकोत्सवस्य विशिष्टं महत्त्वं वर्तते। हिरण्यकशिपोः भगिन्याः होलिकायाः **दहनेन** अयम् उत्सवः सम्बद्धः अस्ति। सा देवस्य वरप्रभावेण **अग्निना** दग्धा न भवति स्म। अत एव हिरण्यकशिपोः **निर्देशेन** सा प्रह्लादम् अङ्के उपावेश्य अग्नौ उपविष्टवती। परन्तु प्रह्लादस्य **भक्त्या** प्रसन्नः नारायणः प्रह्लादं रक्षितवान्। **प्रज्वलितेन वह्निना** सा स्वयमेव दग्धा अभवत्। तस्याः घटनायाः स्मृतिरूपेण प्रतिवर्षं फाल्गुन-पूर्णिमावसरे होलिका-महोत्सवः आचर्यते। होलिका-महोत्सवस्य **नामश्रवणेन** भारतीयानां चेतांसि प्रफुल्लितानि भवन्ति। होलिकावसरे जनाः परस्परं **प्रेम्णा** मिलन्ति, **एतेन** तेषां प्रीतिः वर्धते।

**पित्रा** सह होलीमेलनाय नीलमणेः महती इच्छा आसीत्। **प्रकृत्या** चतुरः **आकृत्या** च सुन्दरः स स्वगृहनगरे **मात्रा** सह निवसति स्म। माता विमला च **पुत्रेण नीलमणिना** सह **सुखेन** कालं यापयन्ती आसीत्। तस्य पिता तु अमेरिकादेशे व्यवसायं करोति स्म। परन्तु **होल्या** एव आकृष्टः सः प्रतिवर्षम् एकवारं भारतस्थं स्वगृहम् आगच्छति स्म।





"होलिकोत्सवे पिता गृहम् आगमिष्यति। अहं **बन्धुभिः** साकं यथेच्छं क्रीडिष्यामि। **ग्रामवासिभिः** सह भ्रमिष्यामि। **सुहृद्भिः** सह **वर्णजलैः वर्णचूर्णैः** च खेलिष्यामि" इति **मनसा** चिन्तयन् नीलमणिः उल्लसितः भवति स्म। पुत्रस्य **सुखानुभूत्या** प्रमुदिता नीलमणेः माता विमला स्व-गृहं **बहुभिः स्रग्भिः** द्वारं च **रङ्गावल्या**, तथा च भित्तिं **चित्रफलकैः** सज्जीकृतवती। पत्युः आगमनम् अभिलक्ष्य सा **पयसा शर्कराभिः** च पायसम् अन्यानि बहुविधानि मिष्टान्नानि च निर्मितवती।

यथासमयं पिता रघुपतिः **वायुयानेन** स्वदेशं प्राप्तवान्। नीलमणिः **जनन्या** सह विमान-स्थानके प्रतीक्षापरः आसीत्। पितरं विलोक्य सः **महता आनन्देन** तं मेलितुम् अधावत्। **पुत्र-प्रेम्णा** अभिभूतः पिता तं **बाहुभ्याम्** उत्थाप्य आलिङ्गितवान्। विमला अपि **स्मितेन** स्वपतिम् अभिनन्दितवती। ततः ते सर्वे **कार्-यानेन** गृहं प्रत्यागतवन्तः।



होलिकोत्सवस्य पूर्वस्मिन् दिवसे **रघुपतिना** सह मित्राणि **दूरवाण्या** वार्ताम् अकुर्वन्। होलिकादिने **प्रतिवेशिभिः बन्धुभिः** सह चायं पिबन् रघुपतिः कथयन् आसीत्– "**होल्या** अहं स्वदेशे आनीतः अस्मि। अमेरिकादेशे धनं, वैभवं, विलासमयं जीवनम्– एतत् सर्वमपि वर्तते। परन्तु तत्र अहं सर्वथा दिनानि गणयन् आसम् 'कदा होली आगमिष्यतीति'। यथा अत्र होलीमेलनं भवति, न तथा विश्वे अन्यत्र कुत्रापि। यद्यपि अस्माकं देशः **विविधैः धर्मावलम्बिभिः नानाभाषा-भाषिभिः** च **जनैः** परिपूर्णोऽस्ति, तथापि अस्मिन् दिने सर्वे वैमनस्यं विमुच्य **सद्भावेन, शान्त्या मैत्री-भावनया** च एतम् उत्सवम् आचरन्ति परस्परं च मिलन्ति। वस्तुतः **एतादृश्या महत्या भावनया** प्रेरितः अहं प्रतिवर्षम् अस्मिन् अवसरे आगच्छामि"।

अन्ते रघुपतिः अमेरिकातः **आनीतैः वस्तुभिः** आत्मीयजनानां प्रतिवेशिनां च सत्कारम् अकरोत्। ते सर्वे अपि **होली-शुभकामनाभिः** सह स्व-स्वगृहाणि प्रस्थितवन्तः।

◆◆◆

## अभ्यासः – 56

1. **अधोलिखितानां प्रश्नानाम् उत्तरं लिखत–**
[ अधोलिखित प्रश्नों का उत्तर लिखें। Answer the following questions. ]

(i) होलिकोत्सवः केन सम्बद्धः अस्ति ?

।

(ii) नारायणः कया प्रसन्नः प्रह्लादं रक्षितवान् ?

।

(iii) केन भारतीयानां चेतांसि प्रफुल्लितानि भवन्ति ?

।

(iv) होलिकोत्सवे केन सर्वे प्रसन्नाः भवन्ति ?

।

(v) नीलमणेः का इच्छा आसीत् ?

।

(vi) नीलमणिः कया सह निवसति स्म ?

।

(vii) विमला केन सह कथं कालं यापयन्ती आसीत् ?

।

(viii) किं चिन्तयन् नीलमणिः उल्लसितः भवति स्म ?

।

(ix) विमला गृहं कथं सज्जीकृतवती ?

।

(x) विमला पायसं मिष्टान्नं च केन निर्मितवती ?

।

(xi) रघुपतिः केन स्वदेशं प्राप्तवान् ?

..................................................... ।

(xii) नीलमणिः कया सह विमान-स्थानके आसीत् ?

..................................................... ।

(xiii) केन अभिभूतः पिता पुत्रम् आलिङ्गितवान् ?

..................................................... ।

(xiv) होलिका-दिने रघुपतिः कैः सह चायं पिबन् आसीत् ?

..................................................... ।

(xv) रघुपतिः प्रतिवेशिनां सत्कारं कैः अकरोत् ?

..................................................... ।

2. **कोष्ठके लिखितानां पदानां तृतीयान्तरूपैः रिक्तस्थानानि पूरयत–**

**[ कोष्ठक में लिखित पदों के तृतीयान्त रूपों से रिक्तस्थान भरें। Fill in the blanks with the instrumental forms of the words given in the bracket. ]**

| | | | |
|---|---|---|---|
| (i) | माता | वृक्षान् सिञ्चति । | (अम्बु) |
| (ii) | रावणः | सह युद्धं कृतवान् । | (जटायुः) |
| (iii) | कृषकः | गुडं निर्माति । | (इक्षवः) |
| (iv) | गणकः | रूप्यकाणि गणयति । | (अङ्गुल्यः) |
| (v) | छात्रस्य | अध्यापकः क्रुद्धः । | (अनुपस्थितिः) |
| (vi) | सुग्रीवः | सह युद्धं कृतवान् । | (वाली) |
| (vii) | गृहस्थः | सह सम्भाषणं करोति । | (अतिथिः) |
| (viii) | पुरोहितः | सह परामृशति । | (अनुष्ठाता) |
| (ix) | प्राणिनः | विना न जीवन्ति । | (वायुः) |
| (x) | बालः | सह क्रीडति । | (सम्बन्धिनौ) |

| | | | |
|---|---|---|---|
| (xi) | बालकः | सुन्दरः । | (वपुः) |
| (xii) | बालिका | तीक्ष्णा । | (बुद्धिः) |
| (xiii) | | मनः पूतं भवति । | (तपः) |
| (xiv) | वैज्ञानिकाः | ऊर्जाम् उत्पादयन्ति । | (परमाणवः) |
| (xv) | पद्मकुमारः | कार्यं साधयति । | (युक्तिः) |

**3. अधोनिर्दिष्टानां पदानां त्रिषु वचनेषु तृतीयान्तरूपाणि लिखत—**

[ अधोनिर्दिष्ट पदों के तीनों वचनों में तृतीयान्त रूप लिखें। **Write the instrumental forms of the words given below in all the number.** ]

| | पदानि | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | पाणिः | पाणिना | पाणिभ्याम् | पाणिभिः |
| (i) | गिरिः | | | |
| (ii) | वाक् | | | |
| (iii) | अधिकारी | | | |
| (iv) | मणिः | | | |
| (v) | गुरुः | | | |
| (vi) | धाता | | | |
| (vii) | रज्जुः | | | |
| (viii) | मनः | | | |
| (ix) | अभिमन्युः | | | |
| (x) | माता | | | |
| (xi) | तपः | | | |
| (xii) | वपुः | | | |
| (xiii) | ब्रह्मा | | | |
| (xiv) | धनुः | | | |

4. **उदाहरणानुसारं रूपदृष्ट्या समाने पदे चित्वा तयोः तृतीयारूपं लिखत–**
[ उदाहरण के अनुसार रूप की दृष्टि से सदृश दो पदों को चुनकर तृतीयान्त रूप लिखें। Write the instrumental forms of two words which are similar as per the declension as shown in the example. ]

| | | | | |
|---|---|---|---|---|
| उदा. | (क) तपस्वी | (i) | गुरुः | **(क) तपस्विना** (vii) **यशस्विना** |
| | (ख) इक्षुः | (ii) | वपुः | |
| | (ग) माता | (iii) | वयः | |
| | (घ) पयः | (iv) | स्वसा | |
| | (ङ) पिपासुः | (v) | भूः | |
| | (च) वर्म | (vi) | श्रीमान् | |
| | (छ) हिमवान् | (vii) | यशस्वी | |
| | (झ) भूपतिः | (viii) | जटायुः | |
| | (ज) धनुः | (ix) | श्रीपतिः | |
| | (ञ) भ्रूः | (x) | चर्म | |

5. **उदाहरणानुसारं तृतीयान्तपदानां प्रथमा-रूपाणि प्रातिपदिकं च लिखत–**
[ उदाहरण के अनुसार तृतीयान्त पदों के प्रथमान्त रूप एवं प्रातिपदिक लिखें। Write the base and nominal forms of the given words ending with instrumental cases. ]

| | | | | |
|---|---|---|---|---|
| उदा. | प्रतिकृत्या | प्रतिकृतिभ्याम् | प्रतिकृतिभिः | **प्रातिपदिकम्** |
| | **प्रतिकृतिः** | **प्रतिकृती** | **प्रतिकृतयः** | **प्रतिकृति** |
| (i) | उरसा | उरोभ्याम् | उरोभिः | |
| (ii) | बन्धुना | बन्धुभ्याम् | बन्धुभिः | |
| (iii) | सम्पदा | सम्पद्भ्याम् | सम्पद्भिः | |

| | | | |
|---|---|---|---|
| (iv) | विजयिना | विजयिभ्याम् | विजयिभिः |
| (v) | वचसा | वचोभ्याम् | वचोभिः |
| (vi) | जगता | जगद्भ्याम् | जगद्भिः |
| (vii) | शर्मणा | शर्मभ्याम् | शर्मभिः |
| (viii) | दिशा | दिग्भ्याम् | दिग्भिः |
| (ix) | धनुषा | धनुर्भ्याम् | धनुर्भिः |

सुभाषितेषु तृतीयाप्रयोगाः

# सुभाषितानि

मणिना वलयं वलयेन मणिर्मणिना वलयेन विभाति करः ।
कविना च विभुर्विभुना च कविः कविना विभुना च विभाति सभा ॥

शशिना च निशा निशया च शशी शशिना निशया च विभाति नभः ।
पयसा कमलं कमलेन पयः पयसा कमलेन विभाति सरः ॥

दुर्जनः परिहर्तव्यः विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥

क्षमया दयया प्रेम्णा सूनृतेनार्जवेन च ।
वशीकुर्याज्जगत् सर्वं विनयेन च सेवया ॥

मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।
मन्त्रवद्रक्षयेद् गूढं कार्ये चापि नियोजयेत् ॥

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥

कर्मणा बाध्यते बुद्धिर्न बुद्ध्या कर्म बाध्यते ।
सुबुद्धिरपि यद् रामो हैमं हरिणमन्वगात् ॥

द्विषद्भिः शत्रुभिः कश्चित् कदाचित् पीड्यते न वा ।
इन्द्रियैर्बाध्यते सर्वः सर्वत्र च सदैव च ॥

◆◆◆

अनुवर्तते

**कथायां तृतीयाप्रयोगाः**

## मित्रसम्प्राप्तिः

...... कपोतराजः चित्रग्रीवः अपि सर्वैः कपोतैः पक्षिभिः च सह जाले बद्धः अभवत् । सः बुद्ध्या एकम् उपायं चिन्तितवान् । सः सर्वान् कपोतान् अवदत्– 'भोः कपोताः भीत्या विना अवधानेन मम वचनं शृण्वन्तु । वयं सर्वे हेलया युगपत् उड्डयनं कुर्मः, मम सख्या हिरण्यकेन मूषिकेण सह मिलामः, तेन मुक्तिं प्राप्स्यामः' । तैः पक्षिभिः साकं कपोतराजः जालेन सहितः उड्डयनम् अकरोत् । सर्वे कपोताः चित्रग्रीवस्य युक्त्या व्याधस्य दृष्टेः दूरम् अगच्छन् । लघुपतनकः वायसः अपि 'कुत्र एते गच्छन्ति' इति मत्या तेषां पृष्ठतः अगच्छत् ।



चित्रग्रीवः कपोतराजः स्वनिर्दिष्टेन पथा सर्वैः पक्षिभिः सह मित्रस्य मूषिकस्य बिलं प्राप्तवान् । हिरण्यकेन आखुना सह चित्रग्रीवस्य प्राचीना मैत्री आसीत् । हिरण्यकः कपोतराजं सपरिवारं जालेन बद्धं दृष्ट्वा दुःखितेन मनसा सर्वं वृत्तान्तम् अपृच्छत्, ज्ञात्वा च दन्तैः जालम् अकृन्तत् । सर्वे कपोताः मुक्ताः अभवन् । ततः प्रीत्या स्वं स्वं आश्रयस्थानम् अगच्छन् ।



लघुपतनकः मूषिकस्य सुवृत्त्या प्रसन्नः अभवत् । बुद्धिमता आखुना हिरण्यकेन सह वायसः लघुपतनकः अपि मैत्रीं कर्तुम् ऐच्छत् । तदर्थं सः हिरण्यकस्य बिलद्वारम् आगत्य तम् अवदत्– 'भोः हिरण्यक ! अहं त्वया सह मैत्रीं कर्तुम् इच्छामि' । भवान् कृपया बहिः आगच्छतु । वायसस्य वचनं श्रुत्वा हिरण्यकः अवदत्– 'अहो ! वायस! त्वम् इतः गच्छ । त्वया वैरिणा सह मम मैत्री कथम् ?' लघुपतनकः अपृच्छत्– भो हिरण्यक ! एतावता आवयोः दर्शनम् एव नास्ति । तर्हि कथम् अहं तव वैरी अभवम् । हिरण्यकः प्रत्यवदत्– 'वैरं द्विविधं भवति– सह स्थित्या जन्मना च । तत्र सहस्थित्या वैरं तु कदाचित् समाप्तं भवति, किन्तु जन्मना वैरं तु सर्वदा तिष्ठति । यथा– नकुलानाम् अहिभिः, नखायुधानां शष्पभोजिभिः, जलस्य वह्निना, शुनां मार्जारैः, दैत्यानां देवैः, दरिद्राणां धनिकैः, सिंहानां हस्तिभिः, लुब्धकानां हरिणैः, मूर्खाणां विद्वद्भिः, कुलटानां पतिव्रताभिः, सताम् असद्भिः, गुणरहितानां च गुणिभिः सह ।

एतत् श्रुत्वा वायसः अवदत्– यदि त्वं बहिः आगत्य मैत्रीं कर्तुं न इच्छसि तर्हि बिलस्थः भूत्वा एव मया सह मैत्र्या प्रतिदिनं गोष्ठीं कुरु । अहम् अपि बहिः स्थित्वा मैत्रीं निर्वहामि । हिरण्यकः वायसस्य वचसा मैत्रीं कर्तुं सम्मतः अभवत् । तदनन्तरम् उभौ सुभाषितगोष्ठ्या सुखेन कालम् अनयताम् । शनैः शनैः उभयोः मैत्री वृद्धिं गता । पश्चात् हिरण्यकः वायसे विश्वस्तः बहिः आगत्य तेन सह एकत्र एव उपविश्य गोष्ठीं करोति स्म ।

क्रमशः .....

# द्वितीयः स्तबकः
## 2.3 तृतीयः पाठः
## [ चतुर्थी विभक्तिः ]

**अजन्तशब्दानां चतुर्थीप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



नृपतिः **महर्षये** ग्रन्थं समर्पयति।



गृहस्थः **महर्षिभ्यां** वस्त्राणि ददाति।



श्रद्धालुः **महर्षिभ्यः** फलानि ददाति।



महिला **तरवे** जलं ददाति।



युवकः **तरुभ्यां** जलं ददाति



कृषकः **तरुभ्यः** जलं ददाति।



सचिवः **कार्यकर्त्रे** पत्रं ददाति।



अध्यक्षः **कार्यकर्तृभ्यां** पुष्पहारं ददाति।



अधिकारी **कार्यकर्तृभ्यः** पुरस्कारं ददाति।

**स्त्री.**



युवकः **युवत्यै** पुस्तकं ददाति ।



आपणिकः **युवतिभ्यां** वस्त्राणि ददाति ।



मन्त्रिणी **युवतिभ्यः** पुरस्कारं यच्छति ।



पिता **पुत्र्यै** कङ्कणं ददाति ।



माता **पुत्रीभ्यां** परिधानानि ददाति ।



विनायकः **पुत्रीभ्यः** चाकलेहं ददाति ।



स्वामी **धेनवे** ग्रासं ददाति ।



गृहिणी **धेनुभ्यां** रोटिकाः ददाति ।



गोपालः **धेनुभ्यः** अन्नं ददाति ।



आयोजकः **अभिनेत्र्यै** धनं ददाति ।



नेता **अभिनेत्रीभ्यां** पुरस्कारं ददाति ।



पत्रवाहकः **अभिनेत्रीभ्यः** पत्राणि ददाति ।

## अजन्तशब्दानां चतुर्थीप्रयोगाः

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**

| | | |
|---|---|---|
| **कवये** काव्यं रोचते। | **कविभ्यां** काव्यं रोचते। | **कविभ्यः** काव्यं रोचते। |
| **गुरवे** दक्षिणां ददाति। | **गुरुभ्यां** दक्षिणां ददाति। | **गुरुभ्यः** दक्षिणां ददाति। |
| इदं दधि **भ्रात्रे** अस्ति। | इदं दधि **भ्रातृभ्याम्** अस्ति। | इदं दधि **भ्रातृभ्यः** अस्ति। |
| **गवे** ग्रासं देहि। | **गोभ्यां** ग्रासं देहि। | **गोभ्यः** ग्रासं देहि। |

**स्त्री.**

| | | |
|---|---|---|
| **युवत्यै** एतत् ददातु। | **युवतिभ्याम्** एतत् ददातु। | **युवतिभ्यः** एतत् ददातु। |
| **धेन्वै** आहारः कल्पितः अस्ति। | **धेनुभ्याम्** आहारः कल्पितः अस्ति। | **धेनुभ्यः** आहारः कल्पितः अस्ति। |
| **वध्वै** शाटिकां ददातु। | **वधूभ्यां** शाटिकां ददातु। | **वधूभ्यः** शाटिकां ददातु। |
| **स्वस्रे** न असूय। | **स्वसृभ्यां** न असूय। | **स्वसृभ्यः** न असूय। |

**नपुं.**

**दध्ने** दुग्धम् आवश्यकम्।

**मधुने** मधुमक्षिकाणां पालनम् आवश्यकम्।

## अजन्तशब्दानां चतुर्थीरूपाणि

**अधोनिर्दिष्टानि रूपाणि पठत–**

[ अधोनिर्दिष्ट रूपों को पढ़ें। Read the following sentences. ]

### पुं.

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| इकारान्तः | (कवि) | कवये | कविभ्याम् | कविभ्यः |
| उकारान्तः | (गुरु) | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| ऋकारान्तः | (भ्रातृ) | भ्रात्रे | भ्रातृभ्याम् | भ्रातृभ्यः |
| ओकारान्तः | (गो) | गवे | गोभ्याम् | गोभ्यः |

### स्त्री.

| | | | | |
|---|---|---|---|---|
| इकारान्तः | (कृति) | कृत्यै | कृतिभ्याम् | कृतिभ्यः |
| उकारान्तः | (धेनु) | धेन्वै | धेनुभ्याम् | धेनुभ्यः |
| ऊकारान्तः | (वधू) | वध्वै | वधूभ्याम् | वधूभ्यः |
| ऋकारान्तः | (स्वसृ) | स्वस्रे | स्वसृभ्याम् | स्वसृभ्यः |

### नपुं.

| | | | | |
|---|---|---|---|---|
| इकारान्तः | (दधि) | दध्ने | दधिभ्याम् | दधिभ्यः |
| उकारान्तः | (मधु) | मधुने | मधुभ्याम् | मधुभ्यः |

## अभ्यासः — 57

✍ **यथोदाहरणं चतुर्थ्याः एकवचनरूपेण रिक्तस्थानं पूरयत–**

[ उदाहरण के अनुसार चतुर्थी एकवचन रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with dative singular as shown in the example. ]

उदा. मुनि ........**मुनये**........ → अत्र न् + (इ) = नि ↓ न् + (अये) = नये **परिवर्तनम्**

| | | | | | |
|---|---|---|---|---|---|
| 1. | कवि | – | 6. | विधि | – |
| 2. | तिथि | – | 7. | निधि | – |
| 3. | ऋषि | – | 8. | गिरि | – |
| 4. | बुद्धि | – | 9. | अग्नि | – |
| 5. | विरञ्चि | – | 10. | रुचि | – |

उदा. गुरु ........**गुरवे**........ → अत्र र् + (उ) = रु ↓ र् + (अवे) = रवे **परिवर्तनम्**

| | | | | | |
|---|---|---|---|---|---|
| 11. | भानु | – | 16. | धेनु | – |
| 12. | रिपु | – | 17. | रेणु | – |
| 13. | विष्णु | – | 18. | चञ्चु | – |
| 14. | शम्भु | – | 19. | वायु | – |
| 15. | शिशु | – | 20. | विधु | – |

उदा. मातृ ........**मात्रे**........ → अत्र त् + (ऋ) = तृ ↓ त् + (रे) = त्रे **परिवर्तनम्**

| | | | | | |
|---|---|---|---|---|---|
| 21. | वक्तृ | – | 26. | पितृ | – |

22. जामातृ –
23. कर्तृ –
24. धातृ –
25. दातृ –
27. स्वसृ –
28. दुहितृ –
29. भर्तृ –
30. भ्रातृ –

**उदा.** वधू ............**वध्वै**........ → अत्र ध् + (ऊ) = धू
↓ **परिवर्तनम्**
ध् + (वै) = ध्वै

**उदा.** श्वश्रू ............**श्वश्र्वै**........ → श्र् + (ऊ) = श्रू
↓ **परिवर्तनम्**
श्र् + (वै) = श्र्वै

**उदा.** मधु ............**मधुने**........ → अत्र शब्दस्य अन्ते
↓
(ने) – इति श्रूयते

31. जानु –
32. वस्तु –
33. तालु –
34. वारि* –
35. लघु –
36. पटु –
37. अम्बु –
38. सानु –

**चतुर्थ्याः एकवचने विशिष्टरूपाणि**

पति – पत्ये, दधि – दध्ने, अक्षि – अक्ष्णे,
अस्थि – अस्थ्ने, स्वयम्भू – स्वयम्भुवे।

* वारि इत्यत्र अन्तिमवर्णस्य 'ने'-इत्यस्य स्थाने 'णे' भवति।

**चतुर्थ्याः द्विवचने बहुवचने च रूपाणि पठत—**

[ चतुर्थी द्विवचनान्त एवं बहुवचनान्त रूपों को पढ़ें। Read the dual and plural forms of dative.]

| | **द्वि.** | **बहु.** |
|---|---|---|
| **हरि** | हरिभ्याम् | हरिभ्यः |
| **पितृ** | पितृभ्याम् | पितृभ्यः |
| **दधि** | दधिभ्याम् | दधिभ्यः |
| **मधु** | मधुभ्याम् | मधुभ्यः |

## अभ्यासः — 58

**चतुर्थ्याः द्विवचनेन बहुवचनेन च रिक्तस्थानानि पूरयत—**

[ चतुर्थी द्विवचनान्त एवं बहुवचनान्त रूपों से रिक्तस्थान भरें। Fill in the blanks with dative dual and plural forms. ]

1. शम्भु ।
2. मातृ ।
3. विधि ।
4. वधू ............................ ।
5. स्वयम्भू ।
6. धेनु ।
7. दधि ............................ ।
8. भ्रातृ ।
9. गो ।
10. स्वसृ ।

**अवधेयम्**

तृतीयायाः द्विवचने, चतुर्थ्याः द्विवचने, पञ्चम्याः द्विवचने तथा चतुर्थ्याः बहुवचने, पञ्चम्याः बहुवचने च रूपाणि समानानि भवन्ति।

## हलन्तशब्दानां चतुर्थीप्रयोगाः

### अधोलिखितानि वाक्यानि पठत–

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

पुं.



राजा **विदुषे** ग्रन्थं ददाति।



सचिवः **विद्वद्भ्यां** पुरस्कारं ददाति।



प्रधानमन्त्री **विद्वद्भ्यः** सम्मानपत्रं ददाति।



राजा **मन्त्रिणे** आदेशं ददाति।



राजा **मन्त्रिभ्यां** सन्देशपत्रे ददाति।



राजा **मन्त्रिभ्यः** पुरस्कारं ददाति।



मन्त्री **राज्ञे** मन्त्रणां ददाति।



गुरुः **राजभ्याम्** अभयं ददाति।



साधुः **राजभ्यः** आशिषं यच्छति।

**स्त्री.**



देवराजः **अप्सरसे** पुष्पं ददाति।



देवराजः **अप्सरोभ्यां** पुष्पाणि ददाति।



देवराजः **अप्सरोभ्यः** पुष्पाणि ददाति।



राजा **योषिते** उपहारं ददाति।



राजा **योषिद्भ्यां** उपहारं ददाति।



राजा **योषिद्भ्यः** उपहारं ददाति।

**नपुं.**



**चक्षुषे** पथ्यम्।



**चक्षुर्भ्याम्** उपनेत्रम्।




**चक्षुर्भ्यः** कज्जलम्।



**वपुषे** कवचम्।



**वपुर्भ्यां** कवचद्वयम्।



**वपुर्भ्यः** कवचानि।

**हलन्तशब्दानां चतुर्थीप्रयोगाः**

### अधोनिर्दिष्टवाक्यानि अवधानपूर्वकं पठत—

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read these sentences carefully. ]

**पुं.**

| | | |
|---|---|---|
| **मरुते** वातायनम् उद्घाटयतु। | शीतोष्णाभ्यां **मरुद्भ्यां** सावधानः तिष्ठतु। | प्रचण्डेभ्यः **मरुद्भ्यः** रक्षणोपायं चिन्तयतु। |
| **धीमते** धौतवस्त्रम् अस्ति। | **धीमद्भ्यां** धौतवस्त्रे स्तः। | **धीमद्भ्यः** धौतवस्त्राणि सन्ति। |
| **मन्त्रिणे** स्थानम् अस्ति। | **मन्त्रिभ्यां** स्थानम् अस्ति। | **मन्त्रिभ्यः** स्थानम् अस्ति। |
| **महते** देवाय देहि। | **महद्भ्यां** विप्राभ्याम् एकैकां धेनुं देहि। | **महद्भ्यः** विप्रेभ्यः दक्षिणां देहि। |
| **राज्ञे** मालाम् अर्पयति। | **राजभ्यां** फलानि अर्पयति। | **राजभ्यः** वस्त्राणि अर्पयति। |

**स्त्री.**

**सरिते** मेघः वर्षति।

**प्रावृषे** चातकः व्यग्रः भवति।

**आशिषे** वाक्यं लिखतु।

**नपुं.**

काव्यं **यशसे** भवति।

सहस्र-**नाम्ने** विष्णवे नमः।

अस्य **वपुषे** वस्त्रं लघु भवेत्।

**स्थूलवपुषे** मेदोयुक्तं भोजनं न ददातु।

**अवधेयम्**

येषां द्विवचन-बहुवचन-रूपाणां प्रयोगः विरलः तादृशानाम् उदाहरणानि अत्र न दर्शितानि।

## हलन्तशब्दानां चतुर्थीरूपाणि

### अधोनिर्दिष्टरूपाणि अवधानपूर्वकं पठत–

[ अधोनिर्दिष्ट रूपों को ध्यान से पढें। Read these declension carefully. ]

**पुं.**

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| तकारान्तः | (मरुत्) | मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| तकारान्तः | (महत्) | महते | महद्भ्याम् | महद्भ्यः |
| नकारान्तः | (मन्त्रिन्) | मन्त्रिणे | मन्त्रिभ्याम् | मन्त्रिभ्यः |
| नकारान्तः | (आत्मन्) | आत्मने | आत्मभ्याम् | आत्मभ्यः |
| नकारान्तः | (राजन्) | राज्ञे | राजभ्याम् | राजभ्यः |

**स्त्री.**

| | | | | |
|---|---|---|---|---|
| तकारान्तः | (सरित्) | सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| षकारान्तः | (प्रावृष्) | प्रावृषे | प्रावृड्भ्याम् | प्रावृड्भ्यः |
| षकारान्तः | (आशिष्) | आशिषे | आशीर्भ्याम् | आशीर्भ्यः |

**नपुं.**

| | | | | |
|---|---|---|---|---|
| तकारान्तः | (बृहत्) | बृहते | बृहद्भ्याम् | बृहद्भ्यः |
| नकारान्तः | (नामन्) | नाम्ने | नामभ्याम् | नामभ्यः |
| षकारान्तः | (वपुष्) | वपुषे | वपुर्भ्याम् | वपुर्भ्यः |
| सकारान्तः | (मनस्) | मनसे | मनोभ्याम् | मनोभ्यः |

## अभ्यासः — 59

✍ **यथोदाहरणं चतुर्थ्याः एकवचने रूपं पूरयत—**

[ उदाहरण के अनुसार चतुर्थी एकवचनान्त रूप से रिक्त स्थान की पूर्ति करें । Fill in the blanks with dative singular. ]

**उदा.** आत्मन् ........**आत्मने**........ → अत्र शब्दस्य अन्तिमे व्यञ्जने **एकारः** श्रूयते

| | | | | | |
|---|---|---|---|---|---|
| 1. | मरुत् | । | 5. | स्रज् | । |
| 2. | मन्त्रिन् | । | 6. | गच्छत् | । |
| 3. | ऋत्विज् | । | 7. | प्रावृष् | । |
| 4. | मनस् | । | 8. | आशिष् | । |

☞ **हलन्तशब्दानां चतुर्थ्याः एकवचने विशिष्टरूपाणि—**

**राजन्** राज्ञे, **युवन्** यूने, **नामन्** नाम्ने, **सीमन्** सीम्ने, **विद्वस्** विदुषे ।

## अभ्यासः — 60

✍ **अधोनिर्दिष्टानां शब्दानां चतुर्थ्याः एकवचने रूपाणि लिखत—**

[ अधोनिर्दिष्ट शब्दों के चतुर्थी एकवचनान्त रूप लिखें । Write the dative singular forms of the following words. ]

| | | | | | |
|---|---|---|---|---|---|
| 1. | मधु | । | 11. | स्वसृ | । |
| 2. | हरि | । | 12. | दधि | । |
| 3. | भानु | । | 13. | वेधस् | । |
| 4. | मन्त्रिन्* | । | 14. | कवि | । |
| 5. | आशिष् | । | 15. | भूपति | । |
| 6. | सरित् | । | 16. | स्वयम्भू | । |
| 7. | मनस् | । | 17. | अतिथि | । |
| 8. | नामन् | । | 18. | वस्तु | । |
| 9. | वधू | । | 19. | धूलि | । |
| 10. | मातृ | । | 20. | क्षुध् | । |

* **मन्त्रिन्**— मन्त्रिणे

**विवरणम्**

☞ **चतुर्थ्याः द्विवचने / बहुवचने च प्रातिपदिके तृतीयावत् परिवर्तनं भवति –**

**यथा** मरुद्भ्याम् मरुद्भिः – तृतीया

मरुद्भ्याम् मरुद्भ्यः – चतुर्थी

**तृतीयायाः द्विवचन-बहुवचनयोः नियमान् स्मरत–**

[ तृतीया के द्विवचन एवं बहुवचन नियमों को याद करें । Remember the rules of dual and plural forms of instrumental case. ]

- प्रातिपदिकं तकारान्तं चेत् चतुर्थ्याः द्विवचने बहुवचने च तकारस्य दकारः ।
- प्रातिपदिकं नकारान्तं चेत् नकारलोपः ।
- प्रातिपदिकं जकारान्तं चेत् गकारः ।

## • अभ्यासः – 61

✍ **अधोनिर्दिष्टानां पदानां प्रातिपदिकं लिखित्वा चतुर्थ्याः द्विवचन-बहुवचनरूपाणि लिखत–**

[ अधोनिर्दिष्ट शब्दों के मूलरूप लिखते हुए चतुर्थी द्विवचनान्त बहुवचनान्त रूपों को लिखें । Write the crude forms of the following words along with their dative dual as well as plural forms. ]

| प्रथमैकवचनम् | प्रातिपदिकम् | चतुर्थी-द्विवचनम् | चतुर्थी-बहुवचनम् |
|---|---|---|---|
| उदा. सरित् | **सरित्** | **सरिद्भ्याम्** | **सरिद्भ्यः** |
| 1. जगत् | | | |
| 2. भगवान् | | | |
| 3. गच्छन् | | | |
| 4. श्रीमान् | | | |
| 5. करी | **करिन्** | | |
| 6. ब्रह्मा | **ब्रह्मन्** | | |
| 7. नाम | | | |
| 8. आत्मा | | | |
| 9. राजा | | | |
| 10. स्रक् | **स्रज्** | | |
| 11. भिषक् | | | |
| 12. वणिक् | | | |

| प्रथमैकवचनम् | प्रातिपदिकम् | चतुर्थी-द्विवचनम् | चतुर्थी-बहुवचनम् |
|---|---|---|---|
| 13. ऋत्विक् | | | |
| 14. वेधाः | वेधस् | | |
| 15. पयः | | | |
| 16. अप्सराः | | | |
| 17. हविः | | | |
| 18. चक्षुः | | | |
| 19. वपुः | | | |
| 20. धनुः | | | |

## अभ्यासः – 62

**मञ्जूषा-निर्दिष्टेभ्यः पदेभ्यः यथानिर्देशं चतुर्थीविभक्ति-रूपाणि स्वीकृत्य यथास्थानं लिखत–**

[मञ्जूषा में दिये हुऐ पदों में से यथानिर्देश चतुर्थी विभक्ति रूपों को चुनकर यथास्थान लिखें। Pick up the dative words from the box and write them in appropriate column as pointed out. ]

1. अजन्त-पुंलिङ्गशब्दाः
   ।
   ।
   ।

2. अजन्त-स्त्रीलिङ्गशब्दाः
   ।
   ।
   ।
   ।

3. अजन्त-नपुंसकलिङ्गशब्दाः
   ।
   ।

4. हलन्त-पुंलिङ्गशब्दाः
   ।
   ।
   ।
   ।

5. हलन्त-स्त्रीलिङ्गशब्दाः
   ।
   ।
   ।

6. हलन्त-नपुंसकलिङ्गशब्दाः
   ।
   ।
   ।

| | | | | | | |
|---|---|---|---|---|---|---|
| कवये, | मतये, | दध्ने, | मनसे, | सरिते, | मरुते, | गुरवे, |
| कृतये, | मधुने, | वपुषे, | प्रावृषे, | मन्त्रिणे, | भ्रात्रे, | धेनवे, |
| नाम्ने, | आशिषे, | वध्वै, | राज्ञे, | आत्मने | | |

## अभ्यासः – 63

**कस्मै किं प्रदीयते दत्तं वा इति क्रमशः लिखत–**

[ किस को दिया जा रहा है यह क्रम से लिखें। Write serially to whom it is given. ]

| | | | | |
|---|---|---|---|---|
| उदा. | कविः | श्रेष्ठाय | **कवये** | राजा उपायनं ददाति। |
| 1. | क्रीडापटुः | उत्तमाय | ........ | आयोजकाः धनं दत्तवन्तः। |
| 2. | प्रतिस्पर्धी | उत्साहिने | ........ | सर्वे पारितोषिकं यच्छन्ति। |
| 3. | शिल्पी | अनुभविने | ........ | व्यवस्थापकः कार्यं ददाति। |
| 4. | विज्ञानी | तीक्ष्णमतये | ........ | राष्ट्रपतिः पुरस्कारं प्रदत्तवान्। |
| 5. | भिषक् | समर्थाय | ........ | रोगी धन्यवादान् समर्पितवान्। |

## अभ्यासः – 64

**कस्मै किं/के/कानि रोचते/रोचेते/रोचन्ते, किं/के/कानि न रोचते/रोचेते/रोचन्ते इति यथोदाहरणं लिखत-**

[ किस को क्या अच्छा लगता है और क्या अच्छा नहीं लगता है यह उदाहरण के अनुसार लिखें। Write who likes and does not like what as shown in the example. ]

उदा. विद्वान् | शास्त्राभ्यासः ✓ | कोलाहलः × |

**विदुषे** शास्त्राभ्यासः रोचते ।

**विदुषे** कोलाहलः न रोचते ।

1. हनूमान् | रावणः × | रामः ✓ |

........................................ ।

........................................ ।

2. शिशुः | मधुरम् ✓ | तिक्तम् × |

........................................ ।

........................................ ।

| | | | |
|---|---|---|---|
| 3. | गुरुः | बुद्धिमन्तः √ | कोलाहलकर्तारः × । |

............................................................................................................................ ।

। 

| | | | |
|---|---|---|---|
| 4. | रामः | दधिमधुनी √ | पलाण्डु-लशुने × । |

............................................................................................................................ ।

। 

| | | | |
|---|---|---|---|
| 5. | माता | पठनम् √ | लेखनम् × । |

।

।

| | | | |
|---|---|---|---|
| 6. | मल्लः | दुग्ध-घृते √ | पठन-पाठने × । |

।

।

| | | | |
|---|---|---|---|
| 7. | धेनुः | फलम् × | तृणम् √ । |

।

।

| | | | |
|---|---|---|---|
| 8. | राजा | वीराः √ | भीरवः × । |

।

।

## अभ्यासः – 65

**कः कस्मै क्रुध्यति इति यथोदाहरणं लिखत–**

[ "कौन किस पर कोप करता है"– उदाहरण के अनुसार लिखें। Write "Who gets angry on whom" as shown in the example. ]

| | | | | |
|---|---|---|---|---|
| उदा. | राहुः | **भानवे** | क्रुध्यति । | (भानुः) |
| 1. | रामशर्मा | | क्रुध्यति । | (सोमशर्मा) |
| 2. | भिषक् | | क्रुध्यति । | (रोगी) |
| 3. | रोगी | | क्रुध्यति । | (भिषक्) |
| 4. | मन्त्री | | क्रुध्यति । | (अधिकारी) |
| 5. | भ्राता | | क्रुध्यति । | (भ्राता) |
| 6. | बन्धुः | | क्रुध्यति । | (बन्धुः) |

## अभ्यासः – 66

**कः कस्मै असूयति लिखत–**

[ कौन किस से असूया करता है - लिखें। Write who gets envy of whom. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | अधिवक्ता | – | अधिवक्ता | → | **अधिवक्ता अधिवक्त्रे असूयति** | । |
| | विरोधी | – | प्रधानमन्त्री | → | 1. | । |
| | भिषक् | – | भिषक् | → | 2. | । |
| | अभियन्ता | – | अभियन्ता | → | 3. | । |
| | सा | – | भवान् | → | 4. | । |
| | निर्धनः | – | धनवान् | → | 5. | । |
| | मूर्खः | – | विद्वान् | → | 6. | । |

## अभ्यासः – 67

✍ **कः कस्मै ईर्ष्यति इति लिखत–**

[ कौन किस से ईर्ष्या करता है लिखें। Write who gets jeolous of whom. ]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| उदा. | राहुः | **भानवे** ईर्ष्यति। | (भानु) | 3. | सः | ईर्ष्यति। | (अधिवक्ता) |
| 1. | दुष्टः | ईर्ष्यति। | (गुणवान्) | 4. | सुरेशः | ईर्ष्यति। | (भ्राता) |
| 2. | दरिद्रः | ईर्ष्यति। | (धनवान्) | 5. | शुक्राचार्यः | ईर्ष्यति। | (देवगुरुः) |

## अभ्यासः – 68

✍ **कः कस्मै द्रुह्यति इति लिखत–**

[ कौन किस से द्रोह करता है लिखें। Write who rebels against whom. ]

| | | | | |
|---|---|---|---|---|
| उदा. | कौरवाः | - | अभिमन्युः | **कौरवाः अभिमन्यवे द्रुह्यन्ति** । |
| 1. | विपक्षः | - | मुख्यमन्त्री | ........ **द्रुह्यति** । |
| 2. | शत्रुः | - | राजा | ........ **द्रुह्यति** । |
| 3. | प्रतिवेशी | - | भ्राता | **द्रुह्यति** । |
| 4. | भृत्यः | - | भूस्वामी | **द्रुह्यति** । |
| 5. | चोरः | - | धनवान् | ........ **द्रुह्यति** । |

## अभ्यासः – 69

✍ **कः कस्मै स्पृहयति इति लिखत–**

[ कौन किस से स्पृहा करता है लिखें। Write who likes whom. ]

| | | | | |
|---|---|---|---|---|
| उदा. | बालाः | **प्राणिभ्यः** | (प्राणिनः) | स्पृहयन्ति। |
| 1. | कृष्णः | | (धेनवः) | स्पृहयति। |
| 2. | राजा | | (विद्वांसः) | स्पृहयति। |
| 3. | भोजः | | (कवयः) | स्पृहयति। |
| 4. | सज्जनाः | | (साधवः) | स्पृहयन्ति। |
| 5. | सर्वे | | (सम्पत्) | स्पृहयन्ति। |

## अभ्यासः – 70

उदाहरणानुसारं चतुर्थ्याः एकवचने बहुवचने च वाक्यानि रचयत–

[उदाहरण के अनुसार चतुर्थी एकवचनान्त तथा बहुवचनान्त रूपों से वाक्य बनाएँ। Make sentences with singular and plural forms of dative as shown in the example.]

| | | | | |
|---|---|---|---|---|
| उदा. **विदुषे** (विद्वान्) नमः । **विद्वद्भ्यः** नमः । | 3. | (सरित्) नमः । | | नमः । |
| 1. (राजा) नमः । | नमः । 4. | (गुरुः) नमः । | | नमः । |
| 2. (धीमान्) नमः । | नमः । 5. | (पिता) नमः । | | नमः । |

## अभ्यासः – 71

उदाहरणानुसारं चतुर्थ्याः द्विवचने बहुवचने च वाक्यानि रचयत–

[उदाहरण के अनुसार चतुर्थी द्विवचनान्त तथा बहुवचनान्त रूपों से वाक्य बनाएँ। Make sentences with dual and plural forms of dative.]

| | | | | | |
|---|---|---|---|---|---|
| उदा. | **पशुभ्याम्** | (पशु) | स्वस्ति । | **पशुभ्यः** | स्वस्ति । |
| 1. | | (जन्तु) | स्वस्ति । | | स्वस्ति । |
| 2. | | (शिशु) | स्वस्ति । | | स्वस्ति । |
| 3. | | (प्राणिन्) | स्वस्ति । | | स्वस्ति । |
| 4. | | (धीमत्) | स्वस्ति । | | स्वस्ति । |
| 5. | | (साधु) | स्वस्ति । | | स्वस्ति । |

## अभ्यासः – 72

उदाहरणानुसारं चतुर्थ्यन्तरूपेण रिक्तस्थानं पूरयत–

[उदाहरण के अनुसार चतुर्थ्यन्त रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the dative forms as shown in the example.]

| | | | | |
|---|---|---|---|---|
| उदा. | कविः | **पशुभ्यः** | (पशुः) | काव्यं न लिखति । |
| 1. | तस्य | | (श्रेयः) | प्रार्थनां करोतु । |
| 2. | सा | | (तृप्तिः) | कार्यं करोति । |
| 3. | कर्मनिष्ठाः | | (कीर्तिः) | कार्यं न कुर्वन्ति । |
| 4. | ज्येष्ठानाम् | | (आशिष्) | सर्वे स्पृहयन्ति । |
| 5. | | | (शिशुः) | क्षीरं रक्षतु । |

## चतुर्थी विभक्तिः

## दीपावली

दीपावली अपि अस्माकं राष्ट्रियोत्सवः वर्तते। अस्मिन् उत्सवे सर्वे जनाः परस्परं भेदभावं विस्मृत्य आनन्दमग्नाः भवन्ति। बालाः वृद्धाः च **अस्मै उत्सवाय** प्रतीक्षारताः भवन्ति। अयं च महोत्सवः भारतवासिनां सर्वेषाम् अपि **महत्यै प्रसन्नतायै** भवति। त्रेतायुगे कैकेय्याः वरयाचनात् अयोध्यायाः राज्ञा दशरथेन **स्वपुत्राय रामाय** चतुर्दशानां वर्षाणां वनवासः प्रदत्तः आसीत्। तस्य अन्तिमे वर्षे लङ्कायां **निवसद्भ्यः दुष्टप्रकृतिभ्यः रक्षोभ्यः** समुचितं दण्डं प्रदाय श्रीरामः अस्मिन् एव दिने सीतालक्ष्मणाभ्यां सह अयोध्यां प्रत्यावर्तितवान्। एतस्मिन् शुभे अवसरे द्वाभ्यां भ्रातृभ्यां सह **सीतायै** स्वागतं व्याहर्तुम् अयोध्यावासिनः नगरे सर्वत्र दीपान् प्रज्वलितवन्तः। ततः आरभ्य अद्यावधि प्रतिवर्षं कार्त्तिकमासे अमावस्यायां तिथौ भारते दीपावली-महोत्सवः महता उत्साहेन आयोजितः भवति।



दीपावल्यां जनाः गृहाणि परिष्कुर्वन्ति। अस्मिन्नवसरे ते **स्वमित्रेभ्यः ज्ञातिभ्यः बन्धुभ्यः सुहृद्भ्यश्च** उपहारान् यच्छन्ति परस्परम् अभिनन्दन्ति च। **शिशुभ्यः** मधुरं रोचते। अतः **तेभ्यः** जनाः मधुरं यच्छन्ति। "**लक्ष्म्यै** नमः, **गणपतये** नमः" इति वदन्तः सर्वे लक्ष्मी-गणेशयोः पूजनं कुर्वन्ति। ग्रामीणाः पूर्वदिने एव **मृद्दीपेभ्यः** कुम्भकारस्य समीपं गच्छन्ति। **वर्णमयीभ्यः सिक्थवर्तिकाभ्यः** विपणीं गच्छन्ति। नगरे **वर्णयुक्तेभ्यः विद्युद्दीपेभ्यः** विद्युदापणे सम्मर्दः भवति।

शास्त्रे उक्तम् अस्ति यत् देवाः **पुष्पेभ्यः नैवेद्येभ्यः अर्घ्येभ्यः** च स्पृहयन्ति। अतः पूजकाः **देवेभ्यः देवीभ्यः** च पुष्पाणि नैवेद्यानि अर्घ्याणि च समर्पयन्ति। तैश्च सन्तुष्टाः देवाः **भक्तजनेभ्यः** आशिषः यच्छन्ति। पूजानन्तरं यजमानाः **पूजकेभ्यः** दक्षिणाः प्रददति। अस्मिन् दिने न कश्चित् **कस्मैचित्** क्रुध्यति, न वा **कस्मैचित्** द्रुह्यति। पितरः **स्वसन्ततिभ्यः** स्फोटनकानि ददति। यतो हि किशोराः **विलक्षणेभ्यः स्फोटनकेभ्यः** विशेषेण स्पृहयन्ति। प्रसन्नाः बालकाः बालिकाश्च **स्वमित्रेभ्यः सखिभ्यः** च उपहारान् यच्छन्ति। अस्मिन् महोत्सवे सर्वे **सर्वेभ्यः सुखाय समृद्धये** च शुभेच्छाः प्रकटयन्ति।

◆◆◆

## अभ्यासः — 73

1. **अधोलिखितानां वाक्यानाम् उत्तरं लिखत—**

[ अधोलिखित वाक्यों का उत्तर लिखें। Write answers for the following sentences. ]

(i) राज्ञा दशरथेन कस्मै वनवासः कल्पितः आसीत् ?

।

(ii) श्रीरामः केभ्यः दण्डं प्रदत्तवान् ?

।

(iii) अयोध्यावासिनः केभ्यः स्वागतं व्याहृतवन्तः ?

।

(iv) दीपावल्याः अवसरे जनाः केभ्यः उपहारं यच्छन्ति ?

।

(v) केभ्यः मधुरं रोचते ?

।

(vi) जनाः किम् उच्चार्य पूजनं कुर्वन्ति ?

।

(vii) जनाः केभ्यः तर्पणम् अर्पयन्ति ?

।

(viii) देवाः केभ्यः स्पृहयन्ति ?

।

(ix) यजमानाः केभ्यः दक्षिणाः प्रददति ?

।

(x) ग्रामीणाः किमर्थं कुम्भकारस्य समीपं गच्छन्ति ?

।

(xi) ते किमर्थं विपणीं गच्छन्ति ?

।

(xii) विद्युदापणे किमर्थं सम्मर्दः भवति ?

।

(xiii) किशोराः केभ्यः स्पृहयन्ति ?

।

(xiv) पितरः केभ्यः स्फोटनकानि ददति ?

।

(xv) सर्वे सर्वेभ्यः किमर्थं शुभेच्छाः ज्ञापयन्ति ?

।

2. **कोष्ठके लिखितानां पदानां चतुर्थ्यन्तरूपैः रिक्तस्थानानि पूरयत–**

[ कोष्ठक में लिखित पदों के चतुर्थ्यन्त रूपों से रिक्तस्थान भरें। Fill in the blanks with the dative forms of the words given in the bracket. ]

(i) जनाः शुभकामनाः यच्छन्ति। (दाता)

(ii) पुत्री शाटिकां ददाति। (माता)

(iii) भक्तः अर्घ्यं ददाति। (भानुः)

(iv) शिष्यः दक्षिणां ददाति। (गुरुः)

(v) संस्कृतसम्भाषणं रोचते। (युवत्यः)

(vi) अग्रजः स्पृहयन्ति। (भ्रातरः)

(vii) नमः। (विष्णुः)

(viii) स्वस्ति। (लोकाः)

(ix) दुर्जनः क्रुध्यति। (सज्जनाः)

(x) शूर्पणखा असूयति। (सीता)

(xi) जयद्रथः ________ कुप्यति । (अभिमन्युः)

(xii) संस्कृतं भारतस्य ________ अस्ति । (अभिवृद्धिः)

(xiii) भाषणं ________ रोचते । (नेतारः)

(xiv) कार्यं ________ रोचते । (कार्यकर्तारः)

(xv) पिपीलिका ________ स्पृहयति । (मधु)

**3. अधोनिर्दिष्टपदानां त्रिषु वचनेषु चतुर्थीरूपाणि लिखत—**

[ अधोनिर्दिष्ट पदों के तीनों वचनों में चतुर्थ्यन्त रूप लिखें। Write the dative forms of words given below in all the three numbers. ]

| | पदानि | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | महती | महत्यै | महतीभ्यां | महतीभ्यः |
| (i) | भ्राता | | | |
| (ii) | एकाकी | | | |
| (iii) | बन्धुः | | | |
| (iv) | सुहृत् | | | |
| (v) | शिशुः | | | |
| (vi) | तत् | | | |
| (vii) | सर्वः | | | |
| (viii) | दाशरथिः | | | |
| (ix) | रक्षः | | | |
| (x) | ज्ञातिः | | | |
| (xi) | लक्ष्मीः | | | |
| (xii) | कर्ता | | | |
| (xiii) | स्वसा | | | |
| (xiv) | दीपावली | | | |

4. **यथोदाहरणं मञ्जूषायाः मध्यस्थपदानां चतुर्थीविभक्तिरूपेण वाक्यानि रचयत—**

[ उदाहरण के अनुसार मञ्जूषा के मध्य में स्थित पद की चतुर्थी विभक्ति से वाक्य बनाएं। Make sentences with the dative forms of the words given in the middle of the box as shown in the example. ]

| | | | |
|---|---|---|---|
| (i) | अहम् | **बन्धवः** | आमन्त्रणपत्रिकां ददामि |
| (ii) | अधिकारी | **उद्योगी** | वेतनं ददाति |
| (iii) | अध्यक्षः | **विजयिनः** | पुरस्कारं ददाति |
| (iv) | राजा | **शत्रवः** | क्रुध्यति |
| (v) | मोहनः | **सुहृदः** | फलं वितरति |
| (vi) | पिता | **दुहिता** | वस्त्रं ददाति |
| (vii) | भक्तः | **विशालाक्षी** | 'नमः' इति वदति |
| (viii) | काव्यम् | **यशः** | भवति |
| (ix) | संन्यासी | **मुक्तिः** | यतते |
| (x) | यागकर्ता | **अग्निः** | स्वाहा इति वदति |

**उदा.** (i) अहं **बन्धुभ्यः** आमन्त्रणपत्रिकां ददामि ।

(ii) ।

(iii) ।

(iv) ।

(v) ।

(vi) ।

(vii) ।

(viii) ।

(ix) ।

(x) ।

5. **अधोलिखितानां प्रातिपदिकानां निर्दिष्टवचनस्य चतुर्थीविभक्तिरूपेण रिक्तस्थानानि पूरयत—**

[ अधोलिखित प्रातिपदिकों के निर्दिष्ट वचन के चतुर्थ्यन्त रूप से रिक्तस्थान भरें। Fill in the blanks with the dative forms of the following *prātipadikas* as per the given number. ]

| | **प्रातिपदिकम्** | | **रूपम्** |
|---|---|---|---|
| **उदा.** | आत्मन् | (एक.) | ........**आत्मने**........ |
| (i) | अनुयायिन् | (द्वि.) | |
| (ii) | वयस् | (बहु.) | |
| (iii) | मनस् | (एक.) | |
| (iv) | सदस् | (एक.) | |
| (v) | वपुष् | (बहु.) | |
| (vi) | हनूमत् | (एक.) | |
| (vii) | तत्त्वविद् | (बहु.) | |
| (viii) | दिक् | (बहु.) | |
| (ix) | पुण्यभाक् | (एक.) | |
| (x) | वाच् | (बहु.) | |
| (xi) | हस्तिन् | (द्वि.) | |
| (xii) | गन्तृ | (एक.) | |
| (xiii) | जगत् | (बहु.) | |
| (xiv) | दुहितृ | (द्वि.) | |

# सुभाषितानि

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जानकीजानये ।
वल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥

नमो नलिननेत्राय वेणुवाद्यविनोदिने ।
राधाधरसुधापानशालिने वनमालिने ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेछान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥

◆◆◆

अनुवर्तते

**कथायां चतुर्थीप्रयोगाः**

## मित्रसम्प्राप्तिः

...... एकदा लघुपतनकः वायसः हिरण्यकं मूषिकम् अवदत्– 'भोः मित्र ! इदानीम् एषः प्रदेशः मह्यं न रोचते। अस्मिन् देशे अनावृष्ट्या भयङ्करं दुर्भिक्षम् अभवत्। बुभुक्षिताः जनाः पक्षिभ्यः बलिम् अपि न प्रयच्छन्ति। गोभ्यः अग्राशनं न यच्छन्ति। गृहस्थाः वटुभ्यः संन्यासिभ्यः अतिथिभ्यः च भिक्षां न यच्छन्ति। निर्धनाः धनवद्भ्यः, कृषकाः च वणिग्भ्यः द्रुह्यन्ति। प्रजाः राज्ञे असूयन्ति। अत्र जीवनं बहु कष्टकरम् एव। अतः अहं जीवनवृत्त्यै अन्यत्र गन्तुम् इच्छामि।





दक्षिणापथे एकस्मिन् सरसि मम सखा मन्थरकः नाम कच्छपः वसति। मयि तस्य महती प्रीतिः अस्ति। अतः तत्र गमिष्यामि। हिरण्यकः अवदत्– भो मित्र ! अहम् अपि तव सुहृदः दर्शनाय चलिष्यामि। प्राक्तनं दुःखं मह्यं न रोचते। स्वात्मने असूयामि। तत्र गत्वा भवते सर्वं श्रावयिष्यामि। वायसः हिरण्यकं स्वस्य पृष्ठस्य उपरि उपवेश्य शनैः शनैः उड्डीय तत् सरः प्राप्नोत्। मन्थरकः मित्रं वायसं दृष्ट्वा बहु प्रसन्नः अभवत्, अवदत् च– 'स्वस्य सख्ये लघुपतनकाय मङ्गलं कामये' लघुपतनकः अपि प्रत्यभिवादनम् अकरोत्। हिरण्यकः अपि मन्थरकाय अभिनन्दनवचनम् अवदत्। मन्थरकः हिरण्यकं प्रति– 'सुहृदे आखवे स्वस्ति' इति प्रत्यवदत्। ततः ते सर्वे परस्परं मिलित्वा कुशलक्षेमं च पृष्ट्वा सरसः तीरे उपाविशन्।

क्रमशः .....

# द्वितीयः स्तबकः

## 2.4 चतुर्थः पाठः

### [ पञ्चमी विभक्तिः ]

**अजन्तशब्दानां पञ्चमीप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



**गिरेः** नदी प्रवहति।



**गिरिभ्यां** निर्झरिण्यौ प्रवहतः।



**गिरिभ्यः** सरितः प्रवहन्ति।



**तरोः** वानरः कूर्दते।



**तरुभ्यां** पुष्पाणि पतन्ति।



**तरुभ्यः** फलानि पतन्ति।



महिला **विक्रेतुः**
फलानि क्रीणाति।



युवतिः **विक्रेतृभ्याम्**
आभूषणानि क्रीणाति।।



जनाः **विक्रेतृभ्यः**
शाकानि क्रीणन्ति।

**स्त्री.**



**द्रोण्याः** जलं पतति ।



गोपालकः **द्रोणीभ्यां** दुग्धं गृह्णाति ।



बालाः **द्रोणीभ्यः** जलम् उद्धरन्ति ।



गोपालः **धेनोः** दुग्धं निस्सारयति ।



गोपालौ **धेनुभ्यां** दुग्धं निस्सारयतः ।



गोपाः **धेनुभ्यः** दुग्धं निस्सारयन्ति ।

**नपुं.**



**अक्ष्णः** ज्योतिः निस्सरति ।



**अक्षिभ्याम्** अश्रुणी पततः ।



**अक्षिभ्यः** अश्रूणि प्रसरन्ति ।



**जानुनः** मलम् अपसारयति ।



**जानुभ्यां** मृदं क्षालयति ।



सेविकाः **जानुभ्यः** वस्त्रावरणं निष्कासयन्ति ।

**अजन्तशब्दानां पञ्चमीप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**

| एक. | द्वि. | बहु. |
|---|---|---|
| बालिका **कपेः** बिभेति। | बालिका **कपिभ्यां** बिभेति। | बालिका **कपिभ्यः** बिभेति। |
| शिष्याः **गुरोः** पठन्ति। | शिष्याः **गुरुभ्यां** पठन्ति। | शिष्याः **गुरुभ्यः** पठन्ति। |
| **भ्रातुः** विना स्वसा म्लायति। | **भ्रातृभ्यां** विना स्वसारौ म्लायतः। | **भ्रातृभ्यः** स्वसारः म्लायन्ति। |
| **गोः** दुग्धं लभ्यते। | **गोभ्यां** दुग्धं लभ्यते। | **गोभ्यः** दुग्धं लभ्यते। |

**स्त्री.**

| | | |
|---|---|---|
| **मतेः** भक्तिः गरीयसी। | **गीतिभ्यां** भक्तिः गरीयसी। | **गीतिभ्यः** भक्तिः गरीयसी। |
| गोपालकः **धेनोः** दुग्धं दोग्धि। | गोपालकः **धेनुभ्यां** दुग्धं दोग्धि। | गोपालकः **धेनुभ्यः** दुग्धं दोग्धि। |
| **मातुः** निलीयते रामः। | **मातृभ्यां** निलीयते रामः। | **मातृभ्यः** निलीयते रामः। |

**नपुं.**

| | | |
|---|---|---|
| बालः **वारिणः** बिभेति। | पीनसरोगी **वारिभ्यां** बिभेति। | शिशुः **वारिभ्यः** बिभेति। |
| बालः **श्मश्रुणः** बिभेति। | बालः **श्मश्रुभ्यां** बिभेति। | बालः **श्मश्रुभ्यः** बिभेति। |
| **दध्नः** घृतं निस्सरति। | **दधिभ्याम्** घृतं निस्सरति। | **दधिभ्यः** घृतं निस्सरति। |
| **मधुनः** मक्षिकां निष्कासयति। | **मधुभ्यां** मक्षिकां निष्कासयति। | **मधुभ्यः** मक्षिकां निष्कासयति। |

## अजन्तशब्दानां पञ्चमीरूपाणि

**अधोनिर्दिष्टानि रूपाणि पठत–**

[ अधोनिर्दिष्ट रूपों को पढ़ें। Read the following declension. ]

### पुं.

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| इकारान्तः | (हरि) | हरेः | हरिभ्याम् | हरिभ्यः |
| इकारान्तः | (पति) | पत्युः | पतिभ्याम् | पतिभ्यः |
| उकारान्तः | (गुरु) | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| ऊकारान्तः | (स्वयम्भू) | स्वयम्भुवः | स्वयम्भूभ्याम् | स्वयम्भूभ्यः |
| ऋकारान्तः | (पितृ) | पितुः | पितृभ्याम् | पितृभ्यः |
| ओकारान्तः | (गो) | गोः | गोभ्याम् | गोभ्यः |

### स्त्री.

| | | | | |
|---|---|---|---|---|
| इकारान्तः | (मति) | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| उकारान्तः | (धेनु) | धेनोः/धेन्वाः | धेनुभ्याम् | धेनुभ्यः |
| ऋकारान्तः | (मातृ) | मातुः | मातृभ्याम् | मातृभ्यः |

### नपुं.

| | | | | |
|---|---|---|---|---|
| इकारान्तः | (वारि) | वारिणः | वारिभ्याम् | वारिभ्यः |
| उकारान्तः | (मधु) | मधुनः | मधुभ्याम् | मधुभ्यः |

## अभ्यासः — 74

✍ **अधोलिखितानाम् इकारान्तशब्दानां यथोदाहरणं त्रिषु वचनेषु रूपाणि लिखत–**

[ उदाहरण के अनुसार अधोलिखित इकारान्त शब्दों के तीनों वचनों में रूप लिखें। Write the declension of the following words ending in 'i' in all the three numbers as shown in the example. ]

**पुंलिङ्गः**

| | | | | |
|---|---|---|---|---|
| उदा. | कपि | **कपि=कप्+(इ)→एः=कपेः** | **कपि + भ्याम् = कपिभ्याम्** | **कपि + भ्यः = कपिभ्यः** |
| 1. | कवि | **कवेः** | **कविभ्याम्** | **कविभ्यः** |
| 2. | अग्नि | | | |
| 3. | नृपति | | | |
| 4. | सेनापति | | | |
| 5. | विधि | | | |
| 6. | गिरि | | | |
| 7. | असि | | | |
| 8. | मुनि | | | |
| 9. | अतिथि | | | |
| 10. | उदधि | | | |

**स्त्रीलिङ्गः**

| | | | | |
|---|---|---|---|---|
| 11. | शान्ति | **शान्तेः** | **शान्तिभ्याम्** | **शान्तिभ्यः** |
| 12. | जाति | | | |
| 13. | पङ्क्ति | | | |
| 14. | भक्ति | | | |
| 15. | रात्रि | | | |
| 16. | धूलि | | | |
| 17. | बुद्धि | | | |
| 18. | रीति | | | |
| 19. | भीति | | | |
| 20. | गति | | | |

## अभ्यासः – 75

✍ **अधोलिखितानाम् उकारान्त-पुंलिङ्ग-शब्दानां त्रिषु वचनेषु रूपाणि लिखत—**

[ अधोलिखित उकारान्त पुंलिङ्ग शब्दों के तीनों वचन में रूप लिखें। Write the declension in all the three numbers of the following masculine words ending in '*u*'. ]

| | | | | |
|---|---|---|---|---|
| उदा. | गुरु | गुरु=गुर्+(उ)→ओः = गुरोः | गुरु + भ्याम् = गुरुभ्याम् | गुरु + भ्यः = गुरुभ्यः |
| 1. | भानु | भानोः | भानुभ्याम् | भानुभ्यः |
| 3. | विधु | | | |
| 4. | रिपु | | | |
| 5. | शत्रु | | | |
| 6. | शिशु | | | |
| 7. | वेणु | | | |
| 8. | वायु | | | |
| 9. | मृत्यु | | | |
| 10. | बाहु | | | |

## अभ्यासः – 76

✍ **अधोलिखितानाम् उकारान्त-नपुंसक-शब्दानां त्रिषु वचनेषु रूपाणि लिखत—**

[ अधोलिखित उकारान्त नपुंसकलिङ्ग शब्दों के तीनों वचन में रूप लिखें। Write the declension in all the three numbers of the following *neuter* gender words ending in *u*. ]

| | | | | |
|---|---|---|---|---|
| उदा. | मधु | मधु + नः = मधुनः | मधु + भ्याम् = मधुभ्याम् | मधु + भ्यः = मधुभ्यः |
| 1. | वस्तु | वस्तुनः | वस्तुभ्याम् | वस्तुभ्यः |
| 2. | मृदु | | | |
| 3. | जानु | | | |
| 4. | दारु | | | |
| 5. | लघु | | | |
| 6. | तालु | | | |
| 7. | कटु | | | |

## अभ्यासः — 77

✍ **यथोदाहारणम् अधोलिखितानाम् इकारान्त-नपुंसक-शब्दानां पञ्चम्यन्त-रूपाणि लिखत—**
[ उदाहरण के अनुसार अधोलिखित इकारान्त नपुंसक शब्दों के तीनों वचनों में पञ्चमी विभक्त्यन्त रूप लिखें। Write the ablative declension of the words ending in '*i*' in all the three numbers of neuter gender as shown in the example. ]

**उदा.** वारि ........**वारि + णः = वारिणः**........

........**वारि + भ्याम् = वारिभ्याम्**........

........**वारि + भ्यः = वारिभ्यः**........

1. अक्षि

दधि ........**दधि = दध् + इ → नः**........

........**दधि + भ्याम्**........

........**दधि + भ्यः**........

2. अस्थि

3. सक्थि

## अभ्यासः – 78

✍ **यथोदाहरणम् अधोलिखितानाम् ऋकारान्त-शब्दानां त्रिषु वचनेषु पञ्चम्यन्त-रूपाणि लिखत–**

[ उदाहरण के अनुसार अधोलिखित ऋकारान्त शब्दों के तीनों वचनों में पञ्चम्यन्त रूप लिखें। Write the ablative declension of the words ending in 'ṛ' in all the three numbers as shown in the example. ]

**पुंलिङ्गे**

**यथा** पितृ **पितृ=पित्+(ऋ) →(उः) = पितुः पितृ + भ्याम् = पितृभ्याम् पितृ + भ्यः = पितृभ्यः**

भ्रातृ **भ्रातुः** **भ्रातृभ्याम्** **भ्रातृभ्यः**

1. जामातृ
2. कर्तृ
3. दातृ
4. सवितृ
5. भर्तृ
6. श्रोतृ
7. नेतृ
8. वक्तृ
9. नप्तृ

**स्त्रीलिङ्गे**

10. मातृ
11. यातृ
12. दुहितृ
13. स्वसृ
14. ननान्दृ

**हलन्तशब्दानां पञ्चमीप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



शिष्यः **विदुषः** ग्रन्थं प्राप्नोति।



रमेशः **विद्वद्भ्यां** स्मृतिचिह्नं प्राप्नोति।



महाराजः **विद्वद्भ्यः** आशीर्वादं प्राप्नोति।



**प्रहरिणः** चोरः पलायते।



**प्रहरिभ्यां** चोरः पलायते।



**प्रहरिभ्यः** चोरः पलायते।



भक्ताः **योगिनः** उपदेशं शृण्वन्ति।



भक्ताः **योगिभ्याम्** उपदेशं शृण्वन्ति।



भक्ताः **योगिभ्यः** उपदेशं शृण्वन्ति।

**स्त्री.**



धीवरः **सरितः** मीनं गृह्णाति ।



भक्ताः गंगा-यमुनाभ्यां **सरिद्भ्यां** जलं गृह्णन्ति ।



धीवराः **सरिद्भ्यः** मत्स्यान् गृह्णन्ति ।



भिक्षुकः **योषितः** भिक्षां स्वीकरोति ।



भिक्षुकः **योषिद्भ्यां** भिक्षां प्राप्नोति ।



भिक्षुकः **योषिद्भ्यः** भिक्षां लभते ।

**नपुं.**



**धनुषः** बाणः निस्सरति ।



**धनुर्भ्यां** बाणौ निस्सरतः ।



**धनुर्भ्यः** बाणाः निस्सरन्ति ।



मल्लः **वपुषः** वस्त्रं निष्कासयति ।



सेविका **वपुर्भ्यां** पट्टिकां निष्कासयति ।



सेविका **वपुर्भ्यः** पट्टिकां निष्कासयति ।

**हलन्तशब्दानां पञ्चमीप्रयोगः**

**अधोनिर्दिष्टानि वाक्यानि पठत—**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**

| एक. | द्वि. | बहु. |
|---|---|---|
| **महतः** जनात् किं भयम् ? | **महद्भ्यां** जनाभ्यां किं भयम्। | **महद्भ्यः** जनेभ्यः किं भयम्। |
| **धीमतः** पठनं सुकरं भवति। | **धीमद्भ्यां** पठनं सुकरं भवति। | **धीमद्भ्यः** पठनं सुकरं भवति। |
| **मरुतः** विना जीवनं नास्ति। | | |
| **मन्त्रिणः** नृपतिः बलिष्ठः। | **मन्त्रिभ्यां** नृपतिः बलिष्ठः। | **मन्त्रिभ्यः** नृपतिः बलिष्ठः। |
| शत्रवः **राज्ञः** बिभ्यति। | शत्रवः **राजभ्यां** बिभ्यति। | शत्रवः **राजभ्यः** बिभ्यति। |
| **आत्मनः** शरीरं भिन्नम्। | **आत्मभ्यां** शरीरे भिन्ने। | **आत्मभ्यः** शरीराणि भिन्नानि। |

**स्त्री.**

| एक. | द्वि. | बहु. |
|---|---|---|
| **सरितः** जलम् आनयतु। | **सरिद्भ्यां** जलम् आनयतु। | **सरिद्भ्यः** जलम् आनयतु। |
| **प्रावृषः** विना सस्यानि न भवन्ति। | **प्रावृड्भ्यां** विना सस्यानि न भवन्ति। | **प्रावृड्भ्यः** विना सस्यानि न भवन्ति। |

**नपुं.**

| एक. | द्वि. | बहु. |
|---|---|---|
| **नाम्नः** कर्म महत् भवति। | **नामभ्यां** कर्म महत् भवति। | **नामभ्यः** कर्म महत् भवति। |
| **धनुषः** बाणः निर्गच्छति। | **धनुर्भ्यां** बाणौ निर्गच्छतः। | **धनुर्भ्यः** बाणाः निर्गच्छन्ति। |

## हलन्तशब्दानां पञ्चमीरूपाणि

**रूपाणि स्मरत–**

[ रूपों का स्मरण करें। Remember the declension. ]

**पुं.**

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| तकारान्तः | (मरुत्) | मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| तकारान्तः | (महत्) | महतः | महद्भ्याम् | महद्भ्यः |
| तकारान्तः | (धीमत्) | धीमतः | धीमद्भ्याम् | धीमद्भ्यः |
| नकारान्तः | (मन्त्रिन्) | मन्त्रिणः | मन्त्रिभ्याम् | मन्त्रिभ्यः |
| नकारान्तः | (आत्मन्) | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| नकारान्तः | (राजन्) | राज्ञः | राजभ्याम् | राजभ्यः |

**स्त्री.**

| | | | | |
|---|---|---|---|---|
| तकारान्तः | (सरित्) | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| धकारान्तः | (क्षुध्) | क्षुधः | क्षुद्भ्याम् | क्षुद्भ्यः |
| षकारान्तः | (प्रावृष्) | प्रावृषः | प्रावृड्भ्याम् | प्रावृड्भ्यः |
| षकारान्तः | (आशिष्) | आशिषः | आशीर्भ्याम् | आशीर्भ्यः |

**नपुं.**

| | | | | |
|---|---|---|---|---|
| तकारान्तः | (बृहत्) | बृहतः | बृहद्भ्याम् | बृहद्भ्यः |
| नकारान्तः | (नामन्) | नाम्नः | नामभ्याम् | नामभ्यः |
| षकारान्तः | (वपुष्) | वपुषः | वपुर्भ्याम् | वपुर्भ्यः |
| सकारान्तः | (मनस्) | मनसः | मनोभ्याम् | मनोभ्यः |

## अभ्यासः — 79

✍ **यथोदाहरणम् अधोलिखितानाम् हलन्त-शब्दानां त्रिषु वचनेषु पञ्चम्यन्त-रूपाणि लिखत–**

[ उदाहरण के अनुसार अधोलिखित हलन्त शब्दों के तीनों वचनों में पञ्चम्यन्त रूप लिखें। Write the ablative declension of the words ending in consonant in all the three numbers as shwon in the example. ]

| | | | | |
|---|---|---|---|---|
| 1. | महत् | **महतः** | **महद्भ्याम्** | **महद्भ्यः** |
| 2. | मरुत् | | | |
| 3. | धीमत् | | | |
| 4. | बृहत् | | | |
| 5. | मन्त्रिन् | **मन्त्रिणः** | **मन्त्रिभ्याम्** | **मन्त्रिभ्यः** |
| 6. | करिन् | | | |
| 7. | ब्रह्मन् | | | |
| 8. | नामन् | **नाम्नः** | **नामभ्याम्** | **नामभ्यः** |
| 9. | स्रज् | **स्रजः** | **स्रग्भ्याम्** | **स्रग्भ्यः** |
| 10. | वणिज् | | | |
| 11. | भिषज् | | | |
| 12. | ऋत्विज् | | | |
| 13. | हविष् | **हविषः** | **हविर्भ्याम्** | **हविर्भ्यः** |
| 14. | धनुष् | | | |
| 15. | चक्षुष् | | | |
| 16. | वपुष् | | | |
| 17. | मनस् | **मनसः** | **मनोभ्याम्** | **मनोभ्यः** |
| 18. | पयस् | | | |
| 19. | चेतस् | | | |
| 20. | तपस् | | | |

## अभ्यासः — 80

✍ **कोष्ठकस्थ-पदानाम् पञ्चम्यन्तरूपैः रिक्तस्थानानि पूरयत–**

[ कोष्ठक में प्रदत्त पदों के पञ्चम्यन्त रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with ablative forms of the words given in the bracket. ]

| | | |
|---|---|---|
| उदा. | हरिः **हिरण्यकशिपोः** प्रह्लादं रक्षति। | (हिरण्यकशिपुः) |
| 1. | नाविकः बालकम् ........ रक्षति। | (उदधिः) |
| 2. | शिशुः ........ बिभेति। | (कपिः) |
| 3. | माता ........ पुत्रं वारयति। | (अग्निः) |
| 4. | ........ कस्य भयं न भवति ? | (अरयः) |
| 5. | सः ........ आगच्छति। | (गिरिः) |
| 6. | अन्धकारः ........ निलीयते। | (रविः) |
| 7. | ........ आरात् कृषिक्षेत्रम् अस्ति। | (गिरिः) |
| 8. | ........ ऋते कः विश्वं निर्मातुं क्षमः ? | (प्रजापतिः) |
| 9. | जननी ........ गरीयसी भवति। | (पिता) |
| 10. | ........ कृषकाः सैनिकाश्च बलिष्ठाः। | (कवयः) |
| 11. | ........ प्रजाः प्रजायन्ते। | (प्रजापतिः) |
| 12. | शिष्यः ........ पठति। | (गुरुः) |
| 13. | प्रकाशः ........ आयाति। | (भानुः) |
| 14. | ........ भयं न भवति। | (साधवः) |
| 15. | ........ अन्यत् शरणं नास्ति। | (शम्भुः) |
| 16. | ........ सूर्यः दूरे अस्ति। | (विधुः) |
| 17. | ........ पूर्वं हरिनाम स्मरणीयम् | (मृत्युः) |
| 18. | ........ विना सभा निष्फला। | (श्रोतारः) |
| 19. | ........ ऋते कः प्राणिनः सृजति। | (धाता) |
| 20. | भगिन्याः ........ किं भयम् ? | (भ्राता) |

## अभ्यासः — 81

✍ **कोष्ठगत-शब्दानां पञ्चम्येकवचनान्तरूपैः रिक्तस्थानानि पूरयत—**

[ कोष्ठक में प्रदत्त शब्दों के पञ्चमी एकवचनान्त रूपों से रिक्तस्थान भरें। Fill in the blanks with ablative singular forms of the words given in the bracket. ]

उदा. (भक्ति) ......**भक्तेः** विरमति पूजकः ।

1. (नीति) न विरमन्ति सज्जनाः ।
2. (धूलि) वारयति पुत्रं माता ।
3. (शक्ति) [illegible]
4. (शक्ति) भक्तिः गरीयसी ।
5. (धेनु) वत्सं वारयति ।
6. (हनु) स्रवति रक्तम् ।
7. (भक्ति) न प्रमदितव्यम् ।
8. (दुहितृ) स्वसा ज्येष्ठा ।
9. (मातृ) निलीयते बालः ।
10. (कटु) मधु रुचिरं भवति ।
11. (दारु) आसन्दाः, उत्पीठिकाः च जायन्ते ।
12. (लघु) कुटीरात् आगच्छति साधुः ।
13. (प्रावृट्) जायन्ते कीटाः ।
14. (चन्द्रमस्) ज्योत्स्ना आयाति ।
15. (धनुष्) बाणाः निर्गच्छन्ति ।
16. (भिषज्) औषधम् आनय ।
17. (सुहृत्) विना जीवनं निरर्थकम् ।
18. (मघवन्) विष्णुः कनिष्ठः ।
19. (सरित्) आगच्छन्ति महिलाः ।
20. (नामन्) कर्म महत्तरम् ।

## अभ्यासः – 82

✍ **अधोलिखितानां प्रातिपदिकानां पञ्चम्याः एकवचनान्तरूपैः वाक्यानि लिखत—**

[ अधोलिखित मूलशब्दों के पञ्चमी एकवचनान्त रूपों से वाक्य बनाएँ। Make sentences with the ablative singular forms of the following base words. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | गिरि | निर्झरः | | **गिरेः** | **निर्झरः** | प्रवहति। |
| 1. | उदधि | जलम् | 1. | | | आनयति। |
| 2. | अग्नि | शिखा | 2. | | | निर्गच्छति। |
| 3. | भानु | किरणाः | 3. | | | आगच्छन्ति। |
| 4. | वेणु | ध्वनिः | 4. | | | आयाति। |
| 5. | दुहितृ | माता | 5. | | | ज्येष्ठा। |
| 6. | स्मृति | श्रुतिः | 6. | | | गरीयसी। |
| 7. | शक्ति | बुद्धिः | 7. | | | बलवती। |
| ८. | नृपति | चोरः | 8. | | | निलीयते। |
| 9. | श्रोतृ | वक्ता | 9. | | | ज्यायान्। |
| 10. | भूमि | अङ्कुरः | 10. | | | निर्गच्छति। |
| 11. | वह्नि | बालकम् | 11. | | | वारयति। |
| 12. | सम्राज् | परिव्राजकः | 12. | | | सुखी। |
| 13. | उदधि | अमृतम् | 13. | | | जातम्। |
| 14. | श्वन् | अल्पनिद्राम् | 14. | | | शिक्षेत। |
| 15. | गच्छत् | धावकः | 15. | | | शीघ्रतरः। |
| 16. | स्रज् | पुष्पाणि | 16. | | | पतन्ति। |
| 17. | मधु | माधुर्यं | 17. | | | जायते। |
| 18. | मृत्यु | अमृतम् | 18. | | | गमय। |
| 19. | शम्भु | शक्तिः | 19. | | | अभिन्ना। |

## अभ्यासः – 83

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत–**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | | |
|---|---|---|---|---|
| **यथा** | कृषकः | (गिरि) | **गिरेः** | **आगच्छति** |
| 1. | महिला | (सरित्) | ........................ | |
| 2. | प्रकाशः | (कृशानु) | ........................ | |
| 3. | किरणः | (रवि) | ........................ | |
| 4. | धनम् | (दातृ) | ........................ | |

| | | | | |
|---|---|---|---|---|
| 5. | सेवकः | (नृपति) | **नृपतेः** | **बिभेति** |
| 6. | शिशुः | (कपि) | ........................ | |
| 7. | सेवकः | (भर्तृ) | ........................ | |
| 8. | सज्जनः | (रिपु) | ........................ | |
| 9. | सेनापतिः | (मन्त्रिन्) | ........................ | |

| | | | | |
|---|---|---|---|---|
| 10. | छत्रं | (प्रावृष्) | **प्रावृषः** | **रक्षति** |
| 11. | राजा | (रिपु) | ........................ | |
| 12. | गृहं | (मरुत्) | ........................ | |
| 13. | सुहृत् | (विपत्) | ........................ | |

**पञ्चमी विभक्तिः**

## समुद्रदर्शनम्

पृथिव्याः अधिकः भागः समुद्रैः परिवेष्टितः अस्ति। भारतस्य दक्षिणे भागे हिन्दमहासागरः, पश्चिमे अरबसागरः, पूर्वभागे च बङ्गोपसागरः शोभते। अस्माकं देशस्य अनेकानि नगराणि समुद्रतटे अवस्थितानि सन्ति। तेषु मुम्बई-चेन्नई-गोआ-पुरी-कोचिन-सूरत-इत्यादीनि नगराणि प्रमुखानि सन्ति। भारतस्य पर्यटकस्थलेषु एतेषां नामानि परिगणितानि भवन्ति।

अहं **स्वपितुः गुरोः** च **सकाशात्** समुद्र-विषये श्रुतवान् आसम्। अनन्तरं **पाठ्य-पुस्तकेभ्यः** समुद्रस्य महत्त्वं ज्ञातवान्। दूरदर्शनेऽपि समुद्रविषयकं कार्यक्रमं दृष्टवान्। परन्तु प्रत्यक्षरूपेण समुद्रं न दृष्टवान्।

एकदा **कौतूहलात्** अहं समुद्र-दर्शनस्य इच्छां पित्रे निवेदितवान्। "अस्तु, **परीक्षायाः** परं वयं सर्वे पुरीं गमिष्यामः। तत्र जगन्नाथदर्शनेन सह समुद्रदर्शनम् अपि भविष्यति। **पुर्याः** अनतिदूरे प्रसिद्धं कोणार्क-सूर्यमन्दिरं वर्तते। **अर्कक्षेत्रात् कोणार्कात्** अनतिदूरे पद्मक्षेत्रे भुवनेश्वरे प्रसिद्धं शैवपीठं लिङ्गराजमन्दिरम् अपि वर्तते। एवम् अस्माभिः एकस्यां यात्रायां बहूनि स्थलानि द्रष्टुं शक्यन्ते" इति पिता मां प्रबोधितवान्।



परीक्षायाः परं यथाप्रस्तावं वयम् **उज्जयिन्याः** पुरीं प्राप्तवन्तः। यात्रिनिवासे वस्तूनि संस्थाप्य स्नान-भोजनादिकं समाप्य अपराह्णे वयं जगन्नाथ-मन्दिरं गतवन्तः। तत्र जगन्नाथस्य, बलभद्रस्य, सुभद्रायाः च मूर्तयः सन्ति। जगन्नाथः **हरेः** अभिन्नः अस्ति। बलभद्रः च **शेषाहेः** भिन्नः नास्ति। एतयोः भगिनी सुभद्रा शक्तिस्वरूपा अस्ति। वयं **तत्रत्येभ्यः सेवकेभ्यः** मन्दिरस्य ऐतिह्यविषये महत्त्वपूर्णाः सूचनाः प्राप्तवन्तः।

**मन्दिरात्** वयं समुद्रं द्रष्टुं गतवन्तः। **दूरात्** समुद्रस्य गर्जनं श्रूयते स्म। समुद्रकूले अपि बहुविधाः आकर्षिकाः विपण्यः आसन्। वयं शुक्तिनिर्मितानि मनोहराणि वस्तूनि **विपण्याः** क्रीतवन्तः। सर्वप्रथमं वयम् **अध्वनः** समुद्रम् अपश्याम। ततः समुद्रतटम् अगच्छाम। समुद्रतटे **पतितेभ्यः मृत-मत्स्येभ्यः मृतकर्कटेभ्यः** च दुर्गन्धः आगच्छति स्म। अहं तु **दुर्गन्धात्** नितरां जुगुप्से। तथापि वयं समुद्रस्य समीपं गत्वा जलं स्पृष्टवन्तः। समुद्रस्य **वारिणः वीचिभ्यः गम्भीरगर्जनध्वनेः** च मम भीतिः अभवत्। वस्तुतः पूर्वमेव मे **जलजन्तुभ्यः** भयम् आसीत्। अतः यथाकथञ्चित् अहम् आजानु एव समुद्रं प्रविष्टवान्। अपरं च **सर्वेभ्यः** प्राक् अहम् एव जलनिधेः बहिः आगतवान्। पुरीम् आगत्य समुद्रे **स्नानात्** ऋते मुक्तिः नास्ति इति अस्माभिः श्रुतम् आसीत्। अत एव परेद्युः प्रातः वयं समुद्रे स्नातुं गतवन्तः। **पित्रोः** प्रेरणां प्राप्य अहं भ्रात्रा सह समुद्रे स्नातवान्। एवं मम **हृदः** भयं निर्गतम्।



कोणार्कमन्दिरं **पुर्याः** दशसु क्रोशेषु अस्ति। प्रतिदिनं तत्र **बहुभ्यः देशेभ्यः** पर्यटकाः आगच्छन्ति। वयं **तत्रत्यात्** चन्द्रभागा-**नाम्नः समुद्रतटात्** सूर्योदयस्य दर्शनं कृत्वा प्रमुदिताः अभवाम। वस्तुतः वयं कोणार्कमन्दिरस्य **मूर्तिभ्यः** बहुविधाः शिक्षाः प्राप्तवन्तः। एवम् अस्माकं समुद्र-दर्शन-कार्यक्रमः अतीव सुखकरः अविस्मरणीयः च अभवत्।

◆◆◆

## अभ्यासः — 84

1. **अधोलिखितानां प्रश्नानाम् उत्तरं लिखत–**
[ अधोलिखित प्रश्नों का उत्तर लिखें। Answer the following questions. ]

(i) बालकः कस्मात् समुद्रस्य विषये श्रुतवान् ?

।

(ii) बालकः केभ्यः समुद्रस्य महत्त्वं ज्ञातवान् ?

।

(iii) सः कस्मात् हेतोः समुद्रदर्शनस्य इच्छां पित्रे निवेदितवान् ?

।

(iv) कोणार्क-सूर्यमन्दिरं कुत्र अस्ति ?

।

(v) ते कुतः पुरीं गतवन्तः ?

।

(vi) जगन्नाथः कस्मात् अभिन्नः अस्ति ?

।

(vii) ते केभ्यः मन्दिरस्य महत्त्वपूर्णाः सूचनाः प्राप्तवन्तः ?

।

(viii) कुतः समुद्रस्य गर्जनं श्रूयते स्म ?

।

(ix) ते कुतः शुक्तिनिर्मितानि वस्तूनि क्रीतवन्तः ?

।

(x) समुद्रतटे कुतः दुर्गन्धः आगच्छति स्म ?

।

(xi) बालकस्य कस्मात् भीतिः अभवत् ?

। 

(xii) बालकः कुतः प्रेरणां प्राप्य समुद्रे स्नातवान् ?

।

(xiii) ते कस्मात् स्थानात् सूर्योदयस्य दर्शनं कृतवन्तः ?

।

(xiv) ते कुतः बहुविधाः शिक्षाः प्राप्नुवन् ?

...................................................................................................... ।

**2. कोष्ठके लिखितानां पदानां पञ्चम्यन्तरूपैः रिक्तस्थानानि पूरयत–**

**[ कोष्ठक में लिखित पदों के पञ्चम्यन्त रूप से रिक्तस्थान भरें। Fill in the blanks with the ablative forms of the words given in the bracket. ]**

| | | |
|---|---|---|
| (i) | अश्रूणि पतन्ति। | (अक्षिणी) |
| (ii) | बालः पुस्तकं स्वीकरोति। | (युवानौ) |
| (iii) | दुग्धं स्रवति। | (द्रोणी) |
| (iv) | ज्ञानं प्राप्नोतु। | (गुरवः) |
| (v) | वस्त्रं स्वीकरोतु। | (स्वसा) |
| (vi) | मित्रं वारयति। | (दुर्वृत्तिः) |
| (vii) | प्रकाशः निःसरति। | (मूर्तयः) |
| (viii) | बालः बिभेति। | (कपी) |
| (ix) | ऋते कार्यं न सिद्ध्यति। | (इच्छाशक्तिः) |
| (x) | धनं याचते। | (पतिः) |
| (xi) | सूपं गृह्णाति। | (दुहिता) |
| (xii) | प्रेरणां प्राप्नोतु। | (धीमन्तौ) |
| (xiii) | पूर्वं महाराजः उपविशति। | (मन्त्रिणः) |
| (xiv) | राक्षसाः बिभ्यति। | (हनुमान्) |
| (xv) | परं ग्रामः विद्यते। | (सरित्) |

**3. अधोनिर्दिष्टपदानां पञ्चमीरूपाणि त्रिषु वचनेषु लिखत—**

[ अधोनिर्दिष्ट पदों के पञ्चमी रूप तीनों वचनों में लिखें। Write the ablative forms of the following words in all the three numbers. ]

| | पदानि | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | पिता | पितुः | पितृभ्याम् | पितृभ्यः |
| (i) | स्वसा | | | |
| (ii) | माता | | | |
| (iii) | धेनुः | | | |
| (iv) | सरित् | | | |
| (v) | जगत् | | | |
| (vi) | श्रीमान् | | | |
| (vii) | महर्षिः | | | |
| (viii) | राजा | | | |
| (ix) | धनुः | | | |
| (x) | मनः | | | |
| (xi) | शक्तिः | | | |
| (xii) | योगी | | | |
| (xiii) | वक्षः | | | |
| (xiv) | कविः | | | |
| (xv) | सुहृत् | | | |

**4. उदाहरणानुसारं मञ्जूषास्थ-पदमाधृत्य वाक्यानि रचयत–**

[ उदाहरण के अनुसार मञ्जूषा के पद के आधार पर वाक्य बनाएं । Make sentences with the words given in the box as shown in the example. ]

| | | |
|---|---|---|
| (i) | हिमवान् | गङ्गा प्रवहति |
| (ii) | भूभृत् | धनं प्राप्नोति |
| (iii) | दधि | नवनीतं निष्कासयति |
| (iv) | धनुः | बाणः निस्सरति |
| (v) | विपणी | वस्त्रम् आनयति |
| (vi) | दातारः | दानं स्वीकरोति |
| (vii) | तरुः | पर्णं पतति |
| (viii) | लक्ष्मीः | वरं प्राप्नोति |
| (ix) | जलमुक् | जलबिन्दवः पतन्ति |
| (x) | वारिधिः | शुक्तिं सङ्गृह्णाति |

**उदा.** (i) **हिमवतः** गङ्गा प्रवहति ।

(ii) ।

(iii) ।

(iv) ........................................................................ ।

(v) ।

(vi) ।

(vii) ।

(viii) ।

(ix) ।

(x) ।

5. **प्रथमद्वितीय-मञ्जूषयोः आधारेण 'कुतः किं पतति/निस्सरति' इति यथोचितं लिखत—**

[ प्रथम एवं द्वितीय मञ्जूषा के आधार पर 'कहाँ से क्या गिर रहा है या निकल रहा है' उचित स्थान पर लिखें। Write in appropriate place what falls from what on the basis of two boxes given. ]

I.

| | | | | |
|---|---|---|---|---|
| **तरुः** | शिरः | गिरिः | मुष्टिः | वपुः |
| शर्करा | केशः | स्वेदः | **फलम्** | निर्झरिणी |

I.

(क) **तरोः** ........ **फलं** ........

(ख)

(ग) ........

(घ)

(ङ)

**पतति।**

II.

| | | | |
|---|---|---|---|
| नभः | चन्द्रमाः | दुन्दुभिः | तालु |
| ध्वनिः | अक्षरम् | चन्द्रिका | धूमकेतुः |

II.

(क) ........

(ख) ........

(ग)

(घ)

**निस्सरति।**

सुभाषितेषु पञ्चमीप्रयोगाः

# सुभाषितानि

युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि ।
अयुक्तं नैव च ग्राह्यं साक्षादपि बृहस्पतेः ॥

राजतः सलिलादग्नेश्चोरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठाः ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यः ज्ञानिनः श्रेष्ठाः ज्ञानिभ्यो व्यवसायिनः ॥

इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदः मामयं प्रहरिष्यति ॥

◆◆◆

अनुवर्तते

**कथायां पञ्चमीप्रयोगाः**

## मित्रसम्प्राप्तिः

...... वायसः लघुपतनकः, मूषिकः हिरण्यकः कच्छपः मन्थरकः च सरसः बहिः एकस्य तरोः छायायाम् उपविश्य गोष्ठीम् आरब्धवन्तः। लघुपतनकः अवदत्– 'भद्र ! हिरण्यक ! इदानीं वयं भवतः प्राक्तनं दुःखं श्रोतुम् इच्छामः।

अथ हिरण्यकः सर्वं प्राक्तनं वृत्तान्तं श्रावयितुम् आरब्धवान्– मध्यदेशे काञ्ची नाम नगरी अस्ति। नगर्याः बहिः एकं शिवमन्दिरम् आसीत्। तत्र ताम्रचूडः नाम परिव्राजकः वसति स्म। सः गृहस्थ-नारीभ्यः भिक्षाम् आनीय जीवनयात्रां समाचरति। भिक्षाशेषं भिक्षापात्रे संस्थाप्य नागदन्ते अवलम्ब्य च रात्रौ स्वपिति। प्रातःकाले तत् अन्नं कार्यकर्तृभ्यः दत्त्वा मन्दिरस्य सम्मार्जनं लेपनम् अलङ्करणं च कारयति।



एकस्मिन् दिने मम बान्धवाः क्षुधा पीडिताः माम् अवदन्– अस्माकं बिलात् आरात् एकं शिवमन्दिरम् अस्ति। तत्र गत्वा शिवमन्दिरे नागदन्ते अवलम्बितम् अन्नं खादामः। श्रान्तेः ऋते यदि भक्ष्यं मिलति तर्हि इतस्ततः वृथा अटनेन किम् ? तस्य मुखात् एतत् श्रुत्वा अहं सकलेन यूथेन सह स्वबिलात् निर्गत्य मन्दिरं गतवान्। नागदन्तम् उत्प्लुत्य च भिक्षापात्रे समारूढवान्। तत्र स्थापितम् भक्ष्यं सर्वेभ्यः अनुयायिभ्यः दत्त्वा स्वयम् अपि खादितवान्। परिव्राजकः अपि अस्मत् तत् अन्नं रक्षितुं महान्तं यत्नं करोति तथापि तस्य निद्रावस्थायां वयं तत् कृत्यं सम्पादयामः। ततः पश्चात् स्वबिलम् आगच्छामः। सः परिव्राजकः अरण्याद् एकं जर्जरवंशम् आनीय रात्रेः आरभ्य प्रातः यावत् भिक्षापात्रं ताडयति स्म। संन्यासिनः भीताः अपि वयं स्वकर्मणः विरताः न अभवाम। मध्ये-मध्ये अवसरं लब्ध्वा तत् कृत्यं सम्पादयन्तः आस्म।

क्रमशः .....

# द्वितीयः स्तबकः

## 2.5 पञ्चमः पाठः

## [ षष्ठी विभक्तिः ]

**अजन्तशब्दानां षष्ठीप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



**कपेः** लाङ्गूलं दीर्घम् अस्ति।



**कप्योः** समीपे कदलीफलानि सन्ति।



**कपीनां** पुरतः बालाः सन्ति।



एषः **यतेः** कमण्डलुः अस्ति।



एतौ **यत्योः** कमण्डलू स्तः।



एते **यतीनां** कमण्डलवः सन्ति।



एतत् **गुरोः** गृहम् अस्ति।



एतौ **गुर्वोः** आसन्द्यौ स्तः।



एते **गुरूणाम्** आश्रमाः सन्ति।

**स्त्री.**



**नार्याः** केशेषु पुष्पम् अस्ति ।



**नार्योः** वेण्यौ दीर्घे स्तः ।



मन्दिरे **नारीणां** समूहः अस्ति ।



पाचकः **चुल्ल्याः** प्रज्वलनं करोति ।



यान्त्रिकः **चुल्ल्योः** समीकरणं करोति ।



**चुल्लीनाम्** उपरि पात्राणि सन्ति ।

**नपुं.**



**श्मश्रुणः** वर्णः धवलः ।



**श्मश्रुणोः** वर्णः कृष्णः ।



**श्मश्रूणां** वर्णः धवलः ।

**अजन्तशब्दानां षष्ठीप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत**—

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**

**कपेः** चञ्चलतां पश्य। **कप्योः** कलहं न पश्य। **कपीनां** समूहं मा कोपय।

एषः **साधोः** आश्रमः अस्ति। **साध्वोः** शीघ्रं मैत्री भवति। **साधूनां** दर्शनं मङ्गलाय भवति।

**गुरोः** वाक्यं स्मर। **गुर्वोः** मध्ये मा प्रविश। एषः **गुरूणां** स्तवनं करोति।

रमेशः **पितुः** समीपे वसति। सुरेशरमेशयोः **पित्रोः** मध्ये वार्ता प्रचलति। **पितॄणां** तर्पणाय पितृपक्षः भवति।

इदं **गोः** दुग्धम् अस्ति। द्वयोः **गवोः** समानं रूपम् अस्ति। एषः **गवां** स्वामी अस्ति।

**स्त्री.**

अहं **लतायाः** कुञ्जे सर्पम् अपश्यम्। **लतयोः** मध्ये वृक्षः अस्ति। **लतानां** मध्ये वृक्षः अस्ति।

**भूमेः** अधिकं दोहनं न उचितम्। द्वयोः **भूम्योः** स्वामी एकः एव अस्ति। नगरे **विवादित-भूमीनाम्** अधिग्रहणम् अभवत्।

अद्य **वध्वाः** आगमनम् अस्ति। **वध्वोः** कलहं दृष्ट्वा माता दुःखिता भवति। **वधूनां** भूषणं लज्जा अस्ति।

पुत्रः **मातुः** समीपं याति। इदानीं वरवध्वोः **मात्रोः** मेलनं भवति। सर्वासां **मातॄणां** सन्ततिषु स्नेहः भवति।

**नपुं.**

**वारिणः** संरक्षणम् आवश्यकम् अस्ति। गङ्गायमुनयोः **वारिणोः** महत्त्वं प्रसिद्धम् अस्ति। प्रयागे नदीत्रयस्य **वारीणां** सङ्गमः अस्ति।

**मधुनः** आस्वादनं करोति। दधि**मधुनोः** एकीकरणे न हानिः। अहं **मधूनां** सङ्ग्रहं करोमि।

**अजन्तशब्दानां षष्ठ्यन्तरूपाणि**

**त्रिषु वचनेषु षष्ठ्यन्त-रूपाणि स्मरत—**

[ तीनों वचनों में अधोलिखित षष्ठ्यन्त रूपों का स्मरण करें। Remember the genitive forms of the following words in three numbers. ]

**पुं.**

| | | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|---|
| इकारान्तः | (हरि) | हरेः | हर्योः | हरीणाम् |
| इकारान्तः | (रवि) | रवेः | रव्योः | रवीणाम् |
| उकारान्तः | (गुरु) | गुरोः | गुर्वोः | गुरूणाम् |
| उकारान्तः | (शम्भु) | शम्भोः | शम्भ्वोः | शम्भूनाम् |
| ऋकारान्तः | (पितृ) | पितुः | पित्रोः | पितृणाम् |
| ऋकारान्तः | (धातृ) | धातुः | धात्रोः | धातृणाम् |
| ऋकारानतः | (भ्रातृ) | भ्रातुः | भ्रात्रोः | भ्रातृणाम् |
| ऋकारान्तः | (दातृ) | दातुः | दात्रोः | दातृणाम् |
| ओकारान्तः | (गो) | गोः | गवोः | गवाम् |

**स्त्री.**

| | | | | |
|---|---|---|---|---|
| इकारान्तः | (मति) | मत्याः / मतेः | मत्योः | मतीनाम् |
| उकारान्तः | (धेनु) | धेनोः / धेन्वाः | धेन्वोः | धेनूनाम् |
| ऊकारान्तः | (वधू) | वध्वाः | वध्वोः | वधूनाम् |
| ऋकारान्तः | (मातृ) | मातुः | मात्रोः | मातृणाम् |

**नपुं.**

| | | | | |
|---|---|---|---|---|
| इकारान्तः | (वारि) | वारिणः | वारिणोः | वारीणाम् |
| इकारान्तः | (अक्षि) | अक्ष्णः | अक्ष्णोः | अक्ष्णाम् |
| उकारान्तः | (मधु) | मधुनः | मधुनोः | मधूनाम् |

## अभ्यासः — 85

✍ **अधोलिखितानाम् अजन्तशब्दानां षष्ठ्यन्त-रूपाणि लिखत—**

[ अधोलिखित अजन्तशब्दों के षष्ठ्यन्त रूप लिखें। Write the genitive forms of the following words ending in vowel. ]

| प्रातिपदिकम् | एक. | द्वि. | बहु. |
|---|---|---|---|
| 1. अग्नि | | | |
| 2. वायु | | | |
| 3. पितृ | | | |
| 4. गो | | | |
| 5. लता | | | |
| 6. मति | | | |
| 7. गौरी | | | |
| 8. धेनु | | | |
| 9. वधू | | | |
| 10. मातृ | | | |
| 11. दधि | | | |
| 12. अस्थि | | | |

## हलन्तशब्दानां षष्ठीप्रयोगाः

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



**वणिजः** हस्ते कङ्कणम् अस्ति।



**वणिजोः** समीपे ग्राहकाः सन्ति।



**वणिजाम्** आपणेषु वस्तूनि सन्ति।



**राज्ञः** शिरसि किरीटम् अस्ति।



**राज्ञोः** मन्त्रणा प्रचलति।



**राज्ञां** सभा भवति।



**विद्यार्थिनः** हस्ते पुस्तकम् अस्ति।



**विद्यार्थिनोः** स्कन्धयोः स्यूतः अस्ति।



**विद्यार्थिनां** पुरतः अध्यापकः अस्ति।

स्त्री.







**योषितः** पादे किङ्कणिका अस्ति। **योषितोः** पादेषु किङ्कणिकाः सन्ति। **योषितां** पादेषु किङ्कणिकाः सन्ति।







**विद्युतः** कान्तिः शोभते। **विद्युतोः** कान्तिः शोभते। **विद्युतां** कान्तिः शोभते।

नपुं.







**वपुषः** वर्णः श्यामः। **वपुषोः** वर्णः गौरः। **वपुषां** वर्णः श्वेतः।

**हलन्तशब्दानां षष्ठीप्रयोगाः**

## अधोनिर्दिष्टवाक्यानि अवधानपूर्वकं पठत—

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read these sentences carefully. ]

**पुं.**

| | | |
|---|---|---|
| एतद् **वणिजः** गृहम्। | द्वयोः **वणिजोः** पार्श्वे मधु नास्ति। | अयं **वणिजां** समाजः। |
| मम **सुहृदः** पुस्तकम्। | एतयोः **सुहृदोः** स्नेहः श्लाघ्यः। | **सुहृदां** वाचः स्मरामि। |
| **राज्ञः** वचनं पालनीयम्। | **राज्ञोः** मैत्रीं पश्य। | **राज्ञां** युद्धम् अखिलं विनाशयति। |
| **शुनः** क्रन्दनं कर्कशम्। | बालः **शुनोः** बुक्कनाद् बिभेति। | रात्रौ वीथ्यां **शुनां** समूहः भ्रमति। |
| **यूनः** उत्साहं वर्धय। | एतयोः **यूनोः** मैत्री प्रशस्या। | कर्मणि **यूनां** योजनम् आवश्यकम्। |
| ग्रन्थरचनं **विदुषः** कार्यम्। | द्वयोः **विदुषोः** भिन्नं मतम्। | धर्मविषये **विदुषां** मतैक्यं नास्ति। |

**स्त्री.**

| | | |
|---|---|---|
| **वाचः** माधुर्यं सर्वान् आकर्षति। | द्वयोः **वाचोः** निष्कर्षः कः ? | सर्वासां **वाचाम्** एकः एव निष्कर्षः। |
| **सरितः** जलं शीतलम्। | द्वयोः **सरितोः** जलम् आनय। | भिन्नानां **सरितां** जलम् आहर। |

**नपुं.**

| | | |
|---|---|---|
| कि**न्नाम्नः** छात्रस्य लेखनी ? | द्वयोः **नाम्नोः** अर्थः एकः। | अनेकेषां **नाम्नां** वाच्यः परमेश्वरः। |
| **मनसः** निग्रहः एव योगः। | विवाहः द्वयोः **मनसोः** ऐक्यम्। | इयं विविधानां **मनसाम्** इच्छा। |
| **वपुषः** त्यागः एव मरणम्। | मल्लयोः **वपुषोः** सौष्ठवं दर्शनीयम् अस्ति। | अनेकेषां **वपुषाम्** अनन्तरं जीवः मानववपुः प्राप्नोति। |

## हलन्तशब्दानां षष्ठ्यन्तरूपाणि

**अधोलिखितानाम् हलन्तशब्दानां षष्ठ्यन्तरूपाणि स्मरत—**

[ अधोलिखित अजन्त शब्दों के षष्ठ्यन्त रूपों का स्मरण करें। Remember the genitive forms of the following words ending in vowel. ]

**पुं.**

| | | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|---|
| जकारान्त | (वणिज्) | वणिजः | वणिजोः | वणिजाम् |
| तकारान्त | (मरुत्) | मरुतः | मरुतोः | मरुताम् |
| दकारान्त | (सुहृद्) | सुहृदः | सुहृदोः | सुहृदाम् |
| नकारान्त | (राजन्) | राज्ञः | राज्ञोः | राज्ञाम् |
| नकारान्त | (श्वन्) | शुनः | शुनोः | शुनाम् |
| नकारान्त | (युवन्) | यूनः | यूनोः | यूनाम् |
| सकारान्त | (विद्वस्) | विदुषः | विदुषोः | विदुषाम् |

**स्त्री.**

| | | | | |
|---|---|---|---|---|
| चकारान्त | (वाच्) | वाचः | वाचोः | वाचाम् |
| धकारान्त | (क्षुध्) | क्षुधः | क्षुधोः | क्षुधाम् |
| रेफान्त | (गिर्) | गिरः | गिरोः | गिराम् |
| षकारान्त | (प्रावृष्) | प्रावृषः | प्रावृषोः | प्रावृषाम् |

**नपुं.**

| | | | | |
|---|---|---|---|---|
| तकारान्त | (जगत्) | जगतः | जगतोः | जगताम् |
| नकारान्त | (नामन्) | नाम्नः | नाम्नोः | नाम्नाम् |
| षकारान्त | (हविष्) | हविषः | हविषोः | हविषाम् |
| षकारान्त | (वपुष्) | वपुषः | वपुषोः | वपुषाम् |
| सकारान्त | (पयस्) | पयसः | पयसोः | पयसाम् |

## अभ्यासः — 86

**अधोलिखितानां हलन्तशब्दानां षष्ठ्यन्त-रूपाणि लिखत—**

[ अधोलिखित हलन्त शब्दों के षष्ठ्यन्त रूप लिखें। Write the genitive forms of the following words ending in consonant. ]

| प्रातिपदिकम् | एक. | द्वि. | बहु. |
|---|---|---|---|
| 1. धीमत् | | | |
| 2. आत्मन् | | | |
| 3. शरद् | | | |
| 4. आशिष् | | | |
| 5. मनस् | | | |
| 5. हविष् | | | |
| 7. वपुष् | | | |

## अभ्यासः — 87

**एकैकस्मात् कोष्ठकात् एकैकं पदं स्वीकृत्य यथोदाहरणं वाक्यानि रचयत (किं पदं कुत्र स्वीकरणीयम् इति प्रदत्ता सङ्ख्या सूचयति)—**

[ प्रत्येक कोष्ठक से एक-एक पद चुनकर उदाहरण के अनुसार वाक्य रचना करें (कौन पद कहाँ चुनना है यह प्रदत्त संख्या सूचित करती है)। Make sentences with the help of one word from each box as shown in the example. Given number indicates the placing of the words. ]

| | | | |
|---|---|---|---|
| (1) | (2) | (3) | (4) |
| **हरिः** | गुरवः | दातारः | पिता |
| (5) | (6) | (7) | (8) |
| गावः | मतिः | नद्यः | वध्वः |
| (9) | (10) | (11) | (12) |
| माता | सरितः | उपानहौ | जगत् |
| (13) | (14) | (15) | |
| राजानः | अहः | वपुः | |

| | | | |
|---|---|---|---|
| (1) | (2) | (3) | (4) |
| **कीर्तनम्** | छात्राः | न्यूनता | वचनम् |
| (5) | (6) | (7) | (8) |
| पयः | व्यायामः | नीरम् | आगमनम् |
| (9) | (10) | (11) | (12) |
| क्षीरम् | आधिक्यम् | मार्जनम् | नाशः |
| (13) | (14) | (15) | |
| मन्त्रिणः | भोजनम् | कांन्तिः | |

1. ........हरेः........ ........कीर्तनं........ कुर्यात् ।

2. पठन्ति ।

3. नास्ति ।

4. अनुपालयति ।

5. मधुरं भवति ।

6. शास्त्राभ्यासेन भवति ।

7. स्वच्छं भवति ।

8. भवति ।

9. अमृतं भवति ।

10. बिहारप्रान्ते अस्ति ।

11. प्रत्यहं आवश्यकम् अस्ति ।

12. प्रलये भवति ।

13. बुद्धिमन्तः भवेयुः ।

14. समाप्तम् ।

15. द्योतते ।

# विभज्य प्रयोगः

**परस्मैपदिनां विभज्य प्रयोगः (लटि)**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढें। Read the following sentences. ]

| | |
|---|---|
| पण्डितः विषयम् उपस्थापयति। | पण्डितः विषयस्य उपस्थापनं करोति। |
| सेविका भूमिं सम्मार्जयति। | सेविका भूमेः सम्मार्जनं करोति। |
| माता वस्त्रम् आच्छादयति। | माता वस्त्रस्य आच्छादनं करोति। |
| न्यायवादी विचारं मण्डयति। | न्यायवादी विचारस्य मण्डनं करोति। |
| प्रचारकः धनं सङ्गृह्णाति। | प्रचारकः धनस्य सङ्ग्रहणं करोति। |
| गुरुः समस्यां परिहरति। | गुरुः समस्यायाः परिहारं करोति। |
| अध्यापकः छात्रम् आह्वयति। | अध्यापकः छात्रस्य आह्वानं करोति। |
| रमेशः सभाकार्यक्रमं निर्वहति। | रमेशः सभाकार्यक्रमस्य निर्वहणं करोति। |
| पण्डितः ग्रन्थं परिशीलयति। | पण्डितः ग्रन्थस्य परिशीलनं करोति। |
| दुष्टः सज्जनम् उपहसति। | दुष्टः सज्जनस्य उपहासं करोति। |
| कर्मकराः रज्जुम् आकर्षन्ति। | कर्मकराः रज्ज्वाः आकर्षणं कुर्वन्ति। |
| पण्डितः ग्रन्थम् अनुवदति। | पण्डितः ग्रन्थस्य अनुवादं करोति। |
| गृहस्वामी अतिथिं सत्करोति। | गृहस्वामी अतिथेः सत्कारं करोति। |
| पिता धनम् अर्जयति। | पिता धनस्य अर्जनं करोति। |
| अर्चकः मूर्तिं प्रतिष्ठापयति। | अर्चकः मूर्तेः प्रतिष्ठापनं करोति। |
| भगिनी द्वारम् उद्घाटयति। | भगिनी द्वारस्य उद्घाटनं करोति। |
| सेविकाः पात्राणि प्रक्षालयन्ति। | सेविकाः पात्राणां प्रक्षालनं कुर्वन्ति। |
| अध्यापकाः दोषान् परिष्कुर्वन्ति। | अध्यापकाः दोषाणां परिष्कारं कुर्वन्ति। |
| प्रयाणिकाः यानम् पश्यन्ति। | प्रयाणिकाः यानस्य दर्शनं कुर्वन्ति। |
| छात्राः कक्ष्यां प्रविशन्ति। | छात्राः कक्ष्यायाः प्रवेशं कुर्वन्ति। |
| भगिन्यः भारतमातरम् अलङ्कुर्वन्ति। | भगिन्यः भारतमातुः अलङ्कारं कुर्वन्ति। |

**अवधेयम्**

**पण्डितः विषयम् उपस्थापयति।** **पण्डितः विषयस्य उपस्थापनं करोति।**

अत्र वाक्यद्वयम् अस्ति। 'पण्डितः विषयम् उपस्थापयति' इत्यत्र प्रथमे वाक्ये 'पण्डितः' कर्तृपदम्, 'विषयम्' कर्मपदम्, 'उपस्थापयति' इति च क्रियापदम्। नियमानुसारं कर्मपदात् द्वितीयाविभक्तिः। 'पण्डितः विषयस्य उपस्थापनं करोति' इत्यत्र कृदन्तक्रियायाः योगे 'विषयम्' इति द्वितीयान्तं कर्मपदं षष्ठ्यन्तं जायते। प्रथमवाक्यस्य कर्मपदात् विषयम् इत्यतः षष्ठी विभक्तिः अभवत्।

## अभ्यासः — 88

**अधोभागे विद्यमानायाः मञ्जूषायाः योग्यं पदं चित्वा रिक्तस्थानानि पूरयत—**

[अधोनिर्दिष्ट मञ्जूषा से योग्य पद चुनकर रिक्तस्थान भरें। Fill in the blanks with the appropriate words from the box given below.]

**उदा.** 1. प्रदर्शयति = **प्रदर्शनं** करोति।
2. आच्छादयति = ........ करोति।
3. प्रविशति = ........ करोति।
4. उपस्थापयति = ........ करोति।
5. पिदधाति = ........ करोति।
6. अर्जयति = ........ करोति।
7. प्रतिष्ठापयति = ........ करोति।
8. अलङ्करोति = ........ करोति।
9. परिहरति = ........ करोति।
10. अनुसरति = ........ करोति।
11. उत्पतति = ........ करोति।
12. सम्मार्जयति = ........ करोति।
13. मण्डयति = ........ करोति।
14. आलोडयति = ........ करोति।
15. सत्करोति = ........ करोति।
16. उद्घाटयति = ........ करोति।
17. निर्वहति = ........ करोति।
18. आह्वयति = ........ करोति।
19. उपहसति = ........ करोति।
20. परिशीलयति = ........ करोति।

परिहारम्, उपहासम्, निर्वहणम्, परिशीलनम्, आच्छादनम्, प्रवेशम्, अलङ्कारम्, आह्वानम्, मण्डनम्, सत्कारम्, **प्रदर्शनम्**, उपस्थापनम्, प्रतिष्ठापनम्, उद्घाटनम्, आलोडनम्, सम्मार्जनम्, उत्पतनम्, अर्जनम्, पिधानम्, अनुसरणम्

## अभ्यासः – 89

✍ **कोष्ठके दत्तानि पदानि परिवर्त्य रिक्तस्थानं पूरयत–**

[ कोष्ठक में दिये गए पदों को परिवर्तन कर रिक्तस्थान भरें। Fill in the blanks by converting the words given in the bracket. ]

| | | | | | |
|---|---|---|---|---|---|
| **यथा** (रसः) | **रसस्य** | आस्वादनं करोति। | | | |
| 2. (अतिथिः) | | सत्कारं कुर्वन्ति। | 10. (कथा) | | अनुवादं करोमि। |
| 3. (वस्तुप्रदर्शिनी) | | उद्घाटनं करोति। | 11. (आत्मा) | | अलङ्कारं करोमि। |
| 4. (धनम्) | | सङ्ग्रहणं करोति। | 12. (उत्तरपत्राणि) | | परिशोधनं करोति। |
| 5. (वस्त्रम्) | | प्रक्षालनं करोति। | 13. (चित्रम्) | | प्रदर्शनं करोमि। |
| 6. (मित्रम्) | | उपहासं करोति। | 14. (पाठः) | | विवरणं करोति। |
| 7. (पत्रिका) | | पठनं करोमि। | 15. (वस्त्राणि) | | प्रसारणं करोति। |
| 8. (श्लोकाः) | | सङ्ग्रहणं करोति। | 16. (समस्याः) | | परिहारं करोति। |
| 9. (अतिथयः) | | आह्वानं कुर्वन्ति। | 17. (भवनम्) | | उद्घाटनं करोति। |

**क्रियायाः विभज्य प्रयोगे कर्मणः षष्ठी (कृदन्तयोगे षष्ठी)**

📖 **अधोनिर्दिष्टानि वाक्यानि पठत–**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

बालकः द्वारम् उद्घाटयति।
↓
बालकः द्वारस्य उद्घाटनं करोति।

ते वाक्यानि स्मरन्ति।
↓
ते वाक्यानां स्मरणं कुर्वन्ति।

भक्ताः देवं ध्यायन्ति।
↓
भक्ताः देवस्य ध्यानं कुर्वन्ति।

**अवधेयम्**

उपरि दर्शितेषु त्रिषु वाक्येषु क्रियापदानि विभज्य– 'उद्घाटनं करोति', 'स्मरणं करोति' इत्यादिरूपेण लिखितम्। यदा एवं क्रियापदस्य विभागः क्रियते, तदा प्रथम-वाक्यस्य यत् कर्म तस्मात् षष्ठीविभक्तिः भवति, न तु द्वितीया। अत्र कृदन्तक्रियायोगे कर्मणि षष्ठी भवति इति नियमः।

## कृदन्तयोगे कर्त्तरि षष्ठी

**अधोनिर्दिष्टानि वाक्यानि पठत–**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| | |
|---|---|
| रामः पठति | रामस्य पठनं भवति। |
| रामः लिखति | रामस्य लेखनं भवति। |
| बालकः गच्छति | बालकस्य गमनं भवति। |
| अश्वः धावति | अश्वस्य धावनं भवति। |
| बालिका गायति | बालिकायाः गायनं भवति। |

**अवधेयम्**

उपरि दर्शितेषु वाक्येषु क्रियापदं विभज्य– 'पठनं भवति', 'लेखनं भवति' इत्यादिरूपेण लिखितम्। यदा एवं क्रियापदस्य विभागः क्रियते, तदा प्रथम-वाक्यस्य यत् कर्तृपदं तस्मात् षष्ठीविभक्तिः भवति, न तु प्रथमा। अत्र कृदन्तक्रियायोगे कर्त्तरि षष्ठी भवति इति नियमः।

## कृदन्तयोगे कर्त्तरि कर्मणि च षष्ठी

**अधोनिर्दिष्टानि वाक्यानि पठत–**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

ईश्वरः संसारं साधु पालयति।

ईश्वरस्य संसारस्य पालनं साधु अस्ति।

गुरुः शिष्यं साधु पाठयति।

गुरोः शिष्यस्य पाठनं साधु अस्ति।

पाणिनिः विचित्रं सूत्रं करोति।

पाणिनेः सूत्रस्य कृतिः विचित्रा अस्ति।

## अभ्यासः – ९०

✍ **मञ्जूषायाः साहाय्येन अधोनिर्दिष्टेषु वाक्येषु क्रियापदं विभज्य कर्मपदं षष्ठ्या परिवर्त्य वाक्यानि पुनः लिखत–**

[ मञ्जूषा के आधार पर क्रियापदों का विभाजन करते हुए कर्मपद को षष्ठ्यन्त में बदल कर अधोनिर्दिष्ट वाक्यों को पुनः लिखें। Re-write the following sentences by splitting the verbal forms with the help of the box by converting the accusaive case-ending into genitive. ]

अनुकरणम्, ध्यानम्, स्मरणम्, दर्शनम्, ताडनम्, लालनम्, दर्शनम्, पानम्, हननम्, क्षालनम्, मार्जनम्, **परिशीलनम्**, गमनम्, दर्शनम्, पालनम्, परिभ्रमणम्, गमनम्, स्मरणम्, पूजनम्, दर्शनम्।

| | | | |
|---|---|---|---|
| उदा. | बालकः | ग्रन्थं ↓ | परिशीलयति। |
| | बालकः | ग्रन्थस्य | **परिशीलनं** करोति। |
| 1. | बालकः | गुरुम् | अनुकरोति। |
| | बालकः | | । |
| 2. | भक्ताः | ईश्वरं | ध्यायन्ति। |
| | भक्ताः | | । |
| 3. | छात्राः | पाठं | स्मरन्ति। |
| | छात्राः | | । |
| 4. | यात्रिणः | मूर्तिं | पश्यन्ति। |
| | यात्रिणः | | । |
| 5. | सैनिकः | चोरान् | ताडयति। |
| | सैनिकः | | । |
| 6. | माता | पुत्रं | लालयति। |
| | माता | | । |
| 7. | पर्यटकाः | तीर्थस्थानानि | पश्यन्ति। |
| | पर्यटकाः | | । |
| 8. | बालः | दुग्धं | पिबति। |
| | बालः | | । |

| | | | | |
|---|---|---|---|---|
| 9. | निर्दयः | शिशून् | हन्ति । | |
| | निर्दयः | | | । |
| 10. | महिलाः | वस्त्राणि | क्षालयन्ति । | |
| | महिलाः | | | । |
| 11. | सेवकः | गृहं | मार्ष्टि । | |
| | सेवकः | | | । |
| 12. | सीता | वनं | गच्छति । | |
| | सीता | | | । |
| 13. | ऋषयः | वेदान् | अपश्यन् । | |
| | ऋषयः | | | । |
| 14. | भृत्यः | आज्ञाम् | अपालयत् । | |
| | भृत्यः | | | । |
| 15. | यात्रिणः | नगरं | परिभ्रमन्ति । | |
| | यात्रिणः | | | । |
| 16. | प्रधानमन्त्री | विदेशम् | अगच्छत् । | |
| | प्रधानमन्त्री | | | । |
| 17. | छात्रः | पाठं | स्मरति । | |
| | छात्रः | | | । |
| 18. | पूजकः | देवान् | पूजयति । | |
| | पूजकः | | | । |
| 19. | दर्शकाः | क्रिकेट्-क्रीडां | पश्यन्ति । | |
| | दर्शकाः | | | । |

**नूतनक्रियारूपम्**

**मार्ष्टि** = स्वच्छं करोति ।

## अभ्यासः — 91

**'अ'-मञ्जूषास्थितानां षष्ठ्यन्तरूपेण 'आ'-मञ्जूषास्थितानां द्वितीयान्तरूपेण च रिक्तस्थानानि पूरयत—**

[ 'अ' मञ्जूषा में स्थित षष्ठी विभक्त्यन्त रूप एवं 'आ' मञ्जूषा में स्थित द्वितीया-विभक्त्यन्त रूप की सहायता से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the help of the genitive forms of the words given in the '*a*'-box and the accusative forms of the words given in the '*ā*'-box. ]

| | 'अ' | | | | | 'आ' |
|---|---|---|---|---|---|---|
| यथा 1. | **पाठः** | छात्रः | **पाठस्य** | **स्मरणं** | करोति। | **स्मरणम्** |
| 2. | बालकः | वानरः | | | करोति। | अनुकरणम् |
| 3. | वस्त्रम् | महिला | | | करोति। | क्षालनम् |
| 4. | सर्वः | पिता | | | कारयति। | परिचयः |
| 5. | वनम् | सीता | | | करोति। | गमनम् |
| 6. | दन्ताः | वृद्धः | | | करोति। | मार्जनम् |
| 7. | उद्यानम् | भृत्यः | | | करोति। | सेचनम् |
| 8. | जलस्य | पथिकः | | | करोति। | पानम् |
| 9. | कन्या | वरः | | | करोति। | वरणम् |
| 10. | रसः | रसिकः | | | करोति। | अनुभवः |
| 11. | मार्गः | पथिकः | | | करोति। | अन्वेषणम् |
| 12. | मत्स्यः | धीवरः | | | करोति। | ग्रहणम् |
| 13. | गीता | साधुः | | | करोति। | पठनम् |
| 14. | हरिः | भक्तः | | | करोति। | भजनम् |
| 15. | भगिनी | बालकः | | | न करोति। | उपहासः |

## विभज्यप्रयोगः (लोटि, लृटि, लङि, लिङि च)

### अधोलिखितानि वाक्यानि पठत—

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

| | | | |
|---|---|---|---|
| **लोटि—** | 1. | त्वं विषयं निवेदय। | त्वं विषयस्य निवेदनं कुरु। |
| | 2. | भवन्तः श्लोकान् सङ्गृह्णन्तु। | भवन्तः श्लोकानां सङ्ग्रहणं कुर्वन्तु। |
| | 3. | आरक्षकाः चोरान् अनुधावन्तु। | आरक्षकाः चोराणाम् अनुधावनं कुर्वन्तु। |
| **लृटि—** | 1. | सचिवः समस्यां परिहरिष्यति। | सचिवः समस्यायाः परिहारं करिष्यति। |
| | 2. | सर्वे श्वः प्रातः पञ्चवादने उत्थास्यन्ति। | सर्वे श्वः प्रातः पञ्चवादने उत्थानं करिष्यन्ति। |
| | 3. | पुत्रः आगामिकाले धनम् अर्जयिष्यति। | पुत्रः आगामिकाले धनस्य अर्जनं करिष्यति। |
| **लङि—** | 1. | लुण्टाकाः जनान् अन्वसरन्। | लुण्टाकाः जनानाम् अनुसरणम् अकुर्वन्। |
| | 2. | अध्यापकाः समस्यां पर्यहरन्। | अध्यापकाः समस्यायाः परिहारम् अकुर्वन्। |
| **क्तवतौ—** | 1. | कर्मकर्यः पात्राणि प्रक्षालितवत्यः। | कर्मकर्यः पात्राणां प्रक्षालनं कृतवत्यः। |
| | 2. | छात्राः कार्यक्रमं निर्व्यूढवन्तः। | छात्राः कार्यक्रमस्य निर्वहणं कृतवन्तः। |
| **लिङि—** | 1. | सर्वे अनुशासनं पालयेयुः। | सर्वे अनुशासनस्य पालनं कुर्युः। |
| | 2. | शिक्षकाः टिप्पणी-पुस्तकानि परिशीलयेयुः। | शिक्षकाः टिप्पणी-पुस्तकानां परिशीलनं कुर्युः। |

### विवरणम्

विभज्यप्रयोगे कर्मणः षष्ठी विभक्तिः भवति। यथा– 'द्वारम् उद्घाटयति' इत्यस्य 'द्वारस्य उद्घाटनं करोति' इति। अत्र 'द्वारम्' इति कर्मणः, विभज्यप्रयोगे सति 'द्वारस्य' इति प्रयोगः। **यथा** लट्लकारे विभज्यप्रयोगनियमः तथैव लोट्लकारे, लृट्लकारे, लङ्लकारे, लिङ्लकारे, भूतकृदन्ते च। एवञ्च विभज्यप्रयोगे लकारस्य अपेक्षा नास्ति।

**षष्ठी विभक्तिः**

## शकुन्तला



शकुन्तला **अप्सरसः मेनकायाः** पुत्री आसीत्। **तस्याः पितुः** नाम विश्वामित्रः आसीत्। कण्वश्च **तस्याः** पालयिता पिता आसीत्। सा **पालयितुः पितुः कण्वमुनेः** आश्रमे वसति स्म। **कण्वस्य** तस्याम् अत्यधिकः स्नेहः आसीत्। **पुत्र्याः शकुन्तलायाः** पालने सः सर्वदा दत्तावधानः आसीत्। कालेन शकुन्तला युवतिः जाता। **तस्याः विवाहस्य** कृते **पितुः कण्वस्य** महती चिन्ता अभवत्।

एकदा सः **दुहितुः शकुन्तलायाः विघ्नानां** विनाशाय सोमतीर्थं प्रति गतवान् आसीत्। तदानीमेव **राज्ञः दुष्यन्तस्य** मृगयाविहारः कल्पितः अभवत्। वने **विचरतः मृगम् अनुसरतः** च **दुष्यन्तस्य** यदा **महाव्रतिनः कण्वस्य** आश्रमे प्रवेशः अभवत् तदा मुनिकुमाराः **आश्रम-मृगाणां** वधं निषिद्धवन्तः। ततः राजा दुष्यन्तः राजोचितानि उपकरणानि त्यक्त्वा पद्भ्यामेव आश्रमं गतवान्। तत्र सखीभिः सह वृक्षान् सिञ्चन्त्या शकुन्तलया सह **नृपतेः दुष्यन्तस्य** साक्षात्कारः अभवत्। दर्शनमात्रेण **उभयोः** परस्परम् अनुरागः सञ्जातः। अतः तदानीं दुष्यन्तः शकुन्तलां गान्धर्वविधिना परिणीतवान्।



**पितुः** अनुपस्थितौ **एतादृश्याः घटनायाः** कारणेन सा चिन्ताग्रस्ता आसीत्। अपि च **राज्ञः दुष्यन्तस्य** अनुरागे लीना आसीत्। तस्मिन् अवसरे एकदा दुर्वासाः ऋषिः **कण्वस्य** आश्रमम् आगतवान्। दुष्यन्तं ध्यायन्ती शकुन्तला **दुर्वाससः** आह्वानं न श्रुतवती। क्रोधेन दुर्वासाः शकुन्तलाम् अभिशप्तवान्–''यस्य ध्याने त्वं मग्ना असि स त्वां विस्मरिष्यति'' इति।



तीर्थात् आगत्य कण्वः सर्वं वृत्तान्तं ज्ञातवान् । मुनिकुमाराभ्यां शार्ङ्गरव-शारद्वताभ्यां गौतम्या च सह कण्वः शकुन्तलां **तस्याः पत्युः चक्रवर्तिनः दुष्यन्तस्य** राजभवनं प्रेषितवान् । शापवशात् गान्धर्वविवाहविषये **दुष्यन्तस्य** विस्मरणं जातम् । दुष्यन्तेन प्रदत्ता मुद्रिका अपि मार्गे **नद्याः** जले अपतत् । अतः **प्रमाणस्य** अभावात् दुष्यन्तः पत्नीरूपेण शकुन्तलां नैव अङ्गीकृतवान् । एतेन वृत्तान्तेन शकुन्तला विषादग्रस्ता अभवत् । किन्तु कण्वाश्रमं न प्रत्यागतवती । **मातुः मेनकायाः** साहाय्येन सा **महामुनेः मारीचस्य** आश्रमं प्राप्तवती । तत्र च सा चक्रवर्तिलक्षणोपेतं भरतनामानं पुत्रं प्रसूतवती ।

एकदा **देवासुरयोः** संग्रामे **मघवतः** साहाय्यार्थं दुष्यन्तः इन्द्रलोकं गतवान् । ततः प्रत्यागमनकाले दुष्यन्तेन सह **शिशोः भरतस्य** साक्षात्कारः अभवत् । सः तदानीं **उद्दाम्नः** कस्यचित् **सिंहशावकस्य** मुखे हस्तं निक्षिप्य दन्तान् गणयन् आसीत् । **तस्य शिशोः** निर्भीकतया प्रभावितः दुष्यन्तः तस्य परिचयं जिज्ञासितवान् । **तस्य मातुः शकुन्तलायाः** प्रत्यभिज्ञानात् परं भरतं स्वपुत्रं ज्ञात्वा सः क्षमायाचनपूर्वकं तं, शकुन्तलां च सहर्षं स्वीकृतवान् ।

◆◆◆

## अभ्यासः — 92

1. **अधोलिखितानां वाक्यानाम् उत्तरं लिखत—**
[ अधोलिखित वाक्यों का उत्तर लिखें। Answer the following questions. ]

(i) शकुन्तला कस्याः पुत्री आसीत् ?

।

(ii) कस्याः पितुः नाम विश्वामित्रः आसीत् ?

।

(iii) शकुन्तला कस्य आश्रमे वसति स्म ?

।

(iv) किमर्थं कण्वस्य चिन्ता अभवत् ?

।

(v) कण्वः कस्याः विघ्नविनाशाय सोमतीर्थं गतवान् ?

।

(vi) कण्वस्य आश्रमे कस्य प्रवेशः अभवत् ?

।

(vii) शकुन्तलया सह कस्य साक्षात्कारः अभवत् ?

।

(viii) शकुन्तला कस्य आह्वानं न श्रुतवती ?

।

(ix) कण्वः शकुन्तलां कस्य राजभवनं प्रेषितवान् ?

।

(x) मुद्रिका कुत्र अपतत् ?

।

(xi) शकुन्तला मेनकायाः साहाय्येन कस्य आश्रमं प्राप्तवती ?

।

(xii) दुष्यन्तः किमर्थम् इन्द्रलोकं गतवान् ?

।

(xiii) ततः प्रत्यागमनकाले दुष्यन्तेन सह कस्य साक्षात्कारः अभवत् ?

........................................................ ।

(xiv) भरतः कीदृशस्य सिंहस्य दन्तान् गणयति स्म ?

।

(xv) कस्य प्रत्यभिज्ञानात् परं दुष्यन्तः क्षमां याचितवान् ?

।

**2. कोष्ठके लिखितानां पदानां षष्ठ्यन्तरूपैः रिक्तस्थानानि पूरयत–**

**[ कोष्ठक में लिखित पदों के षष्ठ्यन्तरूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the genitive forms of the words given in the bracket. ]**

| | | | | |
|---|---|---|---|---|
| (i) | | पुत्रः रामः। | | (दशरथः) |
| (ii) | | राजधानी नवदेहली। | | (भारतम्) |
| (iii) | | वाणी ज्ञानपूर्णा। | | (विद्वांसः) |
| (iv) | एतत् | | गृहम् अस्ति। | (वणिक्) |
| (v) | वीथ्यां | | समूहः अस्ति। | (श्वानः) |
| (vi) | द्वयोः | | मैत्री विद्यते। | (युवानौ) |
| (vii) | | कृते धनं ददातु। | | (पयः) |
| (viii) | | रक्षणम् आवश्यकम्। | | (वपुः) |
| (ix) | जीवनाय | | आवश्यकता भवति। | (वायुः) |
| (x) | विद्यालये | | सम्मेलनम् अस्ति। | (पितरः) |

| | | | |
|---|---|---|---|
| (xi) | त्वं | दृढतायै दुग्धं पिब। | (अस्थीनि) |
| (xii) | शिष्यः | आह्वानं करोति। | (गुरुः) |
| (xiii) | भक्ताः | पूजनं कुर्वन्ति। | (मघवा) |
| (xiv) | किशोरः | अध्ययनं करोति। | (कादम्बरी) |
| (xv) | माता | मन्थनं करोति। | (दधि) |

**3. अधोलिखित-पदानां त्रिषु वचनेषु षष्ठ्यन्तं रूपं लिखत—**

[ अधोलिखित पदों के तीनों वचनों में षष्ठ्यन्त रूप लिखें। Write the genitive declension of the following words in all the three numbers. ]

| | पदानि | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | हरिः | हरेः | हर्योः | हरीणाम् |
| (i) | भगिनी | | | |
| (ii) | गीता | | | |
| (iii) | भर्ता | | | |
| (iv) | आत्मा | | | |
| (v) | राष्ट्रपतिः | | | |
| (vi) | मरुत् | | | |
| (vii) | सुहृद् | | | |
| (viii) | क्षुत् | | | |
| (ix) | जगत् | | | |
| (x) | हविः | | | |
| (xi) | पिता | | | |
| (xii) | वधू | | | |
| (xiii) | धेनुः | | | |
| (xiv) | स्वसा | | | |

**4. यथोदाहरणं कोष्ठकेषु लिखितशब्दानां षष्ठीविभक्ति-रूपैः रिक्तस्थानानि पूरयत–**
[ उदाहरण के अनुसार कोष्ठक में लिखित षष्ठी विभक्ति रूपों से रिक्तस्थान की पूर्ति करें। **Fill in the blanks with the genitive forms as shown in the example.** ]

| | | | | |
|---|---|---|---|---|
| **उदा.** | अष्टाध्यायी | ........**पाणिनेः**........ | रचना। | (पाणिनिः) |
| (i) | 'उत्तररामचरितम्' | | रचना। | (भवभूतिः) |
| (ii) | कदापि | | दुरुपयोगः न करणीयः। | (शक्तिः) |
| (iii) | लिपिकः उद्योगिनाम् | | निर्माणं करोति। | (सूची) |
| (iv) | सुदर्शनचक्रं | | आयुधम्। | (विष्णुः) |
| (v) | | | दुग्धं सर्वदा मधुरम्। | (धेनुः) |
| (vi) | माता बालस्य | | मार्जनं करोति। | (अश्रूणि) |
| (vii) | गिरीशः | | कर्तनं करोति। | (श्मश्रु) |
| (viii) | जनकस्य | | नाम श्रीरामः। | (जामाता) |
| (ix) | द्रुपदस्य | | नाम द्रौपदी। | (दुहिता) |
| (x) | अद्य | | चित्रं पत्रिकायाम् अस्ति। | (अभिनेता) |
| (xi) | प्रायः | | हस्ते दण्डः कमण्डलुः च भवतः। | (संन्यासिनः) |
| (xii) | जनः | | फलम् अपि अनुभवति। | (पूर्वजन्म) |
| (xiii) | सतत-परिश्रमः | | मूलम्। | (यशः) |

**5. 'अ'-भागस्य उचितेन षष्ठ्यन्तरूपेण सह 'आ' भागं योजयित्वा वाक्यानि रचयत–**

[ अ-भाग के उचित षष्ठ्यन्तरूप के साथ आ-भाग को जोड़कर वाक्य बनाएं। Make sentences by adding the gentive forms of *a*-column with *ā*-column.. ]

| | 'अ' | 'आ' |
|---|---|---|
| (i) | गुरवः | उपदेशः हिताय भवति |
| (ii) | पिता | सेवां करोतु |
| (iii) | स्वसा | साहाय्यं कुरुत |
| (iv) | हिमाद्रिः | हिमालयः इति नामान्तम् |
| (v) | ब्रह्मा | चत्वारि मुखानि सन्ति |
| (vi) | दम्पती | परस्परं दृढः स्नेहः अस्ति |
| (vii) | चन्द्रमाः | षोडश कलाः सन्ति |
| (viii) | धनुः | प्रत्यञ्चा आन्त्रनिर्मिता अस्ति |
| (ix) | हनुमान् | रामभक्तिः प्रसिद्धा अस्ति |
| (x) | त्रिशूली | हस्ते त्रिशूलम् अस्ति |

**उदा.** (i) **गुरूणाम्** उपदेशः हिताय भवति ।

(ii) ।

(iii) ।

(iv) ।

(v) ।

(vi) ।

(vii) ।

(viii) ।

(ix) ।

(x) ।

सुभाषितेषु षष्ठीप्रयोगाः

# सुभाषितानि

भारोऽविवेकिनः शास्त्रं भारो ज्ञानं च रागिणः ।
अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः ॥

ताराणां भूषणं चन्द्रः नारीणां भूषणं पतिः ।
पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम् ॥

नखिनां शस्त्रपाणीनां नदीनां शृङ्गिणां तथा ।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥

विदुषां वदनाद् वाचः सहसा यान्ति नो बहिः ।
याताश्चेन्न पराञ्चन्ति द्विरदानां रदा इव ॥

मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव शूकरः ॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

◆◆◆

**अनुवर्तते**

**कथायां षष्ठीप्रयोगाः**

## मित्रसम्प्राप्तिः

...... मन्थरकः पुनः अपृच्छत्– 'ततः किम् अभवत्'? हिरण्यकः मूषिकः इमां कथाम् अग्रे सारयन् अवदत्– एकदा तस्मिन् मठे बृहत्स्फिक् इति नाम्नः कस्यचित् संन्यासिनः समागमनम् अभवत्। ताम्रचूडः अतिथेः सन्यासिनः सम्यक् आतिथ्यं समाचरत्। रात्रौ तौ प्रसुप्तेः पूर्वं धर्मकथाम् आरब्धवन्तौ। बृहत्स्फिक् इति संन्यासिनः धर्मकथागोष्ठ्याः मध्ये-मध्ये ताम्रचूडः आखूनां त्रासाय जर्जरवंशेन भिक्षापात्रं ताडयति स्म। अतः सावहितेन मनसा ताम्रचूडः तस्य अतिथेः प्रत्युत्तरं न ददाति स्म। अभ्यागतः संन्यासी सुहृदः ताम्रचूडस्य ईदृशेन



व्यवहारेण अप्रसन्नः भूत्वा अवदत्– 'भो ! ताम्रचूड ! त्वं मया सह साह्लादं न जल्पसि। अहम् इदानीम् एव तव मठं त्यक्त्वा अन्यत्र मटे गच्छामि'। अथ तस्य वचसः श्रवणेन ताम्रचूडस्य महती उद्विग्नता अभवत्। ताम्रचूडः अवदत्– 'भगवन् ! मम मनसः अनवधानस्य कारणं भवतः तिरस्कारः नास्ति। अपितु एतेषां दुरात्मनां मूषिकाणां त्रासार्थम् अहम् एवम् आचरामि। एते मूषिकाः प्रोन्नतस्थाने स्थापिते भिक्षापात्रे उत्प्लुत्य सर्वं भिक्षाशेषं भक्षयन्ति। तस्य अभावे मठस्य मार्जनक्रिया अपि न भवति'। संन्यासिनः ताम्रचूडस्य वचः श्रुत्वा अभ्यागतः संन्यासी अवदत्– 'यदि एवम् अस्ति तर्हि एतेषां बिलं पश्यामः। अवश्यं निधानस्य उपरि एतेषां बिलं स्यात्। निधानस्य ऊष्मणा एते प्रकूर्दन्ते। प्रातः आवाम् एकं खनित्रकं गृहीत्वा तेषां बिलम् अन्वेष्टुं गच्छावः'।

अहं संन्यासिनः वचः श्रुत्वा स्वबिलं त्यक्त्वा अन्यत् बिलं प्रति गन्तुं निश्चितवान्। तथा निश्चित्य सपरिवारः भिन्नेन पथा गन्तुं प्रवृत्तवान्। किन्तु यावत् अहं पुरतः गतवान् तावत् सम्मुखं बृहत्कायं मार्जारम्

अपश्यम् । सः आखूनां दर्शनमात्रेण एव तेषाम् उपरि अपतत् । तस्य आक्रमणेन तेषां मध्ये केचन मृताः, केचन अपघातिताः पुनः तत् बिलं प्राविशन् । अहम् एकाकी एव अन्यत्र अगच्छम् । तदनन्तरं तौ संन्यासिनौ मम बिलं प्राप्य तत् खनित्वा मम निधानम् अपि प्राप्तवन्तौ, यस्य ऊष्मणा मम उच्चैः कूर्दनम् भवति स्म । पश्चात् तौ मम निधानं स्वीकृत्य मठम् आगच्छताम् । निधानस्य अभावे दुःखिनः मम कश्चन कालः महाकष्टेन व्यतीतः । एकदा अहम्– 'किं करोमि, कुत्र गच्छामि, कथं भवतु मम अशान्तस्य मनसः शान्तिः, कः वा मार्गः शान्तेः, कः वा पन्थाः निधानस्य पुनः प्राप्तेः' -इति चिन्तयन् निरुत्साहः तस्मिन् मठे पुनः प्राविशम् । ताम्रचूडः पुनः भिक्षापात्रं जर्जरवंशेन ताडयितुम् आरब्धवान् । बृहत्स्फिक् अपृच्छत्– सखे ! किम् अद्य अपि निश्शङ्कं न निद्रासि ? सः आह भगवन् !



दुरात्मनां मूषिकाणाम् उत्पातं किं न पश्यसि । बृहत्स्फिक् विहस्य अवदत्– सखे ! मा बिभीहि, वित्तेन सह अस्य कूर्दनोत्साहः गतः । एतत् वचः श्रुत्वा अहं कोपाविष्टः अधिकेन वेगेन कूर्दितवान् । किन्तु शक्तिवैकल्यात् भूमौ पतितवान् । तौ च विहसन्तौ आस्ताम् । अहम् अतीव खिन्नः स्वदुर्गं प्रत्यावर्तितवान् । मम भृत्याः अपि माम् असमर्थं ज्ञात्वा मम शत्रूणां सेवकाः अभवन् । एकदा अहम् एकाकी एवं चिन्तितवान् यत् तस्य तपस्विनः सकाशे गत्वा तस्य गण्डोपधानीकृतां वित्तपेटिकां शनैः शनैः विदार्य बिलं पुनः आनयामि येन पुनः मम आधिपत्यं स्थापितं भविष्यति । एवं निश्चित्य रात्रौ तत्र गत्वा तथा कर्तुं यावत् प्रवृत्तवान् तावत् प्रबुद्धः सः परिव्राजकः जर्जरवंशेन मम शिरसि ताडितवान् । शिरसः अपघाते अपि कथञ्चित् जीवितः ततः निरगच्छम् । सर्वम् एतत् दुःखम् अनुभूय मित्रेण वायसेन सह अत्र आगतः । मूषिकस्य एतद् वचः श्रुत्वा मन्थरकः अवदत्– मित्र ! शोकं मा कुरु । विदेशवसतेः अपि दुःखं मा कुरु । यतः–



कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥

# द्वितीयः स्तबकः

## 2.6 षष्ठः पाठः

### [ सप्तमी विभक्तिः ]

**अजन्तशब्दानां सप्तमीप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



**गिरौ** मन्दिरम् अस्ति।



**गिर्योः** पर्वतारोहिणौ स्तः।



**गिरिषु** वृक्षाः सन्ति।



**सेतौ** रेलयानम् गच्छति।



**सेत्वोः** यात्रिकाः सन्ति।



**सेतुषु** वाहनानि गच्छन्ति।



**तरौ** फलानि सन्ति।



**तर्वोः** पुष्पाणि विद्यन्ते।



**तरुषु** कपयः कूर्दन्ते।

स्त्री.



**मूर्तौ** आभा अस्ति।



**मूर्त्योः** अलङ्करणानि सन्ति।



**मूर्तिषु** मालाः शोभन्ते।



**द्रोण्यां** जलम् अस्ति।



**द्रोण्योः** दुग्धं स्थापयति।



**द्रोणीषु** लड्डुकाः सन्ति।



**कूप्यां** जलम् अस्ति।



**कूप्योः** औषधम् अस्ति।




**कूपीषु** मधु अस्ति।



**पुष्पाधान्यां** जपाकुसुमम् अस्ति।



**पुष्पाधान्योः** पाटलपुष्पे स्तः।



**पुष्पाधानीषु** कमलानि सन्ति।

## अजन्तशब्दानां सप्तमीप्रयोगाः

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **पुं.** | | |
| **मुनौ** भक्तिः अस्ति। | **मुन्योः** भक्तिः भवतु। | **मुनिषु** गौतमः अन्यतमः अस्ति। |
| **तरौ** फलानि सन्ति। | **तर्वोः** पुष्पाणि विद्यन्ते। | **तरुषु** कपयः कूर्दन्ते। |
| **नेतरि** धैर्यम् आवश्यकम्। | **नेत्रोः** मेलनम् अभवत्। | **नेतृषु** विशिष्टगुणाः भवन्ति। |
| **गवि** मातृत्वम् अस्ति। | एतयोः **गवोः** साम्यं विद्यते। | **गोषु** वर्णभेदः भवति। |
| **स्त्री.** | | |
| **कृतौ** श्रद्धा भवेत्। | **कृत्योः** भेदः अस्ति। | **कृतिषु** सौन्दर्यं स्यात्। |
| **धेनौ** प्रीतिः भवतु। | **धेन्वोः** मध्ये वर्णभेदः अस्ति। | **धेनुषु** भारतीयानां श्रद्धा अस्ति। |
| **भ्रुवि** केशाः भवन्ति। | **भ्रुवोः** कान्तिः भवति। | **भ्रूषु** भङ्गिः अस्ति। |
| **मातरि** आदरः भवतु। | **मात्रोः** समानगुणाः सन्ति। | **मातृषु** दयागुणः भवति। |
| **नपुं.** | | |
| **दध्नि** रुचिः वर्तते। | | |
| तस्य **जानुनि** व्रणः अस्ति। | तस्य **जानुनोः** किं जातम् ? | अश्वस्य **जानुषु** अतीव शक्तिः भवति। |

## अजन्तशब्दानां सप्तमीरूपाणि

**अधोनिर्दिष्टानि रूपाणि स्मरत–**

[ अधोनिर्दिष्ट रूपों का स्मरण करें। Remember the following declension. ]

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| **पुं.** | | | | |
| इकारान्तः | (हरि) | हरौ | हर्योः | हरिषु |
| उकारान्तः | (गुरु) | गुरौ | गुर्वोः | गुरुषु |
| ऋकारान्तः | (पितृ) | पितरि | पित्रोः | पितृषु |
| ओकारान्तः | (गो) | गवि | गवोः | गोषु |
| **स्त्री.** | | | | |
| इकारान्तः | (मति) | मत्याम् | मत्योः | मतिषु |
| उकारान्तः | (तनु) | तनौ | तन्वोः | तनुषु |
| ऊकारान्तः | (भ्रू) | भ्रुवि | भ्रुवोः | भ्रूषु |
| ऋकारान्तः | (मातृ) | मातरि | मात्रोः | मातृषु |
| **नपुं.** | | | | |
| इकारान्तः | (वारि) | वारिणि | वारिणोः | वारिषु |
| उकारान्तः | (जानु) | जानुनि | जानुनोः | जानुषु |

## अभ्यासः — 93

**अधः सप्तम्याः वचनद्वयेन सह अन्यस्याः विभक्तेः तृतीयं रूपम् अस्ति। तद् निर्दिष्टस्थाने विलिख्य तदग्रे तस्य विभक्ति-वचने निर्दिशत। तदग्रे च सप्तम्याः त्यक्तं रूपमपि वचन-निर्देशसहितं निर्दिष्टस्थाने लिखत—**

[ नीचे सप्तमी के दो रूपों के साथ अन्य विभक्ति का तीसरा रूप हैं। उसे निर्दिष्ट स्थान पर उसका विभक्ति, वचन भी लिखिए। तदनन्तर सप्तमी को परित्यक्त तीसरे रूप को भी यथास्थान वचन-निर्देश करते हुए लिखिए। Amongst the declension given below one form belongs to other than locative case. Identify that form and pointout its case along with number in the specified space and also supply the left locative form along with its number. ]

| | अन्यविभक्तेः रूपम् | विभक्तिः वचनम् | सप्तम्याः त्यक्तं रूपम् | वचनम् |
|---|---|---|---|---|
| उदा. गुरौ गुरोः गुरुषु । | गुरोः | षष्ठी-एक. | गुर्वोः | द्वि. |
| 1. (पुं.) मुने मुन्योः मुनिषु । | | | | |
| 2. (पुं.) कवये कव्योः कविषु । | | | | |
| 3. (पुं.) शिशौ शिशून् शिशुषु । | | | | |
| 4. (पुं.) भ्रात्रे भ्रात्रोः भ्रातृषु । | | | | |
| 5. (पुं.) मतौ मत्योः मतिभ्यः । | | | | |
| 6. (स्त्री.) श्रुत्याम् श्रुत्योः श्रुतेः । | | | | |
| 7. (स्त्री.) हन्वा हन्वोः हनुषु । | | | | |
| 8. (स्त्री.) भ्रुवा भ्रुवोः भ्रूषु । | | | | |
| 9. (स्त्री.) श्वश्रू श्वश्र्वोः श्वश्रूषु । | | | | |
| 10. (स्त्री.) स्त्रियः स्त्रियोः स्त्रीषु । | | | | |
| 11. (स्त्री.) मात्रे मात्रोः मातृषु । | | | | |
| 12. (स्त्री.) स्वसरि स्वस्रोः स्वसृणाम् । | | | | |
| 13. (स्त्री.) श्रियाम् श्रियोः श्रियम् । | | | | |
| 14. (स्त्री.) लक्ष्म्याः लक्ष्म्योः लक्ष्मीम् । | | | | |
| 15. (नपुं.) वारिणः वारिणोः वारिषु । | | | | |
| 16. (नपुं.) मधुनि मधुभ्याम् मधुषु । | | | | |
| 17. (नपुं.) जानुनि जानुना जानुषु । | | | | |
| 18. (नपुं.) अश्रुणि अश्रुणोः अश्रुणा । | | | | |
| 19. (नपुं.) अस्थ्ना अस्थ्नोः अस्थिषु । | | | | |

## हलन्तशब्दानां सप्तमीप्रयोगाः

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



**मरुति** शैत्यम् अस्ति।



**मरुतोः** शैत्यम् अस्ति।



**मरुत्सु** शैत्यम् अस्ति।

**स्त्री.**



**सरिति** नौका चलति।



**सरितोः** नौके चलतः।



**सरित्सु** नौकाः चलन्ति।

**नपुं.**



शिवस्य **शिरसि** चन्द्रः अस्ति।



खल्वाटयोः **शिरसोः** केशाः न सन्ति।



महिलानां **शिरस्सु** पुष्पालङ्काराः सन्ति।

**हलन्तशब्दानां सप्तमीप्रयोगाः**

**अधोनिर्दिष्टवाक्यानि अवधानपूर्वकं पठत—**

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read the following sentences carefully. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **पुं.** | | | |
| | **धीमति** विवेकः भवति। | **धीमतोः** चर्चा प्रचलति। | **धीमत्सु** उत्तमगुणाः भवन्ति। |
| | **मन्त्रिणि** अधिकं धनं विद्यते। | **मन्त्रिणोः** गर्वभावः अस्ति। | **मन्त्रिषु** अधिकारः भवति। |
| | **महति** शक्तिः भवति। | **महतोः** शास्त्रविचारः प्रचलति। | **महत्सु** दयागुणः वर्तते। |
| | **राज्ञि** राज्याधिकारः वर्तते। | **राज्ञोः** भेदः अस्ति। | **राजसु** धर्मबुद्धिः स्यात्। |
| | **आत्मनि** गुणाः भवन्ति। | **आत्मनोः** साम्यं विद्यते। | **आत्मसु** ईश्वरः वसति। |
| **स्त्री.** | | | |
| | **सरिति** जलम् अस्ति। | **सरितोः** नौकाः सन्ति। | **सरित्सु** मीनाः तरन्ति। |
| **नपुं.** | | | |
| | **नाम्नि** वैशिष्ट्यम् अस्ति। | **नाम्नोः** भिन्नता अस्ति। | **नामसु** अक्षराणि भवन्ति। |
| | **वपुषि** सौन्दर्यमस्ति। | द्वयोः **वपुषोः** अन्तरं भवति। | **वपुःषु** अङ्गानि भवन्ति। |

## हलन्तशब्दानां सप्तमीरूपाणि

### अधोनिर्दिष्टानि रूपाणि स्मरत—

[ अधोनिर्दिष्ट रूपों का स्मरण करें। Remember the following declension. ]

| | | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| **पुं.** | | | | | |
| | तकारान्तः | (मरुत्) | मरुति | मरुतोः | मरुत्सु |
| | तकारान्तः | (धीमत्) | धीमति | धीमतोः | धीमत्सु |
| | तकारान्तः | (महत्) | महति | महतोः | महत्सु |
| | नकारान्तः | (मन्त्रिन्) | मन्त्रिणि | मन्त्रिणोः | मन्त्रिषु |
| | नकारान्तः | (आत्मन्) | आत्मनि | आत्मनोः | आत्मसु |
| | नकारान्तः | (राजन्) | राज्ञि / राजनि | राज्ञोः | राजसु |
| **स्त्री.** | | | | | |
| | चकारान्तः | (वाच्) | वाचि | वाचोः | वाक्षु |
| | तकारान्तः | (सरित्) | सरिति | सरितोः | सरित्सु |
| | धकारान्तः | (क्षुध्) | क्षुधि | क्षुधोः | क्षुत्सु |
| | शकारान्तः | (दिश्) | दिशि | दिशोः | दिक्षु |
| | षकारान्तः | (प्रावृष्) | प्रावृषि | प्रावृषोः | प्रावृट्सु |
| | षकारान्तः | (आशिष्) | आशिषि | आशिषोः | आशीष्षु |
| **नपुं.** | | | | | |
| | तकारान्तः | (बृहत्) | बृहति | बृहतोः | बृहत्सु |
| | नकारान्तः | (नामन्) | नामनि/नाम्नि | नाम्नोः | नामसु |
| | षकारान्तः | (वपुष्) | वपुषि | वपुषोः | वपुष्षु |
| | सकारान्तः | (मनस्) | मनसि | मनसोः | मनस्सु |

## अभ्यासः — 94

✍ **एतेषां प्रातिपदिकानां सप्तम्याः एकवचनान्त-रूपाणि लिखत—**

[ इन मूलशब्दों के सप्तमी-एकवचनान्त रूप लिखें। Write the declension of these base words in locative singular. ]

| | | | | | |
|---|---|---|---|---|---|
| उदा. | वाच् | इ → वाचि | | | इ → |
| 1. | मरुत् | | 9. | दृश् | |
| 2. | धीमत् | | 10. | आशिष् | |
| 3. | राजन् | | 11. | सरित् | |
| 4. | मन्त्रिन् | | 12. | क्षुत् | |
| 5. | महत् | | 13. | वपुष् | |
| 6. | आत्मन् | | 14. | नामन् | |
| 7. | गुणिन् | | 15. | बृहत् | |
| 8. | दिश् | | 16. | मनस् | |

## अभ्यासः — 95

✍ **एतेषां प्रातिपदिकानां सप्तम्याः द्विवचनान्त-रूपाणि लिखत—**

[ इन मूल शब्दों के सप्तमी-द्विवचनान्त रूप लिखें। Write the declension of these base words in locative dual. ]

| | | | | | |
|---|---|---|---|---|---|
| उदा. | वाच् | ओः → वाचोः | 10. | राजन् | ओः → राज्ञोः |
| 1. | स्रज् | | 11. | मन्त्रिन् | |
| 2. | त्वच् | | 12. | पथिन् | |
| 3. | आपद् | | 13. | ब्रह्मन् | |
| 4. | विपद् | | 14. | सरित् | |
| 5. | सम्पद् | | 15. | नामन् | |
| 6. | शरद् | | 16. | क्षुत् | |
| 7. | संसद् | | 17. | वपुष् | |
| 8. | मरुत् | | 18. | बृहत् | |
| 9. | धीमत् | | 19. | मनस् | |

## अभ्यासः – 96

**एतेषां प्रातिपदिकानां सप्तम्याः बहुवचनान्त-रूपाणि लिखत–**

[ इन मूलशब्दों के सप्तमी-बहुवचनान्त रूप लिखें। Write the declension of these base words in locative plural. ]

उदा. दिश् **दिक्षु**

| | | | |
|---|---|---|---|
| 1. | राजन् | 9. | आपत् |
| 2. | मन्त्रिन् | 10. | शरत् |
| 3. | वाच् | 11. | पथिन् |
| 4. | स्रज् | 12. | क्षुत् |
| 5. | मरुत् | 13. | मनस् |
| 6. | धीमत् | 14. | धनुष् |
| 7. | सम्पत् | 15. | महत् |
| 8. | त्वच् | 16. | दण्डिन् |

## अभ्यासः – 97

**दिलीपः कश्चन तरुणः। तस्य कस्मिन् कीदृशः भावः अस्ति इति अधः निर्दिष्टम्। तदाधारेण वाक्यानि पूरयत–**

[ दिलीप एक युवक है। उसका किसके लिए कैसा भाव है- नीचे दिया गया है। उसके आधार पर वाक्यों को पूरा करें। Dilip is a young man. The feelings he has for a person or thing are given below. Complete the sentences on that basis. ]

| | | | | |
|---|---|---|---|---|
| उदा. | **गुरुः** | **भक्तिः** | दिलीपस्य | **गुरौ भक्तिः** अस्ति । |
| 1. | माता | प्रीतिः | दिलीपस्य | । |
| 2. | बालकः | वात्सल्यम् | दिलीपस्य | । |
| 3. | कार्यकर्तारः | आदरः | दिलीपस्य | । |
| 4. | भ्राता | स्नेहः | दिलीपस्य | । |
| 5. | दरिद्राः | कारुण्यम् | दिलीपस्य | । |
| 6. | पिता | श्रद्धा | दिलीपस्य | । |
| 7. | राजा | मैत्री | दिलीपस्य | । |
| 8. | मन्त्रिणः | परिचयः | दिलीपस्य | । |
| 9. | वाक् | स्पष्टता | दिलीपस्य | । |

| | | | |
|---|---|---|---|
| 10. | वैरिणः | द्वेषः | दिलीपस्य.................................... । |
| 11. | गुणिनः | आदरः | दिलीपस्य.................................... । |
| 12. | धेनवः | पूज्यभावः | दिलीपस्य.................................... । |
| 13. | जानु (द्वि.व.) | दृढता | दिलीपस्य.................................... । |
| 14. | मूर्तिः | श्रद्धा | दिलीपस्य........ । |
| 15. | कार्याणि | चतुरता | दिलीपस्य । |

## अभ्यासः — 98

**कोष्ठके प्रदत्तान् शब्दान् सप्तमी-विभक्तेः उपयुक्तवचने परिवर्त्य वाक्यं पूरयत—**
**[ कोष्ठक में प्रदत्त पदों को सप्तमी विभक्ति के उचित वचनों में परिवर्तन कर वाक्यों को पूरा करें। Complete the sentences with the appropriate locative forms of the words given in the bracket. ]**

| | | | | |
|---|---|---|---|---|
| 1. | गणेशः | (देवाः) | **देवेषु**......... | प्रथमः पूज्यः । |
| 2. | कालिदासः | (कवयः) | | श्रेष्ठः । |
| 3. | अमेरिकादेशः | (विज्ञानक्षेत्रम्) | | अग्रणीः । |
| 4. | गोविन्दः | (छात्राः) | | पटुः । |
| 5. | कृष्णा गौः | (गावः) | | बहुक्षीरा । |
| 6. | गङ्गा | (नद्यः) | | पवित्रतमा । |
| 7. | हिमालयः | (पर्वताः) | | श्रेष्ठः । |
| 8. | शकुन्तला | (सख्यः) | | बुद्धिमती । |
| 9. | अनसूया | (स्त्रियः) | | पतिव्रता । |
| 10. | काशी | (विद्याक्षेत्राणि) | | प्रसिद्धा । |
| 11. | मिथिला | (न्यायशास्त्रम्) | | प्रसिद्धा । |
| 12. | काश्मीरप्रदेशः | (साहित्यम्) | | प्रसिद्धः । |
| 13. | नाटकं | (काव्यानि) | | रम्यम् । |
| 14. | काकः | (पक्षिणः) | | धूर्तः । |
| 15. | मयूरः | (पक्षिणः) | | श्रेष्ठः । |
| 16. | वसिष्ठः | (मुनयः) | | श्रेष्ठः । |
| 17. | महाभारतम् | (ग्रन्थाः) | | विशालतमः ग्रन्थः । |
| 18. | रामायणम् | (काव्यानि) | | आदिकाव्यम् । |
| 19. | तिरुपति-नगरं | (तीर्थक्षेत्राणि) | | अन्यतमम् । |
| 20. | वटः | (वृक्षाः) | | विशालः । |

**सप्तमी विभक्तिः**

## सर्वे भद्राणि पश्यन्तु

अस्माकं **भारतदेशे** बह्व्यः नद्यः प्रवहन्ति । तासां नदीनां **तटवर्तिषु प्रदेशेषु** बहवः आश्रमाः सन्ति । तासु **नदीषु** गङ्गानदी अन्यतमा । गङ्गानद्याः **तीरे** अपि बहवः आश्रमाः सन्ति । **तेषु आश्रमेषु** भरद्वाजस्य आश्रमः अन्यतमः । तस्य आश्रमः **प्रयागे** वर्तते । वनगमनसमये सीतालक्ष्मणाभ्यां सह रामः तत्र **रात्रौ** विश्रामं कृतवान् । **शृङ्गवेरपुरे** अपि ऋषीणाम् आश्रमाः सन्ति । वस्तुतः **वनप्रवाससमये चतुर्दशसु वर्षेषु** श्रीरामः **बहुषु आश्रमेषु** अतिथिः अभवत् । **चित्रकूटे, पञ्चवट्याम्** अपि रामः ऋषिभिः सह कञ्चित् कालं यापितवान् ।

वैदिक-**साहित्येषु, उपनिषत्सु, पुराणेषु, काव्येषु, महाकाव्येषु, रूपकेषु** च आश्रमाणाम् उल्लेखः अस्ति । **रामायण-महाभारतयोः** अपि बहूनाम् आश्रमाणां चर्चा आयाति ।



**आश्रमेषु** मुनयः तपः आचरन्ति । अध्येतारः वेदाभ्यासं कुर्वन्ति । सर्वे **मुनिषु** श्रद्धाभावम् धारयन्ति । आश्रम-**तरुषु** पक्षिणः निवसन्ति । आश्रम-**वनेषु** जन्तवः निर्भयं विचरन्ति । आश्रमवासिनः गाः पालयन्ति । ते च **पक्षिषु, जन्तुषु, गोषु** च स्निह्यन्ति ।

**आश्रमेषु** उभयोः सन्ध्ययोः यज्ञ-हवनादिकर्माणि प्रचलन्ति । सर्वे अन्तेवासिनः अतिथयः च **यज्ञकर्मसु** भागं गृह्णन्ति । सामान्यतया गुरुपत्नी एव आश्रमव्यवस्थां पश्यति । **अध्येतृषु** गुरुपत्नीनां वात्सल्यं वर्तते । अतः अध्येतारः अपि **गुरुपत्नीषु** श्रद्धां धारयन्ति ।



आश्रमवासिनः **ग्रीष्मेषु**, **प्रावृट्सु**, **शरत्सु**, **हेमन्तेषु**, **शिशिरेषु**, **वसन्तेषु** इति **षट्सु ऋतुषु** यथाविधि यज्ञादिकार्याणि सम्पादयन्ति। तेषां **भगवति** प्रगाढा भक्तिः वर्तते। ऋषीणां **कायेषु**, **वाक्षु**, **मनःसु** भगवत्प्रीतिः विराजते। **प्राणिषु** तेषां दयाभावः भवति। सर्वे सद्गुणाः **मुनिषु** भवन्ति। '**प्राणिषु** सद्भावना स्यात्', '**राष्ट्रेषु** शान्तिः भूयात्' '**राजसु** धर्मवृद्धिः स्यात्' इति ते इच्छन्ति। वस्तुतः **आश्रमेषु प्रचलितेषु सर्वविधेषु कर्मसु** महत् जनकल्याणं निहितं भवति। न केवलम् आश्रमवासिनाम् **अध्ययने** अपितु **बोधे**, **आचरणे**, तथा **प्रचारणे** च अधोलिखितः विश्वबन्धुत्वपूर्णः विचारः प्रतिष्ठितः भवति–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥

◆◆◆

## अभ्यासः — 99

1. **अधोलिखितानां प्रश्नानाम् उत्तरं लिखत—**

[ अधोलिखित प्रश्नों का उत्तर लिखें। Answer the following questions. ]

(i) आश्रमाः कुत्र सन्ति ?

।

(ii) भरद्वाजस्य आश्रमः कुत्र वर्तते ?

।

(iii) श्रीरामः कदा कुत्र च अतिथिः अभवत् ?

।

(iv) आश्रमाणाम् उल्लेखः कुत्र कुत्र प्राप्यते ?

।

(v) मुनयः कुत्र तपः आचरन्ति ?

।

(vi) सर्वे केषु श्रद्धाभावं धारयन्ति ?

।

(vii) पक्षिणः कुत्र निवसन्तिं ?

।

(viii) आश्रमवासिनः केषु स्निह्यन्ति ?

।

(ix) अन्तेवासिनः कस्मिन् भागं गृह्णन्ति ?

।

(x) गुरुपत्नीनां वात्सल्यं केषु वर्तते ?

।

(xi) ऋषीणां भगवत्प्रीतिः कुत्र विराजते ?

।

(xii) सर्वे सद्गुणाः केषु भवन्ति ?

।

(xiii) ऋषयः केषु केषु कं गुणम् इच्छन्ति ?

।

(xiv) जनकल्याणं कुत्र निहितं भवति ?

।

(xv) आश्रमवासिनां कस्मिन् कर्मणि 'सर्वे भवन्तु सुखिनः .....' इति विश्वबन्धुत्वपूर्णः विचारः भवति ?

।

**2. कोष्ठके लिखितानां पदानां सप्तम्यन्तरूपैः रिक्तस्थानानि पूरयत–**

[ कोष्ठक में लिखित पदों के सप्तम्यन्त रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the locative forms of the words given in the bracket. ]

| | | | |
|---|---|---|---|
| (i) | गङ्गोत्री | अस्ति । | (गिरिः) |
| (ii) | सेवकस्य श्रद्धा | अस्ति । | (स्वामी) |
| (iii) | जगन्नाथमन्दिरम् | अस्ति । | (पुरी) |
| (iv) | वेङ्कटेशः | वर्तते । | (तिरुपतिः) |
| (v) | लोकसभासदस्याः | उपविशन्ति । | (संसद्) |
| (vi) | बालकस्य | व्रणः अभवत् । | (जानुनी) |
| (vii) | छात्राणां श्रद्धा | भवति । | (गुरवः) |
| (viii) | आश्रमस्थेषु | भयं न भवति । | (जन्तवः) |
| (ix) | जनानां प्रीतिः | भवति एव । | (सज्जनाः) |
| (x) | कार्यकर्तारः | प्रवृताः भवन्ति । | (कर्माणि) |

| | | | |
|---|---|---|---|
| (xi) | सर्वविधेषु | संस्कृतसम्भाषणस्य रुचिः वर्तते। | (अध्येतारः) |
| (xii) | कालिदासः | श्रेष्ठः अस्ति। | (कविः) |
| (xiii) | महाराजः | विश्वसिति। | (मन्त्रिणः) |
| (xiv) | अस्माकं | एकरूपता आवश्यकी। | (मनांसि) |
| (xv) | निर्मलं जलं | अस्ति। | (सरित्) |

**3. अधोनिर्दिष्टपदानां सप्तम्यन्तरूपाणि त्रिषु वचनेषु लिखत–**

[ अधोनिर्दिष्ट पदों के सप्तम्यन्त रूप तीनों वचनों में लिखें। Write the locative declension of the following words in all the three numbers. ]

| | पदानि | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | अद्रिः | **अद्रौ** | **अद्र्योः** | **अद्रिषु** |
| (i) | आत्मा | | | |
| (ii) | गुरुः | | | |
| (iii) | गन्ता | | | |
| (iv) | माता | | | |
| (v) | स्वसा | | | |
| (vi) | अस्थि | | | |
| (vii) | जानु | | | |
| (viii) | मनः | | | |
| (ix) | जगत् | | | |
| (x) | कृतिः | | | |
| (xi) | धेनुः | | | |
| (xii) | पक्षी | | | |
| (xiii) | नाम | | | |
| (xiv) | राजा | | | |

**4. उदाहरणानुसारं रिक्तस्थानानि पूरयत–**

[ उदाहरणानुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | |
|---|---|
| कर्मन् | कुशलः |
| जानु | वेदना |
| शिशु | प्रीतिः |
| चर्मन् | कण्डूतिः |
| पङ्क्ति | अशुद्धिः |
| प्रेयस् | प्रेम |
| पयस् | माधुर्यम् |
| संन्यासिन् | निःस्पृहता |
| दुर्वासस् | कोपः |
| सुहृद् | विश्वासः |

उदा. (i) ............ **कर्मणि** कुशलः ............ ।

(ii) ।

(iii) ।

(iv) ।

(v) ।

(vi) ।

(vii) ।

(viii) ।

(ix) ।

(x) ।

5. **यथोदाहरणं मञ्जूषायां प्रदत्तानि पदानि उचितवर्गे स्थापयत–**

[ उदाहरण के अनुसार मञ्जूषा में प्रद त्त पदों को उचित वर्ग में रखें। Place the words given in the box in appropriate category as shown in the example. ]

| | | | | |
|---|---|---|---|---|
| **सम्पद्** | शङ्खी | **तमसि** | जलमुक् | अन्नदातृ |
| सुहृत् | जगति | धनिन् | धनुष् | जन्मनि |
| **जटायुः** | कपि | आयुः | नीत्याम् | तत्त्वविद् |
| अवधौ | राशि | मन्त्रिणि | श्रीः | भ्रातरि |
| वपुः | छन्दसि | हृदि | सारथिः | सम्पातिः |
| तालु | वाच् | कर्मन् | दिशि | महान् |

| | **प्रातिपदिकम्** | **प्रथमान्तम्** | **सप्तम्यन्तम्** |
|---|---|---|---|
| उदा. | (i) सम्पद् | (i) जटायुः | (i) तमसि |
| | (ii) | (ii) | (ii) |
| | (iii) | (iii) | (iii) |
| | (iv) | (iv) | (iv) |
| | (v) | (v) | (v) |
| | (vi) | (vi) | (vi) |
| | (vii) | (vii) | (vii) |
| | (viii) | (viii) | (viii) |
| | (ix) | (ix) | (ix) |
| | (x) | (x) | (x) |

**सुभाषितेषु सप्तमीप्रयोगाः**

# सुभाषितानि

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम् ॥

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥

सम्पत्तौ च विपत्तौ च महतामेकरूपता ।
उदये सविता रक्तो रक्तश्चास्तमये तथा ॥

यथा चित्तं तथा वाणी यथा वाणी तथा क्रिया ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
सदा पुण्याऽरण्ये शिव शिव शिवेति प्रलपतः॥

सत्यं वाचि दृशि प्रसादपरता सर्वाशयाश्वासिनी
पाणौ दानविमुक्तिरात्मजननक्लेशान्तचिन्ता मतौ।
संसक्ता हृदये दयैव दयिता काये परार्थोद्यमो
यस्यैकः पुरुषः स जीवति भवे भ्राम्यन्ति जीवाः परे॥

◆◆◆

अनुवर्तते

**कथायां सप्तमीप्रयोगाः**

## मित्रसम्प्राप्तिः

...... अथ एकस्मिन् अहनि मूषक-कच्छप-वायसानां तस्यां परिषदि एकः हरिणः समागच्छत्। तस्य मुखे आर्तभावः, वाचि करुणा, चक्षुषोः भीतिः, वपुषि शैथिल्यं च तस्य विपत्तिं प्रकटयति स्म। मन्थरकः हरिणम् अपृच्छत्– "भोः ! कः भवान् ? कस्यां विपदि पतितः ? किमर्थं सदसि उपस्थितः ?" हरिणः अवदत्– "चित्राङ्गः नाम हरिणः अहम्। एकस्मात् लुब्धकात् त्रस्तः अत्र समागतवान् अस्मि" इति। मन्थरकः अवदत्– "मा बिभीहि, इदानीं त्वम् अपि अस्मासु सुहृत्सु अन्यतमः जातः। अत्र एव तिष्ठ।" चित्राङ्गः अतीव प्रसन्नः अवदत्– "भोः मित्राणि ! युष्माकम् अवश्यम् एव मयि प्रीतिः अस्ति। पूर्वम् अपरिचिताः अपि भवन्तः आपदि मयि स्नेहं दर्शयन्ति। नूनम् एव भवन्तः मम सुहृदः।" ततः अहनि गोष्ठीं कृत्वा रात्रौ स्वं स्वम् आश्रयं गच्छन्ति। मन्थरकः सरसि निमज्जति। वायसः शाखायाम् उपविशति। हिरण्यकः बिले तिष्ठति। चित्राङ्गः वृक्षाणां मध्ये स्वपिति। एवं रात्रौ विश्रम्य प्रतिदिनम् उषसि गोष्ठ्यां सर्वे समायान्ति।



अथ एकस्मिन् अहनि सदसि चित्राङ्गः उपस्थितः न अभवत्। अतः तस्य सखिषु बह्व्यः आशङ्काः जाताः। ते परस्परं वार्तालापम् अकुर्वन्– "अहो ! किमर्थं चित्राङ्गः अत्र न समायातः। कस्यां विपत्तौ पतितः ? किं कस्मिंश्चित् जाले बद्धः, उत वह्नौ प्रपतितः, कस्मिंश्चित् सरसि निमग्नः, उत विषमे गर्ते पतितः ?"

अथ मन्थरकः वायसम् अवदत्– "भोः ! लघुपतनक ! मयि च तादृशी गतिः नास्ति यादृशी गतिः त्वयि वर्तते। त्वम् एव अरण्ये तस्य अन्वेषणं कुरु। एतत् श्रुत्वा लघुपतनकः किञ्चिद् दूरे एव गत्वा अपश्यत्–एकस्य जलाशयस्य तीरे चित्राङ्गः कपटजाले निबद्धः तिष्ठति। एतद् दृष्ट्वा लघुपतनकस्य हृदि बहु दुःखम् अभवत्।

चित्राङ्गः अपि वायसम् अवलोक्य दुःखमनाः अवदत्– ''भोः ! मित्र ! अहम् इदानीं मृत्यौ एव बद्धः इति जानीहि । सुभाषितगोर्ष्ठीषु किमपि अनुचितं यदि भाषितं तत् क्षाम्यतु ।'' तत् श्रुत्वा लघुपतनकः अवदत्– ''भद्र ! अस्मासु सत्सु कथं बिभेषि । अपि च ये सत्पुरुषाः भवन्ति ते विपत्तौ अपि न व्याकुलाः भवन्ति ।'' उक्तं खलु–

सम्पदि यस्य न हर्षो विपदि विषादो रणे न भीरुत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥

एवम् उक्त्वा लघुपतनकः चित्राङ्गम् आश्वास्य हिरण्यक-मन्थरकयोः सविधे आगत्य सर्वं श्रावितवान् । अनन्तरं हिरण्यकं स्वपृष्ठे आरोप्य चित्राङ्गस्य सविधे आनयत् । हिरण्यकः तस्य पाशकर्तनम् आरब्धवान् । अत्रान्तरे मन्थरकः अपि शनैः शनैः तं प्रदेशं प्राप्नोत् । तं दृष्ट्वा ते अचिन्तयन्– ''एषः मन्थरकः कथम् अत्र समागतः । यदि लुब्धकः झटिति आगच्छति तर्हि हिरण्यकः बिलं प्रविश्य आत्मानं रक्षिष्यति । चित्राङ्गः वेगेन धावित्वा अन्यस्यां दिशि क्वचित् निलीनः भविष्यति । वायसः उड्डीय शाखायाम् उपवेक्ष्यति । जलचरः एषः मन्थरकः एतावद् दूरतरं सरः कथं गमिष्यति ।''



अत्रान्तरे लुब्धकः तत्र उपागतः । तं दृष्ट्वा मूषिकः चित्राङ्गस्य पाशं झटिति कर्तितवान् । ततः चित्राङ्गः वेगेन प्रधावितवान् । लघुपतनकः शाखायाम् उपाविशत् । हिरण्यकः समीपवर्तिनि बिले निगूढः अतिष्ठत् । अथ एषः लुब्धकः मन्थरकं मन्दं मन्दं भूमौ गच्छन्तं दृष्ट्वा अचिन्तयत्– 'यद्यपि हरिणः धावितवान् तथापि अयं कूर्मः आहारार्थं लब्धः । अस्य आमिषेण मम कुटुम्बस्य आहारनिर्वृत्तिः भविष्यति' । एवं विचिन्त्य तं दर्भैः संवेष्ट्य धनुषि समारोप्य स्कन्धे संस्थाप्य गृहं प्रति प्रस्थितवान् । हिरण्यकः लघुपतनकः चित्राङ्गः च मन्थरकस्य ग्रहणेन विषादं प्राप्तवन्तः । ते तस्य रक्षार्थम् उपायं चिन्तयितुम् आरब्धाः ।



वायसः एकम् उपायम् अवदत्– "भोः ! एषः चित्राङ्गः अनेन मार्गेण गत्वा क्षुद्रं सरः प्राप्य तस्य तीरे निश्चेतनः भूत्वा पततु । अहम् अस्य शिरसि उपविश्य चञ्चुना उल्लेखनं करिष्यामि । तेन असौ दुष्टः लुब्धकः एतं मृतं मत्वा मन्थरकं भूमौ त्यक्त्वा मृगाय परिधाविष्यति । अत्रान्तरे हिरण्यकः दर्भमयान् पाशान् खण्डयतु येन एषः मन्थरकः शीघ्रं सरसि प्रवेक्ष्यति ।" चित्राङ्गः हरिणः तथैव आचरितवान् । लुब्धकः चित्राङ्गं मृतं मत्वा तं ग्रहीतुं कच्छपं क्षितौ प्रक्षिप्य मृगम् उपागतः । तदभ्यन्तरे हिरण्यकः मन्थरकस्य दर्भवेष्टनं खण्डितवान् । मन्थरकः ततः निष्क्रम्य समीपवर्तिनि पल्वले प्रविश्य उपाविशत् । चित्राङ्गः अपि उत्थाय वायसेन सह पलायितवान् । लुब्धकः एतत्सर्वं दृष्ट्वा विषादं प्राप्य बहुविधं विलप्य स्वगृहं गतवान् । ततः सर्वे काक-कूर्म-मृग-मूषिकाः आनन्दभाजः परस्परम् आलिङ्ग्य महासुखेन सुभाषितकथागोष्ठीषु विनोदेन कालं यापयन्तः परस्परम् उपकुर्वन्तः दीर्घकालं यावत् तत्र वासं कृतवन्तः ।

**कथासारः –**

वस्तुतः सन्मित्रं सौभाग्येन एव प्राप्यते । सर्वैः निष्कपटभावेन मित्रधर्मस्य परिपालनं करणीयम् । एवं ज्ञात्वा सर्वे विवेकिनः मित्रसंग्रहं कुर्वन्तु, मित्रेण सह कपटभावेन आचरणं न कुर्वन्तु ।

कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते ॥

पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥

◆◆◆

# द्वितीयः स्तबकः

## 2.7 सप्तमः पाठः

### [ सम्बोधन-प्रथमा ]

**अजन्तशब्दानां सम्बोधनप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



हे **मुने** ! पीठे उपविशतु।



हे **मुनी** ! दक्षिणां स्वीकुरुताम्।



हे **मुनयः** ! यज्ञशालाम् अलंकुर्वन्तु।



हे **गुरो** ! अस्मान् पाठयतु।



हे **गुरू** ! अत्र आगच्छताम्।



हे **गुरवः** ! आशिषं यच्छन्तु।



हे **विक्रेतः** ! वस्त्रं दर्शय।



हे **विक्रेतारौ** ! द्रव्याणि दर्शयताम्।



हे **विक्रेतारः** ! वस्त्राणि दर्शयन्तु।

**स्त्री.**



हे **भगिनि** ! जलम् आनय ।



हे **भगिन्यौ** ! आगच्छतम् दूरदर्शनं पश्यामः ।



हे **भगिन्यः** ! अत्र उपविशत ।



हे **पुत्रि** ! पठ ।



हे **पुत्र्यौ !** आगच्छतम् ।



हे **पुत्र्यः !** पश्यत ।

## हलन्तशब्दानां सम्बोधनप्रयोगाः

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



हे **राजन्** ! सत्यं चर।



हे **राजानौ** ! विवादाय अलम्।



हे **राजानः** ! वृथा संग्रामं मा कुरुत।



हे **मन्त्रिन्** ! देशस्य का वार्ता।



हे **मन्त्रिणौ** ! विचारं कुरुतम्।



हे **मन्त्रिणः** ! आसनम् अलंकुरुत।

**अजन्त-हलन्तशब्दानां सम्बोधनप्रयोगाः**

**अधोलिखितानि वाक्यानि पठत—**
[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**

**गुरो** ! मां पाठयतु। **गुरू** ! भोजनं कुरुतम्। **गुरवः** मां पाठयत।
**हरे** ! अत्र आगच्छ। **हरी** अत्र आगच्छताम्। **हरयः** ! अत्र उपविशत।
**शिशो** ! रोदनं मा कुरु। **शिशू** ! रोदनं मा कुरुतम्। **शिशवः** ! दुग्धं पिबत।
**भ्रातः** ! एषा मम लेखनी। **भ्रातरौ** ! युवां कुत्र गच्छथः ? **भ्रातरः** ! वयं मिलित्वा गीतं गायाम।
**सुहृत्** ! मम गृहम् आगच्छतु। **सुहृदौ** ! मम गृहम् आगच्छताम्। **सुहृदः** ! सेवाकार्यं कुर्वन्तु।
**न्यायवादिन्** ! न्याययुतं वदतु। **न्यायवादिनौ** ! कलहं न कुरुताम्। **न्यायवादिनः** ! सत्यम् आश्रयन्तु।
**विद्वन्** ! भवान् कति ग्रन्थान् रचितवान् ? **विद्वांसौ** ! कुतः आगतवन्तौ ? **विद्वांसः** ! भवन्तः किम् इच्छन्ति?

**स्त्री.**

**भगिनि** ! सीवनं जानासि किम् ? **भगिन्यौ** ! वाटिकां किमर्थं गतवत्यौ ? **भगिन्यः** ! आगच्छत।
**मातः** ! अद्य पायसं पच। **मातरौ** ! अस्माभिः सह तिष्ठतम्। **मातरः** ! अस्मभ्यं भोजनं दत्त।
**स्वसः** ! मम साहाय्यं कुरु ? **स्वसारौ** ! युवां पुष्पाणि अवचिनुतम्। **स्वसारः** ! समयपालनं कुरुत।

## सम्बोधनप्रथमायाः रूपाणि

### अधोनिर्दिष्टानि रूपाणि पठत–

[ अधोलिखित रूपों को पढ़ें। Read the following declensions. ]

| **प्रथमैकवचनम्** | **सम्बो. एक.** | **सम्बो. द्वि.** | **सम्बो. बहु.** |
|---|---|---|---|
| कविः | हे कवे | कवी | कवयः |
| गुरुः | हे गुरो | गुरू | गुरवः |
| भानुः | हे भानो | भानू | भानवः |
| शम्भुः | हे शम्भो | शम्भू | शम्भवः |
| विष्णुः | हे विष्णो | विष्णू | विष्णवः |
| शिशुः | हे शिशो | शिशू | शिशवः |
| दाता | हे दातः | दातारौ | दातारः |
| पिता | हे पितः | पितरौ | पितरः |
| भ्राता | हे भ्रातः | भ्रातरौ | भ्रातरः |
| माता | हे मातः | मातरौ | मातरः |
| स्वसा | हे स्वसः | स्वसारौ | स्वसारः |
| सुहृत् | हे सुहृत् . | सुहृदौ | सुहृदः |
| राजा | हे राजन् | राजानौ | राजानः |
| मन्त्री | हे मन्त्रिन् | मन्त्रिणौ | मन्त्रिणः |
| श्रीमान् | हे श्रीमन् | श्रीमन्तौ | श्रीमन्तः |
| न्यायवादी | हे न्यायवादिन् | न्यायवादिनौ | न्यायवादिनः |
| विज्ञानी | हे विज्ञानिन् | विज्ञानिनौ | विज्ञानिनः |
| विद्वान् | हे विद्वन् | विद्वांसौ | विद्वांसः |

☞ एतानि सम्बोधनरूपाणि। सम्बोधने द्विवचन-बहुवचनयोः रूपाणि प्रथमावत् भवन्ति। एकवचनस्य रूपं तु प्रायः भिन्नं भवति।

## अभ्यासः — 100

✍ **उदाहरणानुसारं सम्बोधने रूपाणि लिखत—**

[ उदाहरण के अनुसार सम्बोधनरूप लिखें। Write the declension in '*sambodhana*' as shown in the example. ]

| | | प्रथमैकवचनम् | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| इकारान्तः | 1. | कविः | कवे | कवी | कवयः |
| | 2. | कपिः | | | |
| | 3. | हरिः | | | |
| | 4. | श्रीनिधिः | | | |
| | 5. | ऋषिः | | | |
| | 6. | रविः | | | |
| | 7. | मतिः | | | |
| उकारान्तः | 8. | भानुः | भानो | भानू | भानवः |
| | 9. | विष्णुः | | | |
| | 10. | गुरुः | | | |
| | 11. | शम्भुः | | | |
| | 12. | धेनुः | | | |
| | 13. | बन्धुः | | | |
| | 14. | शिशुः | | | |
| ऋकारान्तः | 15. | दाता | दातः | दातारौ | दातारः |
| | 16. | भ्राता | | | |
| | 17. | नेता | | | |
| | 18. | पिता | पितः | पितरौ | पितरः |
| | 19. | माता | | | |
| नकारान्तः | 20. | राजा | राजन् | राजानौ | राजानः |
| | 21. | आत्मा | | | |
| | 22. | गुणी | | | |
| | 23. | मन्त्री | | | |
| | 24. | विज्ञानी | | | |
| | 25. | न्यायवादी | | | |
| | 26. | अधिकारी | | | |

## अभ्यासः – 101

✍ **अधोनिर्दिष्टानां शब्दानां वचनानुसारं सम्बोधनरूपाणि लिखत–**

[ अधोनिर्दिष्ट शब्दों के वचनानुसार सम्बोधनरूप लिखें। Write the '*sambodhana*' form of the following words in the same number. ]

उदा. गिरिः ...... **गिरे**......

1. मूर्तिः
2. चित्रभानुः
3. छात्राः
4. मातरः
5. भ्रातरौ
6. राजा
7. सुभानू
8. भारतमाता
9. जगद्गुरुः
10. वैरी
11. सेनापतिः
12. शिशवः
13. मुख्यमन्त्री
14. राजानः
15. करी
16. अधिकारिणी
17. योगिनौ
18. भगवान्
19. धीमन्तः
20. शक्तिमन्तौ

## अभ्यासः – 102

✍ **कोष्ठकनिर्दिष्टशब्दानां सम्बोधनरूपाणि विलिख्य वाक्यानि पूरयत–**

[ कोष्ठकनिर्दिष्ट शब्दों के सम्बोधनरूप लिखकर वाक्यों को पूरा करें। Complete the sentences using '*sambodhana*' - forms as pointed out in the bracket. ]

1. (रविः) हे ............ किमर्थं ह्यः विद्यालयं न आगतवान् भवान् ?
2. (माता) हे ............ अद्य भोजने किं किम् अस्ति ?
3. (भ्राता) हे ............ त्वया सह अहम् आगमिष्यामि मन्दिरम्।
4. (शम्भुः) हे ............ भवान् देहलीतः कदा आगतवान्।
5. (सरस्वती) हे ............ भवती भानुवासरे मम गृहम् आगच्छतु।
6. (गुरुः) हे ............ आशिषा अस्मान् अनुगृह्णातु।
7. (ऋषिः) हे ............ कृपया एतानि फलानि स्वीकरोतु।

| | | | |
|---|---|---|---|
| 8. | (विज्ञानी) | भोः | भवतः प्रयोगशाला कुत्र अस्ति ? |
| 9. | (शिशुः) | भोः | त्वं दुग्धं पिब। |
| 10. | (मन्त्री) | भोः | भवतः भाषणं प्रभावि आसीत्। |
| 11. | (वैरी) | भोः | पश्यतु, जयः तु अस्माकम् एव। |
| 12. | (सुहृत्) | भोः | श्वः अवश्यं मम गृहम् आगच्छतु। |
| 13. | (माता) | भोः | पाकः सिद्धः किम् ? |
| 14. | (भगवान्) | भोः | मयि कृपां करोतु। |
| 15. | (मनुः) | भोः | भवान् किम् अद्य विद्यालयं न गमिष्यति ? |
| 16. | (पिता) | भोः | अहं वैद्यकशास्त्रं पठितुम् इच्छामि। |
| 17. | (बन्धुः) | भोः | किम् एषु दिनेषु भवतः दर्शनम् एव नास्ति ? |
| 18. | (सेनापतिः) | भोः | त्वया सैन्यशक्तिः वर्धनीया। |
| 19. | (साधुः) | भोः | अहं भवतः सङ्गम् इच्छामि। |
| 20. | (राजा) | भोः | धनदानेन माम् उपकरोतु। |

## अभ्यासः – 103

✍ **मञ्जूषातः सम्बोधनैकवचनरूपाणि पृथक् कुरुत–**

[सम्बोधन एकवचन रूपों को अलग करें। Separate the singular forms of '*Sambodhan*'.]

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 1. | **गिरे** | 2. | मूर्ते | 3. | चित्रभानो | 4. | छात्राः | 5. | मातरः |
| 6. | भ्रातरौ | 7. | राजन् | 8. | सुभानू | 9. | भारतमातः | 10. | जद्गुरो |
| 11. | वैरिन् | 12. | सेनापते | 13. | शिशवः | 14. | मुख्यमन्त्रिन् | 15. | राजानः |
| 16. | करिन् | 17. | अधिकारिणः | 18. | भगवन् | 19. | धीमन्तः | 20. | विद्वन् |

| | | |
|---|---|---|
| 1. ........**गिरे**........ | 5. | 9. |
| 2. | 6. | 10. |
| 3. | 7. | 11. |
| 4. | 8. | 12. |

## सम्बोधनरूपाणि

### सम्बोधनरूपाणि स्मरत—

[ सम्बोधन रूपों का स्मरण करें। Remember the '*sambodhana*' declensions. ]

| | प्रथमैकवचनम् | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| **इकारान्ताः** | कविः | कवे | कवी | कवयः |
| | कपिः | कपे | कपी | कपयः |
| | हरिः | हरे | हरी | हरयः |
| | श्रीनिधिः | श्रीनिधे | श्रीनिधी | श्रीनिधयः |
| | ऋषिः | ऋषे | ऋषी | ऋषयः |
| | रविः | रवे | रवी | रवयः |
| | मतिः | मते | मती | मतयः |
| **उकारान्ताः** | भानुः | भानो | भानू | भानवः |
| | विष्णुः | विष्णो | विष्णू | विष्णवः |
| | गुरुः | गुरो | गुरू | गुरवः |
| | शम्भुः | शम्भो | शम्भू | शम्भवः |
| | धेनुः | धेनो | धेनू | धेनवः |
| | बन्धुः | बन्धो | बन्धू | बन्धवः |
| | शिशुः | शिशो | शिशू | शिशवः |
| | शत्रुः | शत्रो | शत्रू | शत्रवः |
| | साधुः | साधो | साधू | साधवः |
| **ऋकारान्ताः** | पिता | पितः | पितरौ | पितरः |
| | भ्राता | भ्रातः | भ्रातरौ | भ्रातरः |
| | दाता | दातः | दातारौ | दातारः |
| | माता | मातः | मातरौ | मातरः |
| | नेता | नेतः | नेतारौ | नेतारः |
| **नकारान्ताः** | राजा | राजन् | राजानौ | राजानः |
| | आत्मा | आत्मन् | आत्मानौ | आत्मानः |
| | गुणी | गुणिन् | गुणिनौ | गुणिनः |
| | मन्त्री | मन्त्रिन् | मन्त्रिणौ | मन्त्रिणः |
| | विज्ञानी | विज्ञानिन् | विज्ञानिनौ | विज्ञानिनः |
| | न्यायवादी | न्यायवादिन् | न्यायवादिनौ | न्यायवादिनः |
| | अधिकारी | अधिकारिन् | अधिकारिणौ | अधिकारिणः |

## अभ्यासः — 104

✍ **प्रदत्तानां सम्बोधन-रूपाणां प्रातिपदिकं लिखत—**

[ प्रदत्त सम्बोधन रूपों के प्रातिपदिक लिखें। Write the bases of the '*sambodhana*'-forms given. ]

| सम्बोधनरूपम् | प्रातिपदिकम् |
|---|---|
| 1. रवे | |
| 2. मातः | |
| 3. भ्रातः | |
| 4. शम्भो | |
| 5. सरस्वति | |
| 6. गुरो | |
| 7. ऋषे | |
| 8. विज्ञानिन् | |
| 9. शिशो | |
| 10. मन्त्रिन् | |
| 11. वैरिन् | |
| 12. सुहृत् | |
| 13. हरे | |
| 14. भगवन् | |
| 15. मनो | |
| 16. पितः | |
| 17. बन्धो | |
| 18. सेनापते | |
| 19. साधो | |
| 20. राजन् | |

## सम्बोधन-प्रथमा

### प्रश्नमञ्चः



**गुरुः** भोः **छात्राः** ! आगच्छत, अद्य प्रश्नमञ्चकार्यक्रमम् आयोजयामः ।

**छात्राः** एवम् अस्तु **गुरो** ! उत्तमः अयं प्रस्तावः । वयं सर्वे सज्जाः स्मः ।

**गुरुः** अस्तु ! तर्हि अहं यं छात्रम् उद्दिश्य प्रश्नं पृच्छामि स एव उत्तरं ददातु ।

**छात्राः** अस्तु **आचार्य** ! यथा आदिशति भवान् तथा वयम् आचरामः ।

**रविः** ( गुरुपत्नीम् अभिलक्ष्य ) **मातः** ! भवती अपि अस्माभिः सह प्रश्नमञ्च-कार्यक्रमे भागं गृह्णातु ।

**गुरुमाता** अस्तु **पुत्र** ! अहमपि पश्यामि प्रश्नमञ्च-कार्यक्रमः कीदृशः भवति इति ।

**गुरुः** **यशस्विन्** ! त्वं वद गणेशोत्सवः कदा भवति ?

**यशस्वी** **गुरुदेव** ! गणेशोत्सवः भाद्रपद-शुक्लचतुर्थ्यां भवति ।

**गुरुः** उत्तरं समीचीनम् । **गौरि** ! त्वं वद, कालिदासविरिचितस्य प्रसिद्धस्य नाटकस्य नाम किम् ?

**गौरी** **श्रीमन्** ! 'अभिज्ञानशाकुन्तलम्' ।

**गुरुः** अस्तु उत्तमम् । **श्रीपते** ! त्वं वद, वेदाः कति सन्ति ?

**श्रीपतिः** **महोदय** ! वेदाः चत्वारः सन्ति ।

**गुरुः** साधु **श्रीपते** ! साधु ! सत्यम् उत्तरितम् । **शम्भो** ! त्वं वद, 'श्रुतिः' इति शब्दस्य कः अर्थः ?

**शम्भुः** (किञ्चिद् विचिन्त्य स्वगतम्) **हे भगवन्** ! कठिनः प्रश्नः एषः ! **आचार्य** ! अहं न जानामि।

**गुरुः** **तेजस्विन्** ! त्वं जानासि किम् ?

**तेजस्वी** नहि **गुरो** ! अहमपि न जानामि।

**गुरुः** **कावेरि** ! किं त्वम् उत्तरं वदसि ?

**कावेरी** **आचार्य** ! अहमपि न जानामि। (गुरुमातरम् उद्दिश्य) **मातः** ! भवती एव अस्माकं साहाय्यम् करोतु ?

**गुरुमाता** अस्तु, तर्हि अहमेव वदामि। 'श्रुतिः' इति शब्दस्य अर्थः 'वेदः' इति भवति।

**गुरुः** **सुहृत्** ! त्वं वद। वेदेषु कः वेदः 'लोकवेद' इति नाम्ना प्रसिद्धः अस्ति।

**सुहृद्** न जानामि आचार्य !

**गुरुः** **साधो** ! तर्हि त्वं वद।

**साधुः** अथर्ववेदस्य 'लोकवेद' इति नाम प्रसिद्धम्।

**गुरुः** उत्तरं समीचीनम् अस्ति। (सर्वान् अभिलक्ष्य) साधु **विद्यार्थिनः** ! **साधु** ! परम् इदानीं सायङ्कालः सञ्जातः अस्ति। अतः प्रश्नमञ्च-कार्यक्रमम् अत्रैव समापयामः। सन्ध्यावन्दनादि-कर्मसु च व्यापृताः भवेम। भारतीय-परम्परायाः रक्षणम् अस्माकं परमं कर्तव्यं खलु !

**छात्राः** यथा आदिशति गुरुः।

◆◆◆

## अभ्यासः — 105

1. **अधोनिर्दिष्टानां पदानां त्रिषु वचनेषु सम्बोधनरूपाणि लिखत—**

[ अधोनिर्दिष्ट पदों का तीनों वचनों में सम्बोधन रूप लिखें। Write the vocative forms of the following words in all the three numbers. ]

| | पदानि | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | विद्यार्थी | विद्यार्थिन् | विद्यार्थिनौ | विद्यार्थिनः |
| (i) | गुरुः | | | |
| (ii) | माता | | | |
| (iii) | पिता | | | |
| (iv) | यशस्वी | | | |
| (v) | गौरी | | | |
| (vi) | श्रीपतिः | | | |
| (vii) | शम्भुः | | | |
| (viii) | भगवान् | | | |
| (ix) | तेजस्वी | | | |
| (x) | कावेरी | | | |
| (xi) | सुहृत् | | | |
| (xii) | अम्बा | | | |
| (xiii) | दाता | | | |
| (xiv) | शास्त्री | | | |

2. **अधोनिर्दिष्टानां सम्बोधनरूपाणां प्रातिपदिकं निर्दिशत–**

[ अधोनिर्दिष्ट सम्बोधन रूपों के प्रातिपदिक बताएं। Write the bases of the following vocative forms. ]

| | | प्रातिपदिकम् |
|---|---|---|
| (i) | हे विजयिनः ! | विजयिन् |
| (ii) | हरे ! | |
| (iii) | स्वामिन् ! | |
| (iv) | भगवन् ! | |
| (v) | राधे ! | |
| (vi) | भगिनि! | |
| (vii) | भ्रातः | |
| (viii) | पितः | |
| (ix) | अन्नदातः | |
| (x) | महर्षे | |
| (xi) | मित्र ! | |
| (xii) | हे सखि ! | |
| (xiii) | हे शिशो ! | |
| (xiv) | मान्ये | |
| (xv) | श्रीमन् | |

**सुभाषितेषु सम्बोधनप्रयोगाः**

# सुभाषितानि

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ।
भो भुवनेश्वरि पुण्ये धन्ये देवि देवमयि मुनिवरवन्द्ये
गङ्गास्तवमिमममलं नित्यं पठति नरो यः स जयति सत्यम् ॥

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जलम्
भ्रातर्व्योम निबद्ध एष भवतामग्रे प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥

◆◆◆

**कथायां सम्बोधन-प्रयोगाः**

## प्रभुभक्तः गर्दभः

वाराणस्यां कूर्परपटकः नाम रजकः निवसति स्म । सः यदा नवपरिणीतया स्वपत्न्या सह सुखं स्वपिति स्म तदा विवाहसमये पत्न्या आनीतानि उपायनद्रव्याणि अपहर्तुं केचन चोराः तस्य गृहे प्रविष्टवन्तः । तस्य रजकस्य गृहे द्वे पालितपशू आस्ताम् । गर्दभः प्राङ्गणे रज्ज्वा बद्धः आसीत् । किन्तु कुक्कुरः उन्मुक्तः गृहपरिसरे भ्रमन् आसीत् । गृहे प्रविशतः चोरान् दृष्ट्वा गर्दभः कुक्कुरम् अवदत्– ''सखे ! उच्चैः शब्दं कुरु । भवान् स्वामिनं सूचयतु यत् चोराः प्रविशन्तः सन्ति इति । वस्तुतः एतत् कार्यं भवतः वर्तते'' ।



तत् श्रुत्वा किञ्चिद् विहस्य कुक्कुरः अवदत्– ''भ्रातः ! मम नियोगस्य चर्चा भवता न करणीया । बन्धो ! किं त्वं न जानासि यत् इदानीं स्वामी मयि पूर्ववत् न स्निह्यति । मह्यं सम्यक् आहारम् अपि न ददाति । अहम् अहर्निशं तस्य गृहस्य सुरक्षां विदधामि । किन्तु सः मूढमतिः मया सह निर्दयम् आचरति । अतः हे मित्र ! अहं स्वकर्तव्यं जानामि । भवतः उपदेशस्य आवश्यकता नास्ति ।''

कुक्कुरस्य एतादृशम् आक्षेपं श्रुत्वा स्वामिभक्तः गर्दभः अवदत्– ''अरे मूढमते ! शृणु । यः कार्यकाले याचते सः कुत्सितः भृत्यः निन्दितं मित्रं च भवति । अतः अरे स्वार्थिन् ! इदानीं स्वकर्तव्यं समाचर । अनन्तरं स्वामिनं तस्य कर्तव्यविषये सचेतनं करिष्यावः'' इति ।

एतेन कुक्कुरः अपि रुष्टः अभवत् । सः अपि गर्दभम् आक्षिपन् अवदत्– "अरे मूढपशो ! त्वं किं माम् एवम् उपदिशसि, स्व-स्वामिनं किमर्थं न बोधयसि ? यः स्वामी कार्यकाले एव भृत्यान् सम्भावयेत् सः किंप्रभुः इति ख्यातः भवति ? उक्तं खलु केनचित् कविना–

आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ इति

शुनः एतादृशीं युक्तिं श्रुत्वा गर्दभः पुनः अवदत्– "अरे दुराचारिन् ! किं व्यर्थं जल्पसि । वस्तुतः विपत्तौ यः स्वामिनः उपेक्षां करोति सः पापीयान् भवति । अरे पापात्मन् ! त्वं यदि स्वकर्तव्यस्य उपेक्षां करोषि तर्हि अहमेव तथा किञ्चिद् आचरिष्यामि येन स्वामी निद्रायाः जागरिष्यति ।" एतद् उक्त्वा सः गर्दभः उच्चैः चीत्कारशब्दम् अकरोत् । तेन चीत्कारशब्देन रजकस्य निद्रा भग्ना । शब्दं श्रुत्वा चोराः अपि पलायिताः । परन्तु निद्राभङ्गकोपात् 'गर्दभोऽयं व्यर्थं चीत्करोति' इति विचिन्त्य सः रजकः तं गर्दभं लगुडेन ताडयामास । गृहस्वामिनः प्रहारेण प्रभुभक्तः गर्दभः तत्रैव प्राणान् त्यक्तवान् ।



◆◆◆

# तृतीयः स्तबकः

## 3.1 प्रथमः पाठः

## [ सर्वनामशब्दाः ]

**'एतद्'-शब्दस्य पुंलिङ्गप्रयोगाः**

**अधोनिर्दिष्टानि वाक्यानि पठत–**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | **एषः** बालकः अस्ति। | **एतौ** बालकौ स्तः। | **एते** छात्राः सन्ति। |
| 2. | **एतं** बालकं पाठय। | **एतौ** सम्यक् पालय। | **एतान्** शिशून् पोषय। |
| 3. | **एतेन** सह क्रीड। | **एताभ्यां** सह वार्तां कुरु। | **एतैः** सह विहर। |
| 4. | **एतस्मै** पुस्तकं देहि। | **एताभ्यां** मिष्टं देहि। | **एतेभ्यः** धनं देहि। |
| 5. | **एतस्मात्** लेखनीं स्वीकुरु। | **एताभ्यां** पुस्तकं स्वीकुरु। | **एतेभ्यः** विद्यां स्वीकुरु। |
| 6. | **एतस्य** गृहं तत्र अस्ति ? | **एतयोः** व्यवहारः उत्तमः। | **एतेषां** दिनचर्या समीचीना। |
| 7. | **एतस्मिन्** बहुगुणाः सन्ति। | **एतयोः** समानाः गुणाः सन्ति। | **एतेषु** विनयः अस्ति। |

**'एतद्'-शब्दस्य पुंलिङ्गरूपाणि**

**एतानि रूपाणि स्मरत–**

[ इन रूपों का स्मरण करें। Remember these declension. ]

**एतद् (पुं.)**

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | एषः | एतौ | एते |
| **द्विती.** | एतम् | एतौ | एतान् |
| **तृ.** | एतेन | एताभ्याम् | एतैः |
| **च.** | एतस्मै | एताभ्याम् | एतेभ्यः |
| **प.** | एतस्मात् | एताभ्याम् | एतेभ्यः |
| **ष.** | एतस्य | एतयोः | एतेषाम् |
| **स.** | एतस्मिन् | एतयोः | एतेषु |

**तद्-इदम्-किम्-सर्व-अन्य-सर्वनामशब्दानां पुंलिङ्गरूपाणि**

**अन्येषां केषाञ्चन सर्वनामशब्दानां रूपाणि पठत—**

[ अन्य कुछ सर्वनामशब्दों के रूपों को पढ़ें। Read the declension of some other pronouns.]

**तद् (पुं.)**

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | सः | तौ | ते |
| **द्विती.** | तम् | तौ | तान् |
| **तृ.** | तेन | ताभ्याम् | तैः |
| **च.** | तस्मै | ताभ्याम् | तेभ्यः |
| **प.** | तस्मात् | ताभ्याम् | तेभ्यः |
| **ष.** | तस्य | तयोः | तेषाम् |
| **स.** | तस्मिन् | तयोः | तेषु |

**इदम् (पुं.)**

| | | | |
|---|---|---|---|
| **प्र.** | अयम् | इमौ | इमे |
| **द्विती.** | इमम् / एनम् | इमौ / एनौ | इमान् / एनान् |
| **तृ.** | अनेन / एनेन | आभ्याम् | एभिः |
| **च.** | अस्मै | आभ्याम् | एभ्यः |
| **प.** | अस्मात् | आभ्याम् | एभ्यः |
| **ष.** | अस्य | अनयोः / एनयोः | एषाम् |
| **स.** | अस्मिन् | अनयोः / एनयोः | एषु |

**किम् (पुं.)**

| | | | |
|---|---|---|---|
| **प्र.** | कः | कौ | के |
| **द्विती.** | कम् | कौ | कान् |
| **तृ.** | केन | काभ्याम् | कैः |
| **च.** | कस्मै | काभ्याम् | केभ्यः |
| **प.** | कस्मात् | काभ्याम् | केभ्यः |
| **ष.** | कस्य | कयोः | केषाम् |
| **स.** | कस्मिन् | कयोः | केषु |

**सर्व (पुं.)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | सर्वः | सर्वौ | सर्वे |
| द्विती. | सर्वम् | सर्वौ | सर्वान् |
| तृ. | सर्वेण | सर्वाभ्याम् | सर्वैः |
| च. | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| प. | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| ष. | सर्वस्य | सर्वयोः | सर्वेषाम् |
| स. | सर्वस्मिन् | सर्वयोः | सर्वेषु |

**अन्य (पुं.)**

| | | | |
|---|---|---|---|
| प्र. | अन्यः | अन्यौ | अन्ये |
| द्विती. | अन्यम् | अन्यौ | अन्यान् |
| तृ. | अन्येन | अन्याभ्याम् | अन्यैः |
| च. | अन्यस्मै | अन्याभ्याम् | अन्येभ्यः |
| प. | अन्यस्मात् | अन्याभ्याम् | अन्येभ्यः |
| ष. | अन्यस्य | अन्ययोः | अन्येषाम् |
| स. | अन्यस्मिन् | अन्ययोः | अन्येषु |

**अवधेयम्**

⇨ 'एतद्'-शब्दस्य प्रथमायाः एकवचने 'एषः' इति, 'तद्'-शब्दस्य प्रथमायाः एकवचने 'सः' इति ।

⇨ द्वितीयातः सप्तमीं यावत् 'एतद्'-शब्दे 'तद्' शब्दात् आदौ एकारः एव अधिकः ।

## अभ्यासः — 106

**'तद्'-शब्दस्य पुंलिङ्ग-रूपसाहाय्येन वाक्यानि पूरयत—**

[ तद् शब्द के पुंलिङ्ग रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the masculine forms of the word '*tad*'. ]

**एकवचने**

1. ........ बालकः अस्ति।
2. ........ त्वं पाठय।
3. ........ अहं प्रसन्नः अस्मि।
4. ........ अहं पुस्तकं ददामि।
5. ........ लघुः कोऽपि नास्ति।
6. ........ कः दोषः ?
7. ........ बहवः गुणाः सन्ति।

**द्विवचने**

8. ........ प्रियौ बालकौ स्तः।
9. ........ कुशलं कथय।
10. ........ अहम् उपकृतः अस्मि।
11. ........ सौविध्यं यच्छ।
12. ........ अतिरिक्तं किमपि मम प्रियं नास्ति।
13. ........ व्यवहारः मां वश्यं करोति।
14. ........ सर्वे एव गुणाः सन्ति।

**बहुवचने**

15. ........ छात्राः सन्ति।
16. ........ मनोयोगेन पाठय।
17. ........ एव राष्ट्रं रक्षितं भवेत्।
18. ........ इदानीं सुखं यच्छ।
19. ........ वरं किमपि नास्ति।
20. ........ दिनचर्या भिन्ना एव अस्ति।
21. ........ विनयः अस्ति।

## अभ्यासः — 107

✍ **(क) 'एतद्'-शब्दस्य पुंलिङ्गे रूपाणि पूरयत–**

[ एतद् शब्द का पुंलिङ्ग रूप पूरा करें। Complete the masculine forms of the word '*etad*'. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | एषः | | |
| **द्विती.** | एतम् | | |
| **तृ.** | एतेन | | |
| **च.** | एतस्मै | | |
| **प.** | एतस्मात् | | |
| **ष.** | एतस्य | | |
| **स.** | एतस्मिन् | | |

✍ **(ख) 'तद्'-शब्दस्य पुंलिङ्गे रूपाणि पूरयत–**

[ तद् शब्द के पुंलिङ्ग रूप पूरा करें। Complete the masculine forms of the word '*tad*'. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | | | ते |
| **द्विती.** | | | तान् |
| **तृ.** | | | तैः |
| **च.** | | | तेभ्यः |
| **प.** | | | तेभ्यः |
| **ष.** | | | तेषाम् |
| **स.** | | | तेषु |

## अभ्यासः – 108

✍ **'किम्'(पुं.)-शब्दस्य साहाय्येन कोष्ठके निर्दिष्टं वचनम् अनुसृत्य प्रश्नवाक्यं पूरयत–**
[ कोष्ठक में निर्दिष्ट वचन के अनुसार 'किम्'(पुं) शब्द की सहायता से रिक्तस्थान भरें। Fill in the blanks with the help of the word '*kim*' (masculine) as per the number given in the bracket. ]

1. ______ रामायणं लिखितवान् ? ( एक० )
2. लवकुशौ ______ आस्ताम् ? ( द्वि० )
3. ______ पत्नी सीता आसीत् ? ( एक० )
4. राजा जनकः ______ आहूतवान् ? ( बहु० )
5. ______ बिभेषि ? ( एक० )
6. ______ विद्यालये त्वं पठसि ? ( एक० )
7. ______ मार्गेषु भयम् अस्ति ? ( बहु० )
8. ______ साकं कः गच्छति ? ( बहु० )
9. ______ पुस्तकानि यच्छसि ? ( बहु० )
10. ______ मध्ये तव स्थानम् ? ( द्वि० )

## अभ्यासः – 109

✍ **'किम्'-शब्दस्य पुंलिङ्गे रूपाणि पूरयत–**
[ 'किम्' शब्द के पुंलिङ्ग रूप पूरा करें। Complete the declension of the word '*kim*' in masculine. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | | कौ | |
| **द्विती.** | | कौ | |
| **तृ.** | | काभ्याम् | |
| **च.** | | काभ्याम् | |
| **प.** | | काभ्याम् | |
| **ष.** | | कयोः | |
| **स.** | | कयोः | |

## अभ्यासः — 110

✍ **'इदम्'-शब्दस्य पुंलिङ्ग-रूप-साहाय्येन वाक्यं पूरयत—**

['इदम्' शब्द के पुंलिङ्ग रूप से वाक्य पूरा करें। Complete the sentence with the masculine forms of the word '*idam*'.]

1. मम पुत्रः अस्ति।
2. संस्कृतं पाठयामि।
3. बालकैः सह त्वं क्रीड।
4. बालकाय पुस्तकं ददामि।
5. वृक्षात् पुष्पं गृह्णामि।
6. पिता वैद्यः अस्ति।
7. गृहे आनन्दम् अनुभवामि।
8. मठयोः अयम् अधिष्ठाता अस्ति।
9. कर्मकराणां समूहः अस्ति।
10. अश्वेषु श्वेतः अग्रे धावति।

## अभ्यासः — 111

✍ **'इदम्'-शब्दस्य पुंलिङ्ग-रूपाणि पूरयत—**

['इदम्' शब्द के पुंलिङ्ग रूप पूरा करें। Complete the masculine declension of the word '*idam*'.]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | अयम् | | |
| **द्विती.** | इमम् | | |
| **तृ.** | अनेन | | |
| **च.** | अस्मै | | |
| **प.** | अस्मात् | | |
| **ष.** | अस्य | | |
| **स.** | अस्मिन् | | |

## अभ्यासः — 112

✍ **'अन्य'-शब्दस्य पुंलिङ्गरूपेण वाक्यं पूरयत–**

[ 'अन्य' शब्द के पुंलिङ्ग रूप से वाक्य पूरा करें। Complete the sentence with the masculine form of the word '*anya*'. ]

1. कः ब्रवीति ?
2. कान् छात्रान् आह्वयसि ?
3. केन सह गच्छामि ?
4. काभ्यां ददामि ?
5. केभ्यः गृह्णासि ?
6. कस्य एतत् पुस्तकम् ?
7. केषाम् अत्र साहाय्यम् अस्ति ?
8. कस्मिन् ग्रन्थे अस्य उल्लेखः अस्ति ?
9. कयोः एतत् कार्यम् ?
10. केषु विद्वत्ता विद्यते ?

## अभ्यासः — 113

✍ **'अन्य'-शब्दस्य पुंलिङ्ग-रूपाणि पूरयत–**

[ 'अन्य' शब्द के पुंलिङ्ग रूप पूरा करें। Complete the masculine declension of the word '*anya*'. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | अन्यः | | अन्ये |
| **द्विती.** | | अन्यौ | |
| **तृ.** | अन्येन | | अन्यैः |
| **च.** | | अन्याभ्याम् | |
| **प.** | अन्यस्माद् | | अन्येभ्यः |
| **ष.** | | अन्ययोः | |
| **स.** | अन्यस्मिन् | | अन्येषु |

## 'एतद्'-शब्दस्य स्त्रीलिङ्गप्रयोगाः

**अधोनिर्दिष्टानि वाक्यानि पठत—**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | **एषा** मम भगिनी। | **एते** संस्कृतस्य छात्रे स्तः | **एताः** गुरुकुलस्य कन्याः |
| 2. | **एतां** संस्कृतं पाठयामि। | **एते** अहं जानामि। | **एताः** अत्र उपवेशय। |
| 3. | **एतया** सह अन्या भगिनी पठति। | **एताभ्यां** सह मम पुत्री विद्यालयं गच्छति। | **एताभिः** सह अध्यापिका अपि अस्ति। |
| 4. | **एतस्यै** पुस्तकं ददामि। | **एताभ्यां** किमपि ददातु। | **एताभ्यः** व्यवस्थां कल्पयतु। |
| 5. | **एतस्याः** अनुजा संस्कृतं पठति। | **एताभ्यां** पृथक् तृतीया तिष्ठति। | **एताभ्यः** शुल्कं न गृह्णातु। |
| 6. | **एतस्याः** स्वभावः मृदुः अस्ति | **एतयोः** प्रीतिं दृष्ट्वा सर्वे मोदन्ते। | **एतासां** विचारः उत्तमः |
| 7. | **एतस्यां** के न स्निह्यन्ति? | **एतयोः** प्रीतिः सर्वदा तिष्ठतु। | **एतासु** अनेके गुणाः सन्ति। |

## 'एतद्'-शब्दस्य स्त्रीलिङ्गरूपाणि

**एतानि रूपाणि स्मरत—**

[ इन रूपों का स्मरण करें। Remember these declensions. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | एषा | एते | एताः |
| **द्विती.** | एताम्/एनाम् | एते/एने | एताः/एनाः |
| **तृ.** | एतया/एनया | एताभ्याम् | एताभिः |
| **च.** | एतस्यै | एताभ्याम् | एताभ्यः |
| **प.** | एतस्याः | एताभ्याम् | एताभ्यः |
| **ष.** | एतस्याः | एतयोः/एनयोः | एतासाम् |
| **स.** | एतस्याम् | एतयोः/एनयोः | एतासु |

**तद्-इदम्-किम्-सर्व-अन्य-सर्वनामशब्दानां स्त्रीलिङ्गरूपाणि**

## अन्येषां केषाञ्चन सर्वनामशब्दानां रूपाणि—

[ अन्य कुछ सर्वनामशब्दों के रूप। Declension of some other pronouns. ]

**तद् (स्त्री.)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | सा | ते | ताः |
| **द्विती.** | ताम् | ते | ताः |
| **तृ.** | तया | ताभ्याम् | ताभिः |
| **च.** | तस्यै | ताभ्याम् | ताभ्यः |
| **प.** | तस्याः | ताभ्याम् | ताभ्यः |
| **ष.** | तस्याः | तयोः | तासाम् |
| **स.** | तस्याम् | तयोः | तासु |

**इदम् (स्त्री.)**

| | | | |
|---|---|---|---|
| **प्र.** | इयम् | इमे | इमाः |
| **द्विती.** | इमाम्/एनाम् | इमे/एने | इमाः/एनाः |
| **तृ.** | अनया/एनया | आभ्याम् | आभिः |
| **च.** | अस्यै | आभ्याम् | आभ्यः |
| **प.** | अस्याः | आभ्याम् | आभ्यः |
| **ष.** | अस्याः | अनयोः/एनयोः | आसाम् |
| **स.** | अस्याम् | अनयोः/एनयोः | आसु |

**किम् (स्त्री.)**

| | | | |
|---|---|---|---|
| **प्र.** | का | के | काः |
| **द्विती.** | काम् | के | काः |
| **तृ.** | कया | काभ्याम् | काभिः |
| **च.** | कस्यै | काभ्याम् | काभ्यः |
| **प.** | कस्याः | काभ्याम् | काभ्यः |
| **ष.** | कस्याः | कयोः | कासाम् |
| **स.** | कस्याम् | कयोः | कासु |

**सर्व (स्त्री.)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | सर्वा | सर्वे | सर्वाः |
| द्विती. | सर्वाम् | सर्वे | सर्वाः |
| तृ. | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| च. | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| प. | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| ष. | सर्वस्याः | सर्वयोः | सर्वासाम् |
| स. | सर्वस्याम् | सर्वयोः | सर्वासु |

**अन्या (स्त्री.)**

| | | | |
|---|---|---|---|
| प्र. | अन्या | अन्ये | अन्याः |
| द्विती. | अन्याम् | अन्ये | अन्याः |
| तृ. | अन्यया | अन्याभ्याम् | अन्याभिः |
| च. | अन्यस्यै | अन्याभ्याम् | अन्याभ्यः |
| प. | अन्यस्याः | अन्याभ्याम् | अन्याभ्यः |
| ष. | अन्यस्याः | अन्ययोः | अन्यासाम् |
| स. | अन्यस्याम् | अन्ययोः | अन्यासु |

**अवधेयम्**

- ⇨ 'एतद्'-शब्दस्य स्त्रीलिङ्ग-रूपेषु सर्वत्र 'तद्'-शब्दस्य रूपात् 'एकारः' अधिकः। यथा– एताम्, ताम्।
- ⇨ प्रथमायाः एकवचने 'एतद्'-शब्दस्य 'एषा' इति 'तद्'-शब्दस्य 'सा' इति रूपं भवति।
- ⇨ एकारस्य पूर्वसान्निध्यात् सकारस्य षकारः भवति।

## अभ्यासः — 114

✍ **'तद्'-शब्दस्य स्त्रीलिङ्गरूप-साहाय्येन वाक्यानि पूरयत—**

[ 'तद्' शब्द के स्त्रीलिङ्ग रूप से वाक्य पूरा करें। Complete the sentences with the feminine forms of the word '*tad*'. ]

**एकवचने**

| | | |
|---|---|---|
| उदा. 1. | ..........**सा**.......... | मम भगिनी अस्ति। |
| 2. | | अहं संस्कृतं पाठयामि। |
| 3. | | सह अन्या अपि भगिनी पठति। |
| 4. | | पाठसामग्री उपकल्पिता अस्ति। |
| 5. | | कनिष्ठा अपि संस्कृतं पठति। |
| 6. | | स्वभावः मृदुः अस्ति। |
| 7. | | सर्वेषां स्नेहः अस्ति। |

**द्विवचने**

| | | |
|---|---|---|
| 8. | | संस्कृतस्य छात्रे स्तः। |
| 9. | | अहं पाठयामि। |
| 10. | | सह मम पुत्री विद्यालयं गच्छति। |
| 11. | | बालिकाभ्यां कलहः न रोचते। |
| 12. | | पृथक् तयोः सखी न खेलति। |
| 13. | | प्रीतिं दृष्ट्वा सर्वे मोदन्ते। |
| 14. | | एवं प्रीतिः सर्वदा तिष्ठेत्। |

**बहुवचने**

| | | |
|---|---|---|
| 15. | | गुरुकुलस्य कन्याः। |
| 16. | | पृथक् एव उपवेशय। |
| 17. | | सह काचन अध्यापिका गच्छेत्। |
| 18. | | पृथक् यानं कल्पनीयम्। |
| 19. | | पृथक् अन्याः अपि छात्राः सन्ति। |
| 20. | | भाषा संस्कृतम् अस्ति। |
| 21. | | आत्मविश्वासः अस्ति। |

## अभ्यासः — 115

✍ **(क) 'एतद्'-शब्दस्य स्त्रीलिङ्ग-रूपाणि पूरयत–**

['एतद्' शब्द के स्त्रीलिङ्ग रूप पूरा करें। Complete the feminine declension of the word '*tad*'. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | | एते | |
| द्विती. | | एते | |
| तृ. | | एताभ्याम् | |
| च. | | एताभ्याम् | |
| प. | | एताभ्याम् | |
| ष. | | एतयोः | |
| स. | | एतयोः | |

✍ **(ख) 'तद्'-शब्दस्य स्त्रीलिङ्ग-रूपाणि पूरयत–**

['तद्' शब्द के स्त्रीलिङ्ग रूप पूरा करें। Complete the feminine declension of the word '*tad*'. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | | | ताः |
| द्विती. | | | ताः |
| तृ. | | | ताभिः |
| च. | | | ताभ्यः |
| प. | | | ताभ्यः |
| ष. | | | तासाम् |
| स. | | | तासु |

## अभ्यासः — 116

✍ **'किम्'-शब्दस्य स्त्रीलिङ्ग-रूपेण प्रश्नवाक्यं पूरयत—**

['किम्' शब्द के स्त्रीलिङ्ग रूप से प्रश्न वाक्यों को पूरा करें। Complete the interogative sentences with the feminine form of the pronoun word '*kim*'.]

उदा. सीता ......**का**...... आसीत् ?

1. हनूमान् अन्विष्टवान् ?
2. बालिकायाः सह मैत्री अभवत् ?
3. माता फलं दत्तवती ?
4. बालकः अरण्ये बिभेति ?
5. सा वृद्धा माता आसीत् ?
6. अष्टम्यां तिथौ आगमनम् ?
7. वन्दना कक्ष्यायां पठति ?
8. अध्यापिका छात्रां पाठयति ?
9. त्रिजटा राक्षस्या सह आगतवती ?

## अभ्यासः — 117

✍ **'किम्'-शब्दस्य उचितेन स्त्रीलिङ्ग-रूपेण रिक्तस्थानं पूरयत—**

['किम्' शब्द के उचित स्त्रीलिङ्ग रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the appropriate feminine form of the word '*kim*'.]

उदा. ......**काः**...... बालिकाः कोलाहलं कुर्वन्ति ?

1. अध्यापकः छात्राः आहूतवान् ?
2. विद्यार्थिनीभिः पारितोषिकाणि न प्राप्तानि ?
3. शिक्षिका बालिकाभ्यः कुप्यति ?
4. महिलाः नदीभ्यः जलम् आनीतवत्यः ?
5. महिलानाम् आभरणानि नष्टानि ?
6. अनुराधा कन्यासु श्रेष्ठतमा ?
7. महिलाभ्यः रटनं न रोचते ?
8. अध्यापकः बालिकाः पृच्छति ?
9. बालिकानाम् अक्षराणि सुन्दराणि ?

## अभ्यासः — 118

✍ **'किम्'-शब्दस्य स्त्रीलिङ्ग-रूपाणि पूरयत—**

['किम्' शब्द के स्त्रीलिङ्गरूप पूरा करें। Complete the feminine declension of the pronoun word '*kim*'.]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | का | | |
| द्विती. | काम् | | |
| तृ. | कया | | |
| च. | कस्यै | | |
| प. | कस्याः | | |
| ष. | कस्याः | | |
| स. | कस्याम् | | |

## अभ्यासः — 119

✍ **'इदम्'-शब्दस्य उचितेन स्त्रीलिङ्गरूपेण वाक्यं पूरयत—**

['इदम्' शब्द के उचित स्त्रीलिङ्ग रूप से वाक्य पूरा करें। Complete the sentence with the appropriate feminine form of the word '*idam*'.]

1. मम पुत्री अस्ति।
2. बालिकाः पाठय।
3. कन्यया सह त्वं याहि।
4. मालाभ्यः एतानि पुष्पाणि रक्षितानि सन्ति।
5. पाठशालायाः अध्यापिकाः संस्कृतज्ञाः सन्ति।
6. नदीभ्यः जलम् आनयन्ति।
7. शाटिकयोः वर्णः तुल्यः एव।
8. मालायां शतं पुष्पाणि सन्ति।
9. मात्रोः काऽपि सन्ततिः नास्ति।
10. महिलासु बहु धैर्यम् अस्ति।

## अभ्यासः — 120

✍ **'इदम्'-शब्दस्य स्त्रीलिङ्ग-रूपाणि पूरयत–**

['इदम्' शब्द के स्त्रीलिङ्ग रूप पूरा करें। Complete the feminine declension of the word '*idam*'.]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | | | इमाः |
| द्विती. | | | इमाः |
| तृ. | | | आभिः |
| च. | | | आभ्यः |
| प. | | | आभ्यः |
| ष. | | | आसाम् |
| स. | | | आसु |

## अभ्यासः — 121

✍ **'सर्व'-शब्दस्य स्त्रीलिङ्गरूपैः रिक्तस्थानानि पूरयत–**

['सर्व' शब्द के स्त्रीलिङ्ग रूपों से रिक्त-स्थानों की पूर्ति करें। Fill in the blanks with the feminine forms of the word '*sarva*'.]

1. बालिकाः विद्यालयं गच्छन्ति।
2. छात्राभिः सह लतिका समं व्यवहरति।
3. भूषया बालिका विराजति।
4. विद्यायै प्रयासं कुरुत।
5. स्त्रीभ्यः शाटिकाः प्रियाः भवन्ति।
6. स्त्रीभ्यः सीता पृथक्।
7. नदीनां जलं शीतलं भवति।

8. नदीषु नक्राः न भवन्ति।

9. महिलाभ्यः फलानि वितरतु।

10. छात्राभिः सह अध्यापिका सम्भाषणं करोति।

11. गृहिणीनां नामानि सा जानाति।

12. छात्रासु समानः स्नेहः भवतु।

13. महिलाः गृहम् आगच्छन्ति।

14. सखीभिः सह खादति।

15. वाटिकासु फलानि सन्ति।

## अभ्यासः — 122

✍ **सर्वशब्दस्य स्त्रीलिङ्ग-रूपाणि पूरयत—**

['सर्व' शब्द के स्त्रीलिङ्ग रूप पूरा करें। Complete the feminine declension of the word '*sarva*'. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | सर्वा | | |
| **द्विती.** | | | **सर्वाः** |
| **तृ.** | सर्वया | **सर्वाभ्याम्** | |
| **च.** | | | **सर्वाभ्यः** |
| **प.** | सर्वस्याः | | |
| **ष.** | | | **सर्वासाम्** |
| **स.** | | **सर्वयोः** | |

## 'एतद्'-शब्दस्य नपुंसकलिङ्गप्रयोगाः

**अधोनिर्दिष्टानि वाक्यानि पठत—**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **एतत्** मम पुस्तकम्। | **एते** मम पुस्तके। | **एतानि** मम पुस्तकानि। |
| **एतत्** अहं पठामि। | **एते** पुस्तके गृहं नयामि। | **एतानि** अद्य एव पठामि। |

एतद्-शब्दस्य नपुंसकलिङ्गे तृतीयादिषु शेषविभक्तिषु पुंलिङ्गवत् रूपाणि भवन्ति।

## 'एतद्'-शब्दस्य नपुंसकलिङ्गरूपाणि

**एतानि रूपाणि स्मरत—**

[ इन रूपों का स्मरण करें। Remember these declension. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | एतत् | एते | एतानि |
| **द्विती.** | एतत् | एते | एतानि |
| **तृ.** | एतेन | एताभ्याम् | एतैः |
| **च.** | एतस्मै | एताभ्याम् | एतेभ्यः |
| **प.** | एतस्मात् | एताभ्याम् | एतेभ्यः |
| **ष.** | एतस्य | एतयोः | एतेषाम् |
| **स.** | एतस्मिन् | एतयोः | एतेषु |

**तद्-इदम्-किम्-सर्व-अन्य-सर्वनामशब्दानां नपुंसकलिङ्गरूपाणि**

## अन्येषां केषाञ्चन सर्वनामशब्दानां रूपाणि—

[ अन्य कुछ सर्वनाम शब्दों के रूप। Declension of some other pronoun-words. ]

**तद् (नपुं.)**

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | तत् | ते | तानि |
| **द्विती.** | तत् | ते | तानि |
| **तृ.** | तेन | ताभ्याम् | तैः |
| **च.** | तस्मै | ताभ्याम् | तेभ्यः |
| **प.** | तस्मात् | ताभ्याम् | तेभ्यः |
| **ष.** | तस्य | तयोः | तेषाम् |
| **स.** | तस्मिन् | तयोः | तेषु |

**इदम् (नपुं.)**

| | | | |
|---|---|---|---|
| **प्र.** | इदम् | इमे | इमानि |
| **द्विती.** | इदम् | इमे | इमानि |
| **तृ.** | अनेन | आभ्याम् | एभिः |
| **च.** | अस्मै | आभ्याम् | एभ्यः |
| **प.** | अस्मात् | आभ्याम् | एभ्यः |
| **ष.** | अस्य | अनयोः | एषाम् |
| **स.** | अस्मिन् | अनयोः | एषु |

**किम् (नपुं.)**

| | | | |
|---|---|---|---|
| **प्र.** | किम् | के | कानि |
| **द्विती.** | किम् | के | कानि |
| **तृ.** | केन | काभ्याम् | कैः |
| **च.** | कस्मै | काभ्याम् | केभ्यः |
| **प.** | कस्मात् | काभ्याम् | केभ्यः |
| **ष.** | कस्य | कयोः | केषाम् |
| **स.** | कस्मिन् | कयोः | केषु |

**सर्व (नपुं.)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | सर्वम् | सर्वे | सर्वाणि |
| **द्विती.** | सर्वम् | सर्वे | सर्वाणि |
| **तृ.** | सर्वेण | सर्वाभ्याम् | सर्वैः |
| **च.** | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| **प.** | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| **ष.** | सर्वस्य | सर्वयोः | सर्वेषाम् |
| **स.** | सर्वस्मिन् | सर्वयोः | सर्वेषु |

**अन्य (नपुं.)**

| | | | |
|---|---|---|---|
| **प्र.** | अन्यत् | अन्ये | अन्यानि |
| **द्विती.** | अन्यत् | अन्ये | अन्यानि |
| **तृ.** | अन्येन | अन्याभ्याम् | अन्यैः |
| **च.** | अन्यस्मै | अन्याभ्याम् | अन्येभ्यः |
| **प.** | अन्यस्मात् | अन्याभ्याम् | अन्येभ्यः |
| **ष.** | अन्यस्य | अन्ययोः | अन्येषाम् |
| **स.** | अन्यस्मिन् | अन्ययोः | अन्येषु |

**अवधेयम्**

- ⇨ 'एतद्'-शब्दस्य नपुंसकलिङ्ग-प्रथमायां द्वितीयायां च तुल्यानि रूपाणि भवन्ति।
- ⇨ तृतीयातः अग्रे पुंलिङ्ग-'एतद्'-शब्दवत् रूपाणि भवन्ति।
- ⇨ एवमेव 'तद्'-शब्दस्य रूपाणि बोध्यानि।

## अभ्यासः – 123

✍ **रमेशः स्कूटरयानस्य विषये कानिचन वाक्यानि उक्तवान्। तत्र रिक्तस्थलेषु 'एतद्'-शब्दस्य उपयुक्तानि रूपाणि लिखत–**

[ 'स्कूटर' यान के वारे में रमेश ने कुछ वाक्य बोले। उनमें रिक्तस्थानों पर 'एतत्' शब्द के उपयुक्त रूप लिखें। Ramesh has given some statements about the vehicle scooter. Write the appropriate forms of '*etad*' in the following blank spaces. ]

**एकवचने**

1. यानम् उत्तमम् अस्ति।
2. यानम् अहं वर्षात् पूर्वं क्रीतवान्।
3. यानेन अहं राज्ये सर्वत्र भ्रमणं कृतवान्।
4. यानाय बहुमूल्यं दत्तवान्।
5. यानात् अहं कदापि न पतितवान्।
6. यानस्य वर्णः आकर्षकः अस्ति।
7. याने उपवेष्टुं सदा इच्छति मम पुत्रः।

## अभ्यासः – 124

✍ **'किम्'-शब्दस्य नपुंसकलिङ्ग-रूपाणि पूरयत–**

[ 'किम्' शब्द के नपुंसकरूप पूरा करें। Complete the neuter declension of the pronoun word '*kim*'. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | किम् | | कानि |
| द्विती. | | के | कानि |
| तृ. | केन | काभ्याम् | |
| च. | | काभ्याम् | केभ्यः |
| प. | कस्मात् | | केभ्यः |
| ष. | | कयोः | केषाम् |
| स. | कस्मिन् | कयोः | |

## अभ्यासः — 125

✍ **'इदम्'-शब्दस्य नपुंसकलिङ्गे प्रथमायां द्वितीयायां च तुल्यानि एव रूपाणि भवन्ति। तृतीयातः सप्तमीं यावत् पुंलिङ्गवत् रूपाणि भवन्ति। 'इदम्'-शब्दस्य नपुंसकरूपैः वाक्यानि पूरयत—**

['इदम्' शब्द के नपुंसकलिङ्ग में प्रथमा एवं द्वितीया विभक्ति के समान रूप होते हैं। तृतीया से सप्तमी तक पुंलिङ्ग जैसे रूप होते हैं। 'इदम्' शब्द के नपुंसक रूपों से वाक्य पूरा करें। The nominative and accusative forms of '*idam*' in neuter gender are the same. The neuter forms of the word '*idam*' from instrumental to locative are same as in masculine. Complete the sentence with the neuter forms of the word '*idam*'.]

1. ........ मम गृहम् अस्ति।
2. ........ कमलानि सन्ति।
3. ........ पुस्तकानि पठ।
4. ........ पुस्तके स्तः।
5. ........ मन्दिरे जनाः अर्चन्ति।
6. ........ क्रीडनकेषु एकं मम।
7. ........ पुस्तके नयति।
8. ........ पुष्पं तस्यै रोचते।
9. ........ गृहं विशालं वर्तते।
10. ........ पुष्पाणां सुगन्धः सर्वत्र व्याप्तः।
11. ........ पर्णानि वृक्षात् पतितानि।
12. ........ मित्रयोः सम्भाषणं शृणु।
13. ........ फलस्य रुचिः मधुरा।
14. ........ मित्रे साहाय्यं कुरुतः।
15. ........ उद्यानात् प्रतिनिवर्तते।
16. ........ गृहेषु जनाः न वसन्ति।
17. ........ मन्दिरात् सः आगतः।
18. ........ यानेन जनाः गच्छन्ति।

## अभ्यासः — 126

✍ **'इदम्'-शब्दस्य उपयुक्तलिङ्गस्य रूपैः वाक्यं पूरयत—**

[ 'इदम्' शब्द के उपयुक्त लिङ्ग के रूप से वाक्य पूरा करें। Complete the sentence with the appropriate forms of the word '*idam*'. ]

**यथा** ......अयं...... वृद्धः अस्ति।

1. ............ बालौ स्तः।
2. ............ वृक्षाः सन्ति।
3. ............ बालकौ कः पालयति ?
4. ............ छात्रान् कः अध्यापयति ?
5. ............ यानेन गृहं यास्यामि।
6. ............ बालिकाभिः सह एका अध्यापिका अस्ति।
7. ............ छात्रायाः अभिभावकः आगच्छति।
8. ............ नद्यां नक्रः अस्ति।
9. ............ नद्योः जलं मलिनम् अस्ति।
10. ............ गोषु कृष्णा बहुक्षीरा अस्ति।
11. ............ वृद्धस्य वाक्यं शृणुत।
12. ............ बालकाभ्यां सह भवान् न गच्छतु।
13. ............ बालकाय मोदकं रोचते।
14. ............ वृक्षेभ्यः वटवृक्षः विशालः अस्ति।
15. ............ महिलानां शीलं शोभनम् अस्ति।
16. ............ निर्धनानां साहाय्यं कुरु।
17. ............ नगरेभ्यः छात्राः आगच्छन्ति।
18. ............ ग्रन्थानाम् आवलिं करोतु।
19. ............ महिलासु रमा बुद्धिमती।

**'भवत्'-शब्दस्य पुंलिङ्गप्रयोगाः**

**अधोनिर्दिष्टानि वाक्यानि पठत—**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **भवान्** कुत्र वसति ? | **भवन्तौ** कुत्र गच्छतः ? | **भवन्तः** पण्डिताः सन्ति। |
| **भवन्तम्** अहं नमामि। | **भवन्तौ** निमन्त्रयामि। | **भवतः** मानयामि। |
| **भवता** सह क्रीडामि। | **भवद्भ्यां** सह गच्छामि। | **भवद्भिः** सह तिष्ठामि। |
| **भवते** इदं ददामि। | **भवद्भ्याम्** उपहारम् अर्पयामि। | **भवद्भ्यः** किं रोचते ? |
| **भवतः** पठितुं वाञ्छामि। | **भवद्भ्यां** धनं न कामये। | **भवद्भ्यः** किमपि न गृह्णामि। |
| **भवतः** नाम किम् ? | **भवतोः** वासः कुत्र ? | **भवतां** का चिन्ता ? |
| **भवति** मम स्नेहः अस्ति। | **भवतोः** सर्वे स्निह्यन्ति। | **भवत्सु** कः ज्येष्ठः ? |

**'भवत्'-शब्दस्य पुंलिङ्गरूपाणि**

**एतानि रूपाणि स्मरत—**

[ इन रूपों का स्मरण करें। Remember this declension. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | भवान् | भवन्तौ | भवन्तः |
| **द्विती.** | भवन्तम् | भवन्तौ | भवतः |
| **तृ.** | भवता | भवद्भ्याम् | भवद्भिः |
| **च.** | भवते | भवद्भ्याम् | भवद्भ्यः |
| **पं.** | भवतः | भवद्भ्याम् | भवद्भ्यः |
| **ष.** | भवतः | भवतोः | भवताम् |
| **स.** | भवति | भवतोः | भवत्सु |

## अभ्यासः — 127

✍ **'भवत्'-शब्दस्य पुंलिङ्गरूपेण वाक्यं पूरयत—**

['भवत्' शब्द के पुंलिङ्ग रूप से वाक्य पूरा करें। Complete the sentence with the masculine form of the word '*bhavat*'. ]

1. किं कार्यं करोति ?
2. कुत्र वसतः ?
3. कदा अत्र आगताः ?
4. कीदृशः अस्ति ?
5. सह अहं गमिष्यामि।
6. सः बिभेति।
7. द्वयोः किं कार्यम् अस्ति।
8. त्रिषु बहुगुणाः सन्ति।
9. कनिष्ठः कः ?
10. ज्येष्ठः कः ?

## अभ्यासः — 128

✍ **'भवत्'-शब्दस्य पुंलिङ्गरूपाणि लिखत—**

['भवत्' शब्द के पुंलिङ्ग रूप लिखें। Write the masculine forms of the word '*bhavat*'.]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | भवान् | | |
| **द्विती.** | भवन्तम् | | |
| **तृ.** | भवता | | |
| **च.** | भवते | | |
| **प.** | भवतः | | |
| **ष.** | भवतः | | |
| **स.** | भवति | | |

### 'भवत्'-शब्दस्य स्त्रीलिङ्गप्रयोगाः

**अधोनिर्दिष्टानि वाक्यानि पठत—**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **भवती** कुत्र वसति ? | **भवत्यौ** कुत्र गच्छतः ? | **भवत्यः** विदुष्यः सन्ति। |
| **भवतीम्** अहं वदामि। | **भवत्यौ** एव निवेदयामि। | **भवतीः** मम गृहं आह्वयामि। |
| **भवत्या** सह क्रीडामि। | **भवतीभ्यां** सह गच्छामि। | **भवतीभिः** सह तिष्ठामि। |
| **भवत्यै** इदं ददामि। | **भवतीभ्याम्** उपहारम् अर्पयामि। | **भवतीभ्यः** किं रोचते ? |
| **भवत्याः** धनं कथं स्वीकरोमि। | **भवतीभ्यां** धनं न कामये। | **भवतीभ्यः** किमपि न गृह्णामि। |
| **भवत्याः** नाम किम् ? | **भवत्योः** वासः कुत्र ? | **भवतीनां** का चिन्ता ? |
| **भवत्याम्** मम स्नेहः अस्ति। | **भवत्योः** सर्वे स्निह्यन्ति। | **भवतीषु** कः ज्येष्ठः ? |

### 'भवत्'-शब्दस्य स्त्रीलिङ्गरूपाणि

**एतानि रूपाणि स्मरत—**

[ इन रूपों का स्मरण करें। Remember the declension. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | भवती | भवत्यौ | भवत्यः |
| **द्विती.** | भवतीम् | भवत्यौ | भवतीः |
| **तृ.** | भवत्या | भवतीभ्याम् | भवतीभिः |
| **च.** | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| **प.** | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| **ष.** | भवत्याः | भवत्योः | भवतीनाम् |
| **स.** | भवत्याम् | भवत्योः | भवतीषु |

## अभ्यासः — 129

✍ **'भवत्'-शब्दस्य स्त्रीलिङ्गरूपेण वाक्यं पूरयत—**

[ 'भवत्' शब्द के स्त्रीलिङ्ग रूप से वाक्य पूरा करें। Complete the sentence with the feminine forms of the word '*bhavat*'. ]

1. अध्यापिका अस्ति।
2. सख्यौ स्तः।
3. गृहस्वामिन्यः सन्ति।
4. द्वयोः स्थानम् आरक्षितम् अस्ति।
5. सर्वाभ्यः अध्यापिकाभ्यः छात्राः बिभ्यति।
6. गणितस्य संस्कृतस्य वा अध्यापिका अस्ति।
7. कति छात्राः सन्ति ?
8. अध्यापिकानां महान् सहयोगः अस्ति।
9. द्वयोः बाल्यसम्बन्धः अस्ति।
10. सर्वासां कनिष्ठा का अस्ति ?

## अभ्यासः — 130

✍ **'भवत्'-शब्दस्य स्त्रीलिङ्गरूपाणि लिखत—**

['भवत्' शब्द के स्त्रीलिङ्ग रूप लिखें। Write the feminine declension of the word '*bhavat*'. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | | भवत्यौ | |
| **द्विती.** | | भवत्यौ | |
| **तृ.** | | भवतीभ्याम् | |
| **च.** | | भवतीभ्याम् | |
| **प.** | | भवतीभ्याम् | |
| **ष.** | | भवत्योः | |
| **स.** | | भवत्योः | |

## अस्मद्-शब्दः

**अधोनिर्दिष्टानि वाक्यानि अवधानपूर्वकं पठत—**

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read the following sentences carefully. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **अहम्** अध्यापकः अस्मि। | **आवां** सतीर्थ्यौ स्वः। | **वयं** भारते वसामः। |
| **माम्** अनुकरोतु। | **आवां** सः जानाति। | **अस्मान्** छात्रः समाद्रियते। |
| **मया** सह कः यास्यति ? | **आवाभ्यां** सह त्वम् अपि चल। | **अस्माभिः** सह बहवः सन्ति। |
| **मह्यम्** अध्यापनं रोचते। | **आवाभ्यां** तक्रं न रोचते। | **अस्मभ्यं** सर्वं वस्तु ददातु। |
| **मत्** पूर्वम् अन्यः व्याकरणं पाठयति स्म। | **आवाभ्यां** दूरे सः वसति। | **अस्मत्** पृथक् कथं वसति भवान् ? |
| **मम** अयं विचारः अस्ति। | **आवयोः** प्रथमः परिचयः वाराणस्याम् अभवत्। | **अस्माकं** कः अपराधः अस्ति ? |
| **मयि** सर्वं ज्ञानं तु नास्ति। | **आवयोः** स्नेहः इदानीम् अपि तथैव अस्ति। | **अस्मासु** बहवः विद्वांसः सन्ति। |

## 'अस्मद्'-शब्दस्य रूपाणि

**एतानि रूपाणि स्मरत—**

[ इन रूपों का स्मरण करें। Remember this declension. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | अहम् | आवाम् | वयम् |
| **द्विती.** | माम्/मा | आवाम्/नौ | अस्मान्/नः |
| **तृ.** | मया | आवाभ्याम् | अस्माभिः |
| **च.** | मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| **प.** | मत् | आवाभ्याम् | अस्मत् |
| **ष.** | मम/मे | आवयोः/नौ | अस्माकम्/नः |
| **स.** | मयि | आवयोः | अस्मासु |

## अभ्यासः – 131

✍ **अस्मद्-शब्दरूपैः वाक्यानि पूरयत–**

['अस्मद्' शब्द के रूपों से वाक्य पूरा करें। Complete the sentence with the forms of '*asmad*'. ]

1. ______ लिखामि।
2. ______ पश्यतु।
3. ______ सह चल।
4. ______ अन्नं रोचते।
5. ______ दूरे तिष्ठति।
6. ______ गृहम् अस्ति।
7. ______ कतरः शीघ्रं धावति।
8. ______ कतमः न्यायस्य पण्डितः अस्ति।

## अभ्यासः – 132

✍ **'अस्मद्'-शब्दस्य अवशिष्ट-रूपाणि लिखत–**

['अस्मद्' शब्द के अवशिष्ट रूप लिखें। Write the remaining declension of the pronoun word '*asmad*'. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | अहम् | | |
| **द्विती.** | माम् | | |
| **तृ.** | मया | | |
| **च.** | मह्यम् | | |
| **प.** | मत् | | |
| **ष.** | मम | | |
| **स.** | मयि | | |

## युष्मद्-शब्दः

**अधोनिर्दिष्टानि वाक्यानि अवधानपूर्वकं पठत—**

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read the following sentences carefully. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **त्वं** किं करोषि ? | **युवां** भ्रातरौ स्तः। | **यूयं** संस्कृतं पठत। |
| **त्वाम्** अहं ब्रवीमि। | **युवाम्** अहं जानामि। | **युष्मान्** गुरवः प्रोत्साहयिष्यन्ति। |
| **त्वया** सह गमिष्यामि। | **युवाभ्यां** सह सः अपि यास्यति। | **युष्माभिः** सह अहम् अस्मि। |
| **तुभ्यं** द्रव्यं दास्यामि। | **युवाभ्यां** नूनम् एतत् दास्यामि। | **युष्मभ्यं** जीविकां दास्यति। . |
| **त्वत्** अन्यः कः मम सखा ? | **युवाभ्याम्** अयं कनिष्ठः। | **युष्मत्** अन्यः कः योग्यः ? |
| **तव** पृष्ठे अस्मि, चिन्ता मास्तु। | **युवयोः** अयं सखा। | **युष्माकम्** एतत् संस्थानम्। |
| **त्वयि** मम महान् स्नेहः अस्ति। | **युवयोः** अयं तीव्रतरः। | **युष्मासु** नायकः कः ? |

## 'युष्मद्'-शब्दस्य रूपाणि

**एतानि रूपाणि स्मरत—**

[ इन रूपों का स्मरण करें। Remember this declension. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र.** | त्वम् | युवाम् | यूयम् |
| **द्विती.** | त्वाम्/त्वा | युवाम् / वाम् | युष्मान्/वः |
| **तृ.** | त्वया | युवाभ्याम् | युष्माभिः |
| **च.** | तुभ्यम्/ते | युवाभ्याम् / वाम् | युष्मभ्यम्/वः |
| **प.** | त्वत् | युवाभ्याम् | युष्मत् |
| **ष.** | तव/ते | युवयोः / वाम् | युष्माकम्/वः |
| **स.** | त्वयि | युवयोः | युष्मासु |

## अभ्यासः — 133

✍ **'युष्मद्'-शब्दस्य रूपैः वाक्यानि पूरयत–**

['युष्मद्' शब्द के रूपों से वाक्य पूरा करें। Complete the sentences with the forms of '*yuṣmad*'. ]

**उदा.** अहम् ........**त्वया**........ (एक०) सह आगमिष्यामि।

1. (बहु०) अध्यापकः आह्वयति।
2. (द्वि०) पठथः।
3. (एक०) गृहम् अस्ति।
4. सः (द्वि०) क्रुध्यति।
5. (बहु०) सा दूरे अस्ति।
6. (द्वि०) कतरः वैद्यः।
7. (एक०) धैर्यम् अधिकम्।
8. (द्वि०) सह आञ्जनेयः सख्यम् इच्छति।
9. (बहु०) बहवः गुणाः सन्ति।
10. शिक्षिका (बहु०) बोधयति।
11. (एक०) व्याकरणं रोचते।
12. (एक०) धनं न स्वीकरोति।
13. (द्वि०) प्रीतिः निरतिशया।
14. (बहु०) कोलाहलः अधिकः जातः।
15. (बहु०) नियमपालनं करणीयम्।
16. (द्वि०) स्वच्छतया कार्यं कुरुतम्।
17. पुत्र ! (एक०) पाठं पठ।
18. भोः राव ! आचार्यः (एक०) पृच्छति।
19. माता (बहु०) अधिकं स्निह्यति।

## अभ्यासः — 134

✍ **युष्मद्-शब्दस्य रूपाणि लिखत—**

[ युष्मद् शब्द के रूप लिखें। Write the declension of the pronoun word '*yuṣmad*'. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | | युवाम् | |
| द्विती. | | युवाम् | |
| तृ. | | युवाभ्याम् | |
| च. | | युवाभ्याम् | |
| प. | | युवाभ्याम् | |
| ष. | | युवयोः | |
| स. | | युवयोः | |

## अभ्यासः — 135

✍ **'सर्व'-शब्दस्य उपयुक्तरूपैः वाक्यानि पूरयत—**

[ 'सर्व' शब्द के उपयुक्त रूपों से वाक्य पूरा करें। Complete the sentence with the forms of the pronoun word '*sarva*'. ]

1. ________ रात्रौ विश्रामं कुर्वन्ति।
2. ________ शिशून् माता लालयति।
3. ________ भृत्यैः कार्यं कारयतु।
4. ________ मित्रैः सह भ्रमति।
5. ________ निर्धनाय धनं यच्छति।
6. ________ अतिथिभ्यः भोजनं पचति।
7. ________ ग्रामात् अयं भिन्नः।
8. ________ कपोतेभ्यः अयं पृथक् अस्ति।
9. ________ बालकानां तुल्यं परिधानम् अस्ति।
10. ________ छात्रेषु उत्तमः सुशीलः।

## अभ्यासः – 136

✍ **रूपाणि पूरयत—**

[ रूप पूरा करें। Complete the declension. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | | सर्वौ | |
| **द्विती.** | | सर्वौ | |
| **तृ.** | | सर्वाभ्याम् | |
| **च.** | | सर्वाभ्याम् | |
| **प.** | | सर्वाभ्याम् | |
| **ष.** | | सर्वयोः | |
| **स.** | | सर्वयोः | |

**अवधेयम्**

'अन्य'-शब्दस्य नपुंसकलिङ्गे प्रथमायां द्वितीयायां च तुल्यानि रूपाणि भवन्ति। तृतीयातः 'अन्य'-शब्दस्य पुंलिङ्गस्य इव रूपाणि भवन्ति।

## अभ्यासः — 137

✍ **अधोलिखितेषु वाक्येषु 'अन्य'-शब्दस्य उचितं रूपं लिखत—**

[ अधोलिखित वाक्यों में 'अन्य' शब्द के उचित रूप लिखें। Write the appropriate forms of '*anya*' in the following sentences. ]

उदा. ....अन्यद्.... मन्दिरं कुत्र अस्ति ?

1. ............ पुस्तके आनय।
2. ............ यानानि न सन्ति।
3. ............ याने कुत्र गच्छतः।
4. ............ यानानि किमर्थं न पश्यसि ?
5. ............ यानेन वयं गच्छामः।
6. ............ यानेभ्यः आरक्षणं करोतु।
7. ............ मन्दिरेभ्यः एतद् भिन्नम्।
8. ............ गृहयोः का स्थितिः ?
9. ............ नगरेषु भ्रमणं कठिनम् अस्ति।
10. ............ फलानि ददातु।
11. ............ यानं कुत्र गच्छति ?
12. ............ वाक्यं वदतु।
13. ............ पर्णानि अपि पतितानि।
14. ............ मित्रे अपि सूचयतु।

**सर्वनामशब्दाः**

## हंसविलापः

निषधदेशे राजा नलः आसीत्। **स** अतीव सुन्दरः सर्वगुणसम्पन्नः च आसीत्। **अस्य** गुणैः आकृष्टा विदर्भराजपुत्री दमयन्ती **एनं** राजानं कामयते स्म। राजा नलः अपि **तस्यां** दमयन्त्यां स्निह्यति स्म। एकदा **तस्याः** दमयन्त्याः विरहेण भूपतिः नलः उपवन-विहारम् इष्टवान्।

ततः राजा नलः **सर्वान्** नागरिकान् विहाय कैश्चित् मित्रैः सह अश्वेन उपवनं प्राप्तवान्। तत्र वनपालः **तं** राजानं कमलं, चम्पकं, पलाशं, केतकी इत्यादीनि **सर्वाणि** पुष्पाणि दर्शितवान्। परन्तु राजा **तैः सर्वैः** उपवनवस्तुभिः आनन्दितः न अभवत्।



अनन्तरं राजा नलः तत्र उपवने एकं विशालं सरः अपश्यत्। तत्र सरसि हिरण्मयं विचित्रं हंसं दृष्ट्वा राजा उत्कण्ठितमनाः अभवत्। हंसः अपि किञ्चित्कालानन्तरं तडागस्य समीपे पक्षेण शिरः पिधाय निद्राम् अकरोत्। अवनिपतिः निभृतं गत्वा कुतूहलेन **तं** पक्षिणम् स्वपाणिना धृतवान्। '**अहं** बद्धः' इति भीत्या हंसः उड्डयनाय मुहुः मुहुः अयतत। हताशः सन् सः **तस्य** राज्ञः करौ दशति स्म। **अन्ये** हंसाः **तं** तडागं विहाय कूले अकूजन्। **तत् सर्वं** दृष्ट्वा **अन्ये** खगाः नभः आश्रित्य उच्चैः रवं कृतवन्तः। अवनिपतेः **इदं** कुकृत्यं ज्ञात्वा करपञ्जरस्थितः हंसः **तं** राजानम् अवदत्–

हे राजन्! **भवतां** तृष्णातरलं मनः धिक्! **मम** सुवर्णमयान् पक्षान् दृष्ट्वा **मां** धृतवान्। **अनेन** सुवर्णेन **तव** कियान् लाभः भविष्यति। **भवान् मम** वधं करिष्यति चेत्, न केवलं प्राणिवधः भविष्यति, किन्तु विश्वासघातः अपि भविष्यति। **त्वाम्** अवलोक्य **अहं** विश्वस्तमनाः तडागस्य कूले शयनं कृतवान्। विश्वासजुषां वधं सर्वे निन्दन्ति। यदि **भवान्** पराक्रमं दर्शयितुम् इच्छति, तदा **ये** युद्धवीराः सन्ति, **तैः** सह संग्रामं करोतु। **अस्मिन्** कृपाश्रये पक्षिणि **तव** कुविक्रमं धिग् अस्तु।



मुनेः इव **अस्माकं** फलेन मूलेन जीवनवृत्तिः, तत्रापि **भवतां** राज्ञां दण्डविधानम् अतीव लज्जाकरम्। इत्थं विचित्रैः वचनैः राजानम् उपालभ्य पुनः सः हंसः करुणं विलापं कृतवान्–

हे राजन् ! **मम** जनन्याः **अहम्** एव एकः पुत्रः। **सा** जननी अपि जरातुरा। **मम** नाशे **तस्याः अन्या** गतिः नास्ति। **सा** स्वयम् अपि असमर्था। **मम** पत्नी वरटा नवप्रसूतिः। अतः **तस्याः** स्थितिः चिन्तनीया। **तयोः** जाया-जनन्योः **अहम्** एव एकः शरणम्। **तं** जनं पीडयसि, हे विधातः ! **त्वां किं** करुणा न निवारयति। हे मातः ! **मम** सुहृदः **भवत्यै मम** मरणवृत्तान्तं कथयिष्यन्ति। **ते** तु संसारस्य निन्दां कृत्वा स्वस्य गृहं यास्यन्ति। ततः परं भवत्याः पुत्रवियोगशोकः दुःसहः भविष्यति। हे प्रिये ! '**मम** कृते मृणालं नीत्वा मम प्रियः कियता विलम्बेन आगच्छति' इति यदा **भवती** सुहृदः प्रक्ष्यति, तदा **तान्** रुदतः विलोक्य तव कीदृशी स्थितिः भविष्यति। ततः **मम इदं** वज्रप्रहारसदृशं वृत्तान्तं श्रुत्वा सर्वाः अपि दिशः शून्याः विलोकयिष्यसि। हे चित्राङ्गि ! यदि **मम** वियोगशोकेन **त्वम्** अपि प्राणत्यागं करिष्यसि तर्हि **आवयोः** विरहात् बहुभिः मनोरथैः प्राप्ताः सन्ततयः क्षणेन नष्टाः भविष्यन्ति। इत्थं विलापं कृत्वा हंसः राज्ञः हस्तयोः एव मूर्च्छितः अभवत्।



राजा हंसस्य विलापं श्रुत्वा दयार्द्रहृदयः अभवत्। **तस्य** नेत्राभ्याम् अश्रूणि अवहन्। अश्रुसेकं प्राप्य करमध्ये स्थितः सुवर्णहंसः सञ्ज्ञाम् अलभत। ततः राजा अवदत्– 'तव ईदृशम् अपूर्वं रूपं द्रष्टुम् एव अहं **त्वां** धृतवान्। अधुना तुभ्यम् अभयं ददामि। यथेच्छं गच्छ।' इति उक्त्वा राजा नलः **तं** विलपन्तं हंसम् अमुञ्चत्।



◆◆◆

## सुभाषितम्

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे ! त्वां करुणा रुणद्धि नो॥

## अभ्यासः – 138

1. **त्यक्तं शब्दरूपं यथोचितं पूरयत–**
[ परित्यक्त शब्दरूप पूरा करें। Complete the left declension . ]

| | एक. | द्वि. | बहु. | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|---|
| (i) | सः | | | (xiii) | मम | | |
| (ii) | अस्य | | | (xiv) | अनेन | | |
| (iii) | तस्याः | | | (xv) | तव | | |
| (iv) | तम् | | | (xvi) | | | ये |
| (v) | | | सर्वान् | (xvii) | | | तैः |
| (vi) | | | तेभ्यः | (xviii) | अस्मिन् | | |
| (vii) | | | सर्वेभ्यः | (xix) | सा | | |
| (viii) | तस्य | | | (xx) | किम् | | |
| (ix) | अहम् | | | (xxi) | अमुम् | | |
| (x) | | | अन्ये | (xxii) | अन्या | | |
| (xi) | तत् | | | (xxiii) | त्वम् | | |
| (xii) | इदम् | | | (xxiv) | | तयोः | |

2. **अधोलिखितानां 'सर्वनाम-रूपाणाम्' प्रातिपदिकं लिखत–**
[ अधोलिखित सर्वनाम रूपों के प्रातिपदिक लिखें। Write the base of the following pronoun words. ]

| | सर्वनामरूपम् | प्रातिपदिकम् | | सर्वनामरूपम् | प्रातिपदिकम् |
|---|---|---|---|---|---|
| (i) | अस्य | । | (vi) | अन्ये | । |
| (ii) | तस्याः | । | (vii) | अमुम् | । |
| (iii) | सर्वान् | । | (viii) | किम् | । |
| (iv) | अहम् | । | (ix) | ये | । |
| (v) | त्वम् | । | (x) | अनेन | । |

**3. अधोलिखितानां सर्वनामरूपाणां प्रातिपदिकं, लिङ्गं, विभक्तिं वचनं च लिखत–**

[ अधोलिखित सर्वनाम रूपों के प्रातिपदिक, लिङ्ग, विभक्ति एवं वचन लिखें। Write the base, gender, case and number of the following pronoun words. ]

| | | प्रातिपदिकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| (i) | सः | तत् | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| (ii) | अस्य | | | | |
| (iii) | तस्याम् | | | | |
| (iv) | तम् | | | | |
| (v) | सर्वान् | | | | |
| (vi) | तेभ्यः | | | | |
| (vii) | सर्वेभ्यः | | | | |
| (viii) | अहम् | | | | |
| (ix) | त्वम् | | | | |
| (x) | तत् | | | | |
| (xi) | अन्ये | | | | |
| (xii) | भवतः | | | | |
| (xiii) | इदम् | | | | |
| (xiv) | त्वाम् | | | | |
| (xv) | अस्मिन् | | | | |
| (xvi) | अन्ये | | | | |
| (xvii) | अस्माकम् | | | | |
| (xviii) | अमुम् | | | | |
| (xix) | आवयोः | | | | |
| (xx) | तैः | | | | |
| (xxi) | सर्वासु | | | | |

4. **अधोलिखितानां पदानां बहुवचनं लिखत—**

[अधोलिखित पदों के बहुवचन लिखें। Write the plural forms of the following words.]

| | | बहुवचनम् | | | बहुवचनम् |
|---|---|---|---|---|---|
| (i) | सर्वः | । | (vi) | अयम् | । |
| (ii) | एषः | । | (vii) | अहम् | । |
| (iii) | सः | ............................. । | (viii) | त्वम् | । |
| (iv) | अन्यः | । | (ix) | भवान् | । |
| (v) | कः | । | (x) | भवती | । |

5. **अधोलिखितानां पदानां स्त्रीलिङ्गरूपाणि लिखत—**

[अधोलिखित पदों के स्त्रीलिङ्ग रूप लिखें। Write the feminine forms of the following words.]

| | | स्त्रीलिङ्गरूपम् |
|---|---|---|
| (i) | भवान् | । |
| (ii) | सर्वः | । |
| (iii) | कः | । |
| (iv) | अयम् | । |
| (v) | एषः | । |
| (vi) | सः | । |
| (vii) | अन्यः | । |

सुभाषितेषु सर्वनामप्रयोगाः

# सुभाषितानि

अयं निजः परो वेति गणना लघु-चेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥

का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः ॥

कः कस्य पुरुषो बन्धुः किमाप्यं कस्य केनचित् ।
यदेको जायते जन्तुरेक एव विनश्यति ॥

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्त्तुं वर्षशतैरपि ॥

न यस्य चेष्टितं विद्यान्न कुलं न पराक्रमम् ।
न तस्य विश्वसेत् प्राज्ञो यदीछेच्छ्रियमात्मनः ॥

यत्र सर्वेऽपि नेतारः सर्वे पण्डितमानिनः ।
सर्वे महत्त्वमिच्छन्ति तत्र कार्यं विनश्यति ॥

यानि कानि च पापानि कृतानि सुबहूनि च ।
तानि सर्वाणि नष्टानि उपवासप्रभावतः ॥

यस्य कस्य तरोर्मूलं येन केन प्रपेषयेत् ।
यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति ॥

◆◆◆

## कथायां सर्वनामप्रयोगाः

### लब्धप्रणाशम्

(मकर-वानर-कथा)

कस्यचित् समुद्रस्य समीपे एकः जम्बू-तरुः आसीत् । तस्मिन् तरौ रक्तमुखः नाम वानरः निवसति स्म । कदाचित् तस्य तरोः अधः करालमुखः नाम मकरः समुद्रस्य वारिणः बहिः आगत्य सुकोमले सिकतास्थले उपाविशत् । तं मकरं दृष्ट्वा रक्तमुखः वानरः अवदत्– भोः ! भवान् अभ्यागतः अतिथिः । एतानि अमृततुल्यानि



जम्बूफलानि भक्षयतु' । मकरः तानि फलानि भक्षयित्वा तेन सह गोष्ठ्याः सुखं चिरम् अनुभूय स्वगृहं गतवान् । एवं प्रकारेण प्रतिदिनं तौ वानर-मकरौ जम्बूतरोः छायायां स्थित्वा विविधशास्त्राणां गोष्ठ्याः सुखेन कालं यापयन्तौ आस्ताम् । अपि च मकरः स्वयं खादित्वा अवशिष्टानि जम्बूफलानि गृहं नीत्वा स्वपत्न्यै प्रयच्छति स्म ।

अथ एकस्मिन् दिने मकरस्य भार्या मकरं पृष्टवती– 'नाथ ! एवंविधानि अमृततुल्यानि फलानि कुतः प्राप्नोति भवान् ? सः अवदत्– "भद्रे ! मम कश्चित् परमसुहृत् रक्तमुखः नाम वानरः अस्ति । सः प्रीतिपूर्वं मह्यम् इमानि फलानि प्रयच्छति' । एतत् श्रुत्वा सा उक्तवती– 'यः सदा अमृतप्रायाणि ईदृशानि फलानि भक्षयति, तर्हि तस्य हृदयम् अमृतमयं भविष्यति । यदि तव मयि प्रीतिः अस्ति तर्हि तस्य हृदयं मह्यं प्रयच्छ । तद् भक्षयित्वा अहं तृप्ता भविष्यामि" । तथाकरणम् अनुचितम् अस्ति इति मकरः यद्यपि तां बोधितवान् तथापि सा स्वाग्रहं नैव त्यक्तवती । पुनः कुपिता भूत्वा सा उक्तवती– 'अद्यावधि कदापि त्वं मम वचनं न निराकृतवान् । किमर्थम् इदानीम् एवं करोषि ? अहो ! अहं ज्ञातवती, सा नूनम् एव वानरी भविष्यति । तस्याः अनुरागे एव सकलं दिनं त्वं तत्र

यापयसि। यदि सा तव वल्लभा नास्ति तर्हि तां कथं न व्यापादयसि ? अथवा यदि सः वानरः अस्ति तर्हि तेन सह तव कः स्नेहः ? किं बहुना ? यदि त्वं तस्य हृदयं न दास्यसि, तर्हि प्रायोपवेशनं करिष्यामि'।

एवं तस्याः निश्चयं ज्ञात्वा मकरः वानरस्य सविधे अगच्छत्। वानरः तं विलम्बेन आगतं दृष्ट्वा पृष्टवान्– 'भो मित्र ! किमर्थम् अद्य चिरवेलायां समायातः। कस्मात् साह्लादं न आलपसि ? न वा सुभाषितानि वदसि' ? तदा मकरः अवदत्– 'तव भ्रातृजाया निष्ठुरतरवाक्यैः माम् उक्तवती– 'भो कृतघ्न ! त्वं प्रतिदिनं मित्रम् उपजीवसि, अपि च न तस्य प्रत्युपकारं करोषि, अतः तव प्रायश्चित्तम् अपि नास्ति।'



तत् त्वं मम देवरं प्रत्युपकाराय गृहम् आनय, नो चेत् त्वया सह मम परलोके एव दर्शनं भविष्यति' इति। अतः अहं तव सकाशम् आगतः। वानरः अकथयत्– 'युक्तम् एव उक्तवती मम भ्रातृपत्नी। परं भवतः गृहं जलमध्ये किल। कथं तत्र वनचराः वयं गन्तुं शक्नुमः। तस्मात् तां भ्रातृजायाम् एव अत्र आनय येन तां प्रणम्य तस्याः आशीर्वादं ग्रहीष्यामि'। मकरः अवदत्– 'भो मित्र ! समुद्रान्तरे सुरम्ये पुलिनदेशे अस्माकं गृहम् अस्ति। तत् मम पृष्ठम् आरुह्य चल'।

तत् श्रुत्वा वानरः तत्र गन्तुं तस्य मकरस्य पृष्ठे आरूढवान्। अगाधे जले मकरः अचिन्तयत्– 'एषः वानरः इदानीं मम वशे जातः। मम पृष्ठगतः अयं मनागपि इतस्ततः गन्तुं नैव शक्ष्यति, तस्मात् सद्यः एव स्वाभिप्रायं कथयामि'। इत्थं विचार्य सः वानरं प्रति उक्तवान्– 'मित्र ! अहं त्वां वधाय समानीतवान्। मम भार्या तव अमृतमयस्य हृदयस्य आस्वादनं कर्तुं वाञ्छति। अत एव सा त्वाम् अत्र आनेतुम् उक्तवती', प्रत्युत्पन्नमतिः वानरः अवदत्– 'भद्र यदि एवम् अस्ति तर्हि त्वं तत्रैव किमर्थं न उक्तवान्। अहं तु स्वहृदयं जम्बूकोटरे एव सदा

स्थापयामि। मम हृदयम् इदानीम् अपि तत्रैव अस्ति'। एतत् श्रुत्वा मकरः अकथयत्– 'अस्तु, तर्हि अहं त्वां जम्बूपादपं पुनः प्रापयामि तत्र गत्वा तव हृदयम् आनय येन मम पत्नी तद् भक्षयित्वा अनशनात् उत्थास्यति'। एवम् उक्त्वा मकरः निवृत्य जम्बूपादपस्य समीपे आगतवान्। वानरः अपि कथमपि तीरं प्राप्तवान्। ततः दीर्घतरेण उत्कूर्दनेन जम्बूपादपम् आरुह्य चिन्तितवान्– 'अहो ! लब्धाः तावत् प्राणाः'।

अथ मकरः उक्तवान्– 'भो मित्र ! अर्पय तत् हृदयं यत् तव भ्रातृपत्नी भक्षयित्वा अनशनं समाप्स्यति'। सः विहस्य तं मकरं भर्त्सितवान्। मूर्ख ! धिक् त्वां विश्वासघातकम् ! किं कस्यचित् हृदयद्वयं भवति ? शीघ्रम् इतः अपसर। न पुनः अत्र आगच्छ'। तत् श्रुत्वा मकरः चिन्तितवान्– 'अहो ! किमर्थम् अहम् एतस्मै स्वाभिप्रायं निवेदितवान्। यदि एषः पुनरपि विश्वासम् आगच्छति तर्हि कथञ्चित् विश्वासयामि। एवं विचिन्त्य उक्तवान् – 'मित्र ! हास्येन अहं तथा उक्तवान्। तव हृदयेन तस्याः न किमपि प्रयोजनम्। आगच्छ अस्माकं गृहम्। तव भ्रातृजाया तव दर्शनाय उत्कण्ठिता वर्तते। मकरस्य धूर्तताम् अवगत्य वानरः अवदत्– 'भो दुष्ट ! गच्छ गच्छ। इतः परम् अहं त्वया सह न आगमिष्यामि। त्वत्सदृशे स्वार्थसाधके



वञ्चकमित्रे कदापि विश्वासः न करणीयः' इति। मकरः स्वकृत्याय पश्चात्तापं कृत्वा ततः प्रत्यागच्छत्।

◆◆◆

# तृतीयः स्तबकः

## 3.2 द्वितीयः पाठः

## [ अव्ययम् ]

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

| | |
|---|---|
| **प्रातः सायं च** भ्रमणं कर्तव्यम्। | वटुः **सदा** पठति। |
| देवाय **नमः**। | सिंहः **उच्चैः** गर्जति। |
| गजः **शनैः** चलति। | ज्ञानात् **ऋते** मुक्तिः नास्ति। |
| विवादेन **अलम्**। | धनेन **विना** सुखं नास्ति। |
| रामः कृष्णः **वा** आगच्छतु। | रामः लक्ष्मणः सीता **च** वनम् अगच्छन्। |
| ग्रामं **समया/निकषा** नदी वहति। | राजा **एकदा** मृगम् अपश्यत्। |
| बालिकानां कृते **पृथक्** छात्रावासव्यवस्था वर्तते। | सङ्कटे समुत्पन्ने **सहसा** निर्णयः **न** ग्रहीतव्यः। |
| छात्राः कक्ष्यायां **तूष्णीम्** उपविशन्तु। | दुर्जनान् परनिन्दकान् **धिक्**। |
| **पुरा** दशरथः अयोध्यायाः राजा आसीत्। | ग्रामाद् **बहिः** परिव्राजकः निवसति। |
| श्रमं **विना** सफलता **प्रायः** न लभ्यते। | दुर्जनाः **क्वचित्** क्षमाशीलाः भवन्ति। |
| **पुनः पुनः** पठनेन पाठस्य अभ्यासः भवति। | रावणः **चिराय** लङ्कायाम् अवसत्। |
| **यावत्** सूर्यः चन्द्रमा **च** वर्तेते, | **यदि** धूमः अस्ति, |
| **तावत्** संस्कृतभाषा अक्षुण्णा स्थास्यति। | **तर्हि** वह्निः अस्ति। |

☞ उपरि लिखितेषु वाक्येषु स्थूलाक्षराणि पदानि 'अव्ययानि' सन्ति।

## विवरणम्

पुं-स्त्री-नपुंसकेषु त्रिषु लिङ्गेषु, प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमी-प्रभृतिषु सर्वासु विभक्तिषु, एक-द्वि-बहुषु त्रिषु वचनेषु च यत् विकारं न प्राप्नोति (अर्थात् एकप्रकारमेव भवति) तत् 'अव्ययम्' इति नाम्ना अभिहितं भवति।

**स्मरत**

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

### प्रसिद्धानि कानिचित् अव्ययानि

**अधोलिखितानि प्रसिद्धानि अव्ययानि पठत—**

[ अधोलिखित प्रसिद्ध अव्ययों को पढ़ें। Read the following important indeclinables. ]

प्रातः, सायम्, दिवा, नक्तम्, अद्य, ह्यः, श्वः, यत्र, तत्र, यथा, तथा, यदा, तदा, यथाहि, तथाहि, यावत्, तावत्, पुनः, पुरा, प्रायः, मुहुः, चिरम्, युगपत्, मनाक्, ईषत्, उच्चैः, नीचैः, शनैः, सहसा, तूष्णीम्, स्वयम्, वृथा, मिथ्या, मुधा, मिथो, मिथः, आम्, मा, च, वा, एव, एवम्, नूनम्, भूयः, चेत्, क्वचित्, किञ्चित्, हन्त, खलु, किल, अथो, अथ, सुष्ठु, स्म, हे, भोः, अये, समया, निकषा, अन्तरा, अन्तरेण, धिक्, विना, साकम्, सार्धम्, नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट्, ऋते, आरात्, पृथक्, बहिः, नाना, अन्यत्, शम् ।

## कृदन्तानि अव्ययानि

### अधोलिखितानि वाक्यानि पठत–

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

सीता मोदकं **खादित्वा** जलं पिबति।
जननी **स्नात्वा** पाकं करोति।
त्वं **लिखित्वा** प्रेषयसि।
अध्यापकः पाठं **पाठयित्वा** प्रश्नं पृच्छति।
अध्यापकः ग्रन्थम् **अध्याप्य** प्रश्नं पृच्छति।
जननी द्वारम् **उद्घाट्य** अतिथिं सत्करोति।
सन्ध्यां **विधाय** अग्निहोत्रं कुरुत।
छात्राय विद्यां **प्रदाय** गुरुः तुष्यति।
अतिथिः आसन्दे **उपविश्य** जलं पिबति।
बालकः वृक्षम् **आरुह्य** फलानि अवचिनोति।
वयं **नर्तितुम्** इच्छामः।
अहं **पठितुम्** विद्यालयं गच्छामि।
किं सः **गातुम्** शक्नोति।
मूषकः बिलं **प्रवेष्टुम्** शक्नोति।

### कृदन्त-अव्ययप्रकाराः

- क्त्वान्तानि – गत्वा, कृत्वा, दृष्ट्वा इत्यादीनि।
- ल्यबन्तानि – प्रविश्य, निर्गत्य, परीक्ष्य इत्यादीनि।
- तुमुन्नन्तानि – गन्तुम्, कर्तुम्, द्रष्टुम् इत्यादीनि।

**अवधेयम्**

इच्छतेः प्रयोगे, क्रियार्थायां क्रियायां, शक्नोतेः प्रयोगे च 'तुमुन्'–प्रत्ययः भवतीति भवन्तः जानन्ति एव। सर्वाणि अपि तुमुन्नन्तरूपाणि 'अव्ययानि' भवन्ति।

## सर्वनाममूलानि अव्ययानि

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**अत्र** शैत्यं भवति।

**इदानीं** वृष्टिः भवति ।

वटुः **सदा** पठति।

नदीम् **उभयतः** वृक्षाः सन्ति।

राजा **एकदा** मृगम् अपश्यत्।

भवान् **कुत्र** निवसति।

**तत्र** अहं न गतवान्।

**अधोलिखितानि अव्ययानि पठत–**

[ अधोलिखित अव्ययों को पढ़ें। Read the following indeclinables. ]

- अपरत्र, अत्र, अतः
- इदानीम्, इत्थम्
- उभयत्र, उभयथा, उभयतः
- एकदा, एकत्र, एकतः
- किम्, कदा, कुत्र, क्व, कथम्, कुतः
- तत्, तदा, तत्र, तथा, तर्हि
- दक्षिणतः, दक्षिणेन
- परत्र, पूर्वत्र, परतः, पूर्वतः
- यत्, यदा, यत्र, यथा, यतः, यदि
- सदा, सर्वदा, सर्वत्र, सर्वथा, सर्वतः

☞ सर्वनामशब्दानाम् आधारेण निष्पन्नानि कानिचन अव्ययानि उपरिदर्शितानि सन्ति।

## अधोलिखितान् श्लोकान् पठत–

[ अधोलिखित श्लोकों को पढ़ें। Read the following verses. ]

**यदा - तदा**

यदा-यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥

**यथा - तथा**

यथा तानं विना रागः यथा मानं विना नृपः।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥

**यत्र - तत्र**

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥

यत्र-यत्र रघुनाथकीर्तनं तत्र-तत्र कृतमस्तकाञ्जलिम्।
वाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥

**यत् - तत्**

यत् करोषि यदश्नासि युज्जुहोसि ददासि यत्।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥

**यावत् - तावत्**

यावत् वित्तोपार्जनसक्तः तावन्निजपरिवारो रक्तः।
पश्चाद् जीवति जर्जरदेहे वार्त्ता कोऽपि न पृच्छति गेहे ॥

## विवरणम्

सर्वनामशब्देषु 'यत्-तत्', शब्दयोः नित्यः सम्बन्धः भवति। वाक्ये यत्-शब्दस्य प्रयोगे तत्-शब्दस्य प्रयोगः अवश्यं भवति। अतः 'यत्-तत्' इत्येतौ सदा सहैव प्रयोगे समानतया आगच्छतः। **यथा**

| | | |
|---|---|---|
| यदा - तदा, | यथा - तथा, | यत्र - तत्र |
| यत् - तत् | यदि - तर्हि | यावत् - तावत् |

उपरि लिखितेषु पद्येषु उदाहरणानि दर्शितानि सन्ति।

## कालवाचकानि अव्ययानि

**अधोलिखितानि अव्ययानि पठत—**

[ अधोलिखित अव्ययों को पढ़ें। Read th following indeclinables. ]

| अद्य, श्वः, परश्वः, प्रपरश्वः, ह्यः, परह्यः, प्रपरह्यः, सद्यः, अधुना, सम्प्रति, पुरा |
|---|

☞ उपरि लिखितानि अव्ययानि कालं बोधयन्ति। प्रथमदीक्षायां भवन्तः बहुत्र, बहुधा च एतानि अव्ययानि प्रयुक्तवन्तः। अतः एतानि 'अव्ययानि' इति ज्ञात्वा प्रयोगान् कुर्वन्तु। **यथा**

**अद्य** सोमवासरः

**ह्यः** रविवासरः

**श्वः** मङ्गलवासरः

**परह्यः** शनिवासरः

**परश्वः** बुधवासरः

**प्रपरह्यः** शुक्रवासरः

**प्रपरश्वः** गुरुवासरः

## सङ्ख्यावाचकानि अव्ययानि

**अधोलिखितानि अव्ययानि पठत—**

[ अधोलिखित अव्ययों को पढ़ें। Read the following indeclinables. ]

- सकृत्, द्विः, त्रिः, चतुः, पञ्चवारं .......।
- एकधा / ऐकध्यम्, द्विधा / द्वेधा, त्रिधा / त्रेधा, चतुर्धा, पञ्चधा, षोढा, सप्तधा, अष्टधा, नवधा, दशधा.... शतधा, सहस्रधा......।
- एकशः, द्विशः, त्रिशः, चतुश्शः, पञ्चशः,..... शतशः, सहस्रशः .......।

☞ उपरि लिखितानि अव्ययानि सङ्ख्यामूलकानि भवन्ति। तेषां प्रयोगः एवं भवति -

रामः **सकृद्** एव बाणं प्रयुङ्क्ते।

'धर्मः, अर्थः, कामः, मोक्षः' इति पुरुषार्थः **चतुर्धा** भवति।

**शतशः** पठित्वा जडः न अवबुध्यते।

**अधोलिखितानि वाक्यानि पठत–**
[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

| | | |
|---|---|---|
| **अस्तम्** | सूर्यः **अस्तं** याति। | चन्द्रः **अस्तं** गच्छति। |
| **नमः** | श्रीकृष्णाय **नमः**। | शिवाय **नमः**। |
| **स्वस्ति** | तुभ्यं **स्वस्ति**। | युष्मभ्यं **स्वस्ति**। |
| **स्वाहा** | अग्नये **स्वाहा**। | इन्द्राय **स्वाहा**। |
| **स्वधा** | पित्रे **स्वधा**। | पितृभ्यः **स्वधा**। |
| **अलम् (तृतीया)** | **अलं** महीपाल ! तव श्रमेण। | आगतासु विपत्सु चिन्तया **अलम्**। |
| **अलम् (चतुर्थी)** | रामः **अलं** रावणाय। | **अलं** मल्लः मल्लाय। |
| **शम्** | इति **शम्**। | **शं** तनोतु ईश्वरः। |

☞ **उपरि लिखितेषु वाक्येषु स्थूलाक्षराणि पदानि यद्यपि शब्दरूपाणि इव भासन्ते तथापि तानि पदानि 'अव्ययानि' एव सन्ति।**

**अवधेयम्**

''नमः-स्वस्ति-स्वाहा-स्वधा-अलम्-वषट्''– इत्येषाम् (अव्ययानां) योगे चतुर्थी विभक्तिः भवति इति भवन्तः जानन्ति एव।

## विवरणम्

'**स्वाहा**' इति अव्ययं यज्ञ-यागादिषु देवेभ्यः आहुतिदानसमये 'ऋत्विग्भिः' प्रयुज्यते। '**स्वधा**' इति-अव्ययं पितृयज्ञे पितृभ्यः हविर्दानसमये प्रयुज्यते। '**अलम्**' इति अव्ययं 'वारणे' 'शक्तौ' चापि प्रयुज्यते। वारणार्थे 'अलम्' योगे तृतीया विभक्तिः भवति। यथा– अलं श्रमेण, अलं विवादेन, अलम् अतिभाषणेन। शक्त्यर्थे– 'अलम्' प्रयोगे चतुर्थी विभक्तिः भवति। यथा– 'अलं मल्लः मल्लाय'। '**शम्**' इति मङ्गलार्थकम् अव्ययं ग्रन्थलेखनादिसमाप्तौ प्रयुज्यते। यथा– 'इति शम्'।

## अधोलिखितानि अव्ययानि पठत–

[ अधोलिखित अव्ययों को पढ़ें। Read the following indeclinables. ]

अपि, अतीव, अन्तिकम्, अस्तु, इति, इह, इव, इत्थम्, उच्चैः, एव, एवम्, किमपि, खलु, किम्, चेत्, चिरम्, झटिति, मा, धिक्, नूनम्, बत, बाढम्, सहसा, सायं, हि इत्यादीनि अव्ययानि वयं व्यवहारे पश्यामः –

- **किम्** एतस्य अव्ययस्य 'जिज्ञासा, ईषत्, अतिशय' इति अर्थत्रयं वर्तते।
  - किं गतः ?
  - न किमपि अस्य अस्ति,
  - किमपि एषः प्रगल्भेत।

- **मा** एतद् अव्ययम् 'निषेधे' 'वारणे' च प्रयुज्यते।
  - मा ते सङ्गोऽस्त्वकर्मणि (सङ्गः अस्तु अकर्मणि)
  - स्वाध्यायात् मा प्रमदः।
  - मा गृधः कस्यस्विद् धनम्।
  - अरसिकेषु कवित्वनिवेदनं, शिरसि मा लिख मा लिख।
  - मा कुरु धनजनयौवनगर्वम्।

एवम् अन्यानि अव्ययानि वाक्येषु प्रयोक्तव्यानि।

## अव्ययम्

### श्रीकृष्णजन्म



**पुरा** उग्रसेनः नामः कश्चन राजा मथुरायां शासनं करोति **स्म**। तस्य पुत्रः कंसः **अतीव** दुष्ट-प्रकृतिकः नृशंसः च आसीत्। देवकी कंसस्य भगिनी आसीत्। **यथाकालं** तस्याः वसुदेवेन सह विवाहः सम्पन्नः। देवकी **यदा** पतिगृहं गच्छन्ती आसीत् **तदा** कंसः उत्साहवशात् तस्याः रथं **स्वयं** चालयति स्म। एतस्मिन् अवसरे **काचित्** आकाशवाणी अभवत्– "**भो** कंस ! त्वं यस्याः रथं सहर्षं चालयसि तस्याः **एव** अष्टमः पुत्रः तव प्राणान् हरिष्यति" **इति**। एतत् श्रुत्वा तस्य मनसि महान् क्रोधः आगतः। सः **झटिति** एव रथं स्थगितवान्। अनन्तरं सः वसुदेवं देवकीं **च** कारागाहे न्यक्षिपत्।

**तत्र** कारागारे **एव** क्रमशः देवक्याः सप्त पुत्राः अभवन्। मृत्योः भीतः कंसः तान् सर्वान् अहन्। अन्ते कृष्णः **अपि** तस्मिन् कारागारे जन्म अलभत। श्रीकृष्णस्य जन्म **नक्तम् एव** अभवत्। तदानीं भाद्रपदमासस्य कृष्ण-पक्षस्य अष्टमी तिथिः आसीत्। भगवतः मायया तत्रत्याः सर्वे द्वारपालाः परिचारकाश्च स्व-स्वस्थाने निद्रामग्नाः अभवन्।



**अतः** कृष्णस्य पिता वसुदेवः शिशुं श्रीकृष्णं कण्डोले **निधाय** यमुनानद्याः अपरपार्श्वं गोकुलम् अनयत्। **तदानीम् एव तत्र** नन्दस्य पत्नी यशोदा पुत्रीं प्रसूतवती। रहसि वसुदेवः श्रीकृष्णं तत्र **स्थापयित्वा** नन्दस्य पुत्रीं **च आदाय** मथुरां प्रत्यागच्छत्। **यावत्** वसुदेवः तां कन्यां देवक्यै समर्पयत् **तावत्** सा रोदितुं प्रारभत। तस्याः क्रन्दनरवं श्रुत्वा सर्वे परिचारकाः ये यत्र सुप्ताः आसन्, निद्रातः जागरिताः अभवन्। ते च अचिरेण एतद् विषये कंसाय सूचनां दत्तवन्तः। कंसः क्षणेन कारागारं प्राप्नोत्। **अथ** देवकी कंसं

न्यवेदयत्– ''भ्रातः ! अयं पुत्रः **न, अपि तु** कन्या **एव** वर्तते। इयं **कदापि** तव शत्रुः भवितुं **न** अर्हति। अतः एनां **मा** मारय'' इति। **परन्तु** दुष्टः कंसः देवक्याः एकम् **अपि** वचनं **न** अशृणोत्। सः ताम् **अपि** कन्यां **हन्तुम्** उद्युक्तवान्। **वस्तुतः** सा कन्या आदिशक्तिः **एव** आसीत्। **अतः त्वरितमेव** आकाशं **प्राप्य उच्चैः** हसन्ती सा अवदत्– ''मूर्ख कंस ! **अलं** तव अत्याचारेण, **अद्य** तव मारयिता गोकुले वर्द्धते'' इति। एतत् श्रुत्वा कंसस्य शिरोघूर्णनम् अभवत्। तस्य चिन्ता **पुनः** द्विगुणिता जाता।

◆◆◆

## अभ्यासः — 139

**1. पाठस्य आधारेण उत्तरं लिखत–**

[ पाठ के आधार पर उत्तर लिखें। Answer the questions on the basis of the lesson.]

(i) कंसः कस्य पुत्रः आसीत् ? ।

(ii) देवक्याः भ्राता कः आसीत् ? ।

(iii) कंसः कौ कारागारे न्यक्षिपत् ? ।

(iv) कृष्णस्य जन्म कदा कुत्र च अभवत् ? ।

(v) वसुदेवः काम् आदाय मथुरां प्रत्यागच्छत् ? ।

**2. कः कम् अवदत् –**

[ कौन किससे बोला। Who said to whom. ]

(i) त्वं यस्याः रथं सहर्षं चालयसि तस्याः एव अष्टमपुत्रः तव प्राणान् हरिष्यति।

।

(ii) मूर्ख ! अलं तव अत्याचारेण।

।

**3. सर्वनाममूलानि अव्ययपदानि लिखत–**

[ 'सर्वनाममूलक' अव्यय पदों को लिखें। Write the indeclinables derived from pronoun word. ]

| | | | |
|---|---|---|---|
| (i) किम् | **कदा**........ | (ii) यत् | |
| (iii) तत् | | (iv) सर्व | |
| (v) अन्य | | | |

**4. अव्ययेतरपदानि वलयेन वेष्टयत–**

[अव्येतर पदों को गोला करें। Round the words which are not indeclinables. ]

| | | | | |
|---|---|---|---|---|
| तत्र | क्वचित् | इदम् | इदानीम् | उभयत्र |
| एतस्य | रात्रौ | तदानीम् | मदीयः | कुत्र |

**5. उचितं योजयत–**

[ उचित से जोडें। Match with the appropriate. ]

| | क. | | ख. |
|---|---|---|---|
| (i) | आदाय | (क) | क्त्वान्तम् अव्ययम् |
| (ii) | गन्तुम् | (ख) | सामान्यम् अव्ययम् |
| (iii) | हत्वा | (ग) | तद्धितान्तम् अव्ययम् |
| (iv) | च | (घ) | तुमुन्नन्तम् अव्ययम् |
| (v) | अन्यथा | (ङ) | ल्यबन्तम् अव्ययम् |

**6. उदाहरणानुगुणं रिक्तस्थानं पूरयत–**

[ उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as done in the example. ]

| | | | | |
|---|---|---|---|---|
| (i) | कुत्र | **कुत्रत्यम्** | (ii) | अत्र |
| (iii) | यत्र | | (iv) | तत्र |

**7. अव्ययार्थनिरूपकं श्लोकं पूरयत–**

[ अव्ययार्थनिरूपक श्लोक को पूरा करें। Complete the verse which defines indeclinables. ]

(i) सदृशं त्रिषु लिङ्गेषु ............ ।
............ यन्न व्येति तदव्ययम् ॥

**8. अर्थः समीचीनः नास्ति चेत् ( x ) कुरुत। अन्यथा ( ✓ ) कुरुत–**

[ अर्थ सही नहीं तो ( x ) चिह्न लगाएं, अन्यथा ( ✓ ) चिह्न लगाएं। Mark the corss (x) if the meaning is not correct, otherwise mark with the tick ( ✓ ). ]

| | | | |
|---|---|---|---|
| (i) | साम्प्रतम् | इदानीम् | ✓ |
| (ii) | अधुना | तदानीम् | |
| (iii) | श्वः | परस्मिन् दिवसे | |
| (iv) | अद्य | पूर्वस्मिन् दिवसे | |
| (v) | नक्तम् | दिवसे | |
| (vi) | मा | न | |

**9. मञ्जूषायां प्रदत्तानि अव्ययानि यथाविभागं लिखत–**

[ मञ्जूषा में प्रदत्त अव्यय को यथाविभाग लिखें। Write the indeclinables given in the box in appropriate category. ]

| सामान्याव्ययानि | क्त्वान्त/ल्यबन्ताव्ययानि | तुमुन्नन्ताव्ययानि |
|---|---|---|
| (i) | (i) | (i) |
| (ii) | (ii) | (ii) |
| (iii) | (iii) | (iii) |
| (iv) | (iv) | (iv) |
| (v) | (v) | (v) |

झटिति, रोदितुम्, आदाय, भवितुम्, स्वयम्, नक्तम्, निधाय, श्रुत्वा, स्थापयितुम्, उच्चैः, त्वरितम्, स्थापयित्वा

**10. अधोनिर्दिष्टानि वाक्यानि उदाहरणानुसारं संशोधयत–**

[ अधोनिर्दिष्ट वाक्यों को उदाहरणानुसार संशोधन करें। Correct the following sentences as done in the example. ]

उदा. अत्याचारः अलम्। ......**अत्याचारेण**...... ......**अलम्**...... ।

(i) अतिकथनम् अलम्। ।

(ii) दूरगमनम् अलम्। ।

(iii) परिवेषणम् अलम्। ।

(iv) इतोऽप्यधिकलेखनम् अलम्। ।

(v) विस्तरः अलम्। ।

**सुभाषितेषु अव्ययप्रयोगाः**

# सुभाषितानि

यावच्च येन च यथा च यदा च यच्च,
यस्माच्च यत्र च शुभाशुभमात्मकर्म ।
तावच्च तेन च तथा च तदा च तच्च
तस्माच्च तत्र च कृतान्तवशादुपैति ॥

दिवा पश्यति नोलूकः काको नक्तं न पश्यति ।
अपूर्वः कोऽपि कामान्धो दिवा नक्तं न पश्यति ॥

यतो यतः समीहसे ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्यः अभयं नः पशुभ्यः ॥

सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम् ।
नान्तरा भोजनं कुर्याद् अग्निहोत्रसमो विधिः ॥

एकतः क्रतवः सर्वे सहस्रवरदक्षिणाः ।
अन्यतो रोगभीतानां प्राणिनां प्राणरक्षणम् ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

सकृत् जल्पन्ति राजानः सकृत् जल्पन्ति पण्डिताः ।
सकृत् कन्याः प्रदीयन्ते त्रीण्येतानि सकृत् सकृत् ॥

अहो बत विचित्राणि चरितानि महात्मनाम् ।
लक्ष्मीं तृणाय मन्यन्ते तद्भारेण नमन्ति च ॥

यावत् स्वस्थो ह्ययं देहो यावन्मृत्युश्च दूरतः ।
तावदात्महितं कुर्यात् प्राणान्ते किं करिष्यति ॥

स्पृष्ट्वा श्रुत्वा च भुक्त्वा च घ्रात्वा पीत्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥

उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥

सुखार्थी चेत् त्यजेद् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥

यतः कृष्णस्ततो धर्मः यतो धर्मस्ततो जयः ।

◆◆◆

**कथायाम् अव्ययप्रयोगाः**

## नीलवर्णः शृगालः

एकदा कश्चित् शृगालः वनात् आगत्य नगरं निकषा भ्रमन् आसीत्। तत्र भ्रमन् सः कस्यचन रजकस्य नीलभाण्डे अपतत्। सः ततः निर्गन्तुं न अशक्नोत्। परेद्युः यदा रजकः आगतवान् तदा सः मृतः इव अभिनयम् अकरोत्। रजकः तं मृतं मत्त्वा तस्मात् भाण्डात् निष्कास्य नगराद् बहिः दूरे न्यक्षिपत्। रजकस्य प्रत्यावर्तनात् परं शृगालः धावित्वा ततः दूरं गतवान्। वनं गत्वा स्वकीयं नीलवर्णम् अवलोक्य सः अचिन्तयत्– 'अहम् इदानीम् उत्तमवर्णः अस्मि, तर्हि अहं स्वकीयम् उत्कर्षं किं न साधयामि'। एवं विचिन्त्य सः सर्वान् स्वजाति-भ्रातॄन् आहूय अवदत्– "अहं भगवत्या वनदेवतया अरण्यराज्ये स्वहस्तेन सर्वौषधिरसेन अभिषिक्तः अस्मि। अतः अद्य प्रभृति



अरण्ये मम आज्ञया सर्वविधः व्यवहारः कार्यः" इति। एतत् श्रुत्वा तस्य शृगालस्य विशिष्टं वर्णं च दृष्ट्वा ते शृगालाः साष्टाङ्गं प्रणम्य अवदन्– 'देव ! भवान् यथा आज्ञापयति तथैव करिष्यामः। वयं सर्वे भवतः दासाः स्मः। अस्माकं कृते यथा भवतः आदेशः भविष्यति तथा वयम् आचरिष्यामः'।

एवं सः शृगालः सर्वेषु अरण्यवासिषु आधिपत्यं प्रतिष्ठापितवान्। ततः सः सिंहव्याघ्रादीन् स्वानुचररूपेण प्राप्य सजातीयेषु शृगालेषु उपवेष्टुं लज्जाम् अनुभूतवान्। अत एव सः क्रमशः स्वजातीयान् शृगालान् दूरीकृतवान्। एतेन शृगालाः भृशं खेदम् अनुभूतवन्तः। तान् खिन्नान् दृष्ट्वा एकः वृद्धः शृगालः प्रतिज्ञातवान्– "अहम् अवश्यम् एतस्य रहस्यम् उद्घाट्य एनम् अधिकारच्युतं कारयिष्ये। तदर्थं भवन्तः उपायान् चिन्तयन्तु। अहम् अपि चिन्तयन्नस्मि।"



ततः शृगालेषु एकः अवदत्- 'अद्य वयं सायं युगपदेव महारावं करिष्यामः। तत् शब्दम् आकर्ण्य जातिस्वभावात् सः अपि शब्दं करिष्यति। यतो हि–

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।
श्वा यदि क्रियते राजा सः किं नाश्नात्युपानहम् ॥'

ततः सर्वे शृगालाः सायङ्काले स्वयोजनानुसारं महारावं कृतवन्तः। स्वजातिस्वभावात् च सः नीलवर्णः शृगालः अपि आत्मानं रोद्धुं न अशक्नोत्। सः अपि तथैव शब्दं कृतवान्। तस्मात् शब्दात् तं शृगालम् अभिज्ञाय व्याघ्रः तं व्यापादितवान्।

◆◆◆

# तृतीयः स्तबकः

## 3.3 तृतीयः पाठः

## [ सप्त विभक्तयः ]

**एतानि रूपाणि स्मरत—**

[ इन रूपों का स्मरण करें। Remember the declension. ]

**अजन्तशब्दानां पुंलिङ्गरूपाणि**

**अकारान्तः (बालक)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | बालकः | बालकौ | बालकाः |
| द्विती. | बालकम् | बालकौ | बालकान् |
| तृ. | बालकेन | बालकाभ्याम् | बालकैः |
| च. | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| प. | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| ष. | बालकस्य | बालकयोः | बालकानाम् |
| स. | बालके | बालकयोः | बालकेषु |
| सम्बो. | हे बालक ! | हे बालकौ ! | हे बालकाः ! |

**ऋकारान्तः (कर्तृ)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | कर्ता | कर्तारौ | कर्तारः |
| द्विती. | कर्तारम् | कर्तारौ | कर्तॄन् |
| तृ. | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| च. | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| प. | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| ष. | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| स. | कर्तरि | कर्त्रोः | कर्तृषु |
| सम्बो. | कर्तः ! | कर्तारौ ! | कर्तारः ! |

**इकारान्तः (कवि)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | कविः | कवी | कवयः |
| द्विती. | कविम् | कवी | कवीन् |
| तृ. | कविना | कविभ्याम् | कविभिः |
| च. | कवये | कविभ्याम् | कविभ्यः |
| प. | कवेः | कविभ्याम् | कविभ्यः |
| ष. | कवेः | कव्योः | कवीनाम् |
| स. | कवौ | कव्योः | कविषु |
| सम्बो. | कवे ! | कवी ! | कवयः ! |

**उकारान्तः (शिशु)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | शिशु | शिशू | शिशवः |
| द्विती. | शिशुम् | शिशू | शिशून् |
| तृ. | शिशुना | शिशुभ्याम् | शिशुभिः |
| च. | शिशवे | शिशुभ्याम् | शिशुभ्यः |
| प. | शिशोः | शिशुभ्याम् | शिशुभ्यः |
| ष. | शिशोः | शिश्वोः | शिशूनाम् |
| स. | शिशौ | शिश्वोः | शिशुषु |
| सम्बो. | शिशो ! | शिशू ! | शिशवः ! |

### ऋकारान्तः (पितृ)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | पिता | पितरौ | पितरः |
| **द्विती.** | पितरम् | पितरौ | पितॄन् |
| **तृ.** | पित्रा | पितृभ्याम् | पितृभिः |
| **च.** | पित्रे | पितृभ्याम् | पितृभ्यः |
| **प.** | पितुः | पितृभ्याम् | पितृभ्यः |
| **ष.** | पितुः | पित्रोः | पितॄणाम् |
| **स.** | पितरि | पित्रोः | पितृषु |
| **सम्बो.** | पितः ! | पितरौ ! | पितरः ! |

### ओकारान्तः (गौ)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | गौः | गावौ | गावः |
| **द्विती.** | गाम् | गावौ | गाः |
| **तृ.** | गवा | गोभ्याम् | गोभिः |
| **च.** | गवे | गोभ्याम् | गोभ्यः |
| **प.** | गोः | गोभ्याम् | गोभ्यः |
| **ष.** | गोः | गवोः | गवाम् |
| **स.** | गवि | गवोः | गोषु |
| **सम्बो.** | गौः ! | गावौ ! | गावः ! |

### इकारान्तः (मति)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | मतिः | मती | मतयः |
| **द्विती.** | मतिम् | मती | मतीः |
| **तृ.** | मत्या | मतिभ्याम् | मतिभिः |
| **च.** | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| **प.** | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| **ष.** | मत्याः/मतेः | मत्योः | मतीनाम् |
| **स.** | मत्याम्/मतौ | मत्योः | मतिषु |
| **सम्बो.** | मते ! | मती ! | मतयः ! |

## अजन्तशब्दानां स्त्रीलिङ्गरूपाणि

### ईकारान्तः (नदी)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | नदी | नद्यौ | नद्यः |
| **द्विती.** | नदीम् | नद्यौ | नदीः |
| **तृ.** | नद्या | नदीभ्याम् | नदीभिः |
| **च.** | नद्यै | नदीभ्याम् | नदीभ्यः |
| **प.** | नद्याः | नदीभ्याम् | नदीभ्यः |
| **ष.** | नद्याः | नद्योः | नदीनाम् |
| **स.** | नद्याम् | नद्योः | नदीषु |
| **सम्बो.** | नदि ! | नद्यौ ! | नद्यः ! |

### उकारान्तः (धेनु)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | धेनुः | धेनू | धेनवः |
| द्विती. | धेनुम् | धेनू | धेनूः |
| तृ. | धेन्वा | धेनुभ्याम् | धेनुभिः |
| च. | धेनवे/धेन्वै | धेनुभ्याम् | धेनुभ्यः |
| प. | धेनोः/धेन्वाः | धेनुभ्याम् | धेनुभ्यः |
| ष. | धेनोः/धेन्वाः | धेन्वोः | धेनुनाम् |
| स. | धेनौ/धेन्वाम् | धेन्वोः | धेनुषु |
| सम्बो. | धेनो ! | धेनू ! | धेनवः ! |

### ऊकारान्तः (वधू)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | वधूः | वध्वौ | वध्वः |
| द्विती. | वधूम् | वध्वौ | वधूः |
| तृ. | वध्वा | वधूभ्याम् | वधूभिः |
| च. | वध्वै | वधूभ्याम् | वधूभ्यः |
| प. | वध्वाः | वधूभ्याम् | वधूभ्यः |
| ष. | वध्वाः | वध्वोः | वधूनाम् |
| स. | वध्वाम् | वध्वोः | वधूषु |
| सम्बो. | वधु ! | वध्वौ ! | वध्वः ! |

### ऋकारान्तः (स्वसृ)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | स्वसा | स्वसारौ | स्वसारः |
| द्विती. | स्वसारम् | स्वसारौ | स्वसॄः |
| तृ. | स्वस्रा | स्वसृभ्याम् | स्वसृभिः |
| च. | स्वस्रे | स्वसृभ्याम् | स्वसृभ्यः |
| प. | स्वसुः | स्वसृभ्याम् | स्वसृभ्यः |
| ष. | स्वसुः | स्वस्रोः | स्वसृणाम् |
| स. | स्वसरि | स्वस्रोः | स्वसृषु |
| सम्बो. | स्वसः ! | स्वसारौ ! | स्वसारः ! |

### ऋकारान्तः (मातृ)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | माता | मातरौ | मातरः |
| द्विती. | मातरम् | मातरौ | मातॄः |
| तृ. | मात्रा | मातृभ्याम् | मातृभिः |
| च. | मात्रे | मातृभ्याम् | मातृभ्यः |
| प. | मातुः | मातृभ्याम् | मातृभ्यः |
| ष. | मातुः | मात्रोः | मातृणाम् |
| स. | मातरि | मात्रोः | मातृषु |
| सम्बो. | मातः ! | मातरौ ! | मातरः ! |

## अजन्तशब्दानां नपुंसकलिङ्गरूपाणि

### अकारान्तः (फल)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | फलम् | फले | फलानि |
| **द्विती.** | फलम् | फले | फलानि |
| **तृ.** | फलेन | फलाभ्याम् | फलैः |
| **च.** | फलाय | फलाभ्याम् | फलेभ्यः |
| **प.** | फलात् | फलाभ्याम् | फलेभ्यः |
| **ष.** | फलस्य | फलयोः | फलानाम् |
| **स.** | फले | फलयोः | फलेषु |
| **सम्बो.** | फल ! | फले ! | फलानि ! |

### इकारान्तः (वारि)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | वारि | वारिणी | वारीणि |
| **द्विती.** | वारि | वारिणी | वारीणि |
| **तृ.** | वारिणा | वारिभ्याम् | वारिभिः |
| **च.** | वारिणे | वारिभ्याम् | वारिभ्यः |
| **प.** | वारिणः | वारिभ्याम् | वारिभ्यः |
| **ष.** | वारिणः | वारिणोः | वारीणाम् |
| **स.** | वारिणि | वारिणोः | वारिषु |
| **सम्बो.** | वारि/वारे ! | वारिणी ! | वारीणि ! |

### इकारान्तः (दधि)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | दधि | दधिनी | दधीनि |
| **द्विती.** | दधि | दधिनी | दधीनि |
| **तृ.** | दध्ना | दधिभ्याम् | दधिभिः |
| **च.** | दध्ने | दधिभ्याम् | दधिभ्यः |
| **प.** | दध्नः | दधिभ्याम् | दधिभ्यः |
| **ष.** | दध्नः | दध्नोः | दध्नाम् |
| **स.** | दध्नि/दधनि | दध्नोः | दधिषु |
| **सम्बो.** | दधि/दधे ! | दधिनी ! | दधीनि ! |

### उकारान्तः (मधु)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | मधु | मधुनी | मधूनि |
| **द्विती.** | मधु | मधुनी | मधूनि |
| **तृ.** | मधुना | मधुभ्याम् | मधुभिः |
| **च.** | मधुने | मधुभ्याम् | मधुभ्यः |
| **प.** | मधुनः | मधुभ्याम् | मधुभ्यः |
| **ष.** | मधुनः | मधुनोः | मधूनाम् |
| **स.** | मधुनि | मधुनोः | मधुषु |
| **सम्बो.** | मधु/मधो ! | मधुनी ! | मधूनि ! |

## हलन्तशब्दानां पुंलिङ्गरूपाणि

### जकारान्तः (वणिज्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | वणिक्-ग् | वणिजौ | वणिजः |
| **द्विती.** | वणिजम् | वणिजौ | वणिजः |
| **तृ.** | वणिजा | वणिग्भ्याम् | वणिग्भिः |
| **च.** | वणिजे | वणिग्भ्याम् | वणिग्भ्यः |
| **प.** | वणिजः | वणिग्भ्याम् | वणिग्भ्यः |
| **ष.** | वणिजः | वणिजोः | वणिजाम् |
| **स.** | वणिजि | वणिजोः | वणिक्षु |
| **सम्बो.** | वणिक्-ग् ! | वणिजौ ! | वणिजः ! |

### तकारान्तः (मरुत्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | मरुत् | मरुतौ | मरुतः |
| **द्विती.** | मरुतम् | मरुतौ | मरुतः |
| **तृ.** | मरुता | मरुद्भ्याम् | मरुद्भिः |
| **च.** | मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| **प.** | मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| **ष.** | मरुतः | मरुतोः | मरुताम् |
| **स.** | मरुति | मरुतोः | मरुत्सु |
| **सम्बो.** | मरुत्/द् ! | मरुतौ ! | मरुतः ! |

### दकारान्तः (सुहृद्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | सुहृद्-त् | सुहृदौ | सुहृदः |
| **द्विती.** | सुहृदम् | सुहृदौ | सुहृदः |
| **तृ.** | सुहृदा | सुहृद्भ्याम् | सुहृद्भिः |
| **च.** | सुहृदे | सुहृद्भ्याम् | सुहृद्भ्यः |
| **प.** | सुहृदः | सुहृद्भ्याम् | सुहृद्भ्यः |
| **ष.** | सुहृदः | सुहृदोः | सुहृदाम् |
| **स.** | सुहृदि | सुहृदोः | सुहृत्सु |
| **सम्बो.** | सुहृत्/द् ! | सुहृदौ ! | सुहृदः ! |

### तकारान्तः (भवत्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | भवान् | भवन्तौ | भवन्तः |
| **द्विती.** | भवन्तम् | भवन्तौ | भवतः |
| **तृ.** | भवता | भवद्भ्याम् | भवद्भिः |
| **च.** | भवते | भवद्भ्याम् | भवद्भ्यः |
| **प.** | भवतः | भवद्भ्याम् | भवद्भ्यः |
| **ष.** | भवतः | भवतोः | भवताम् |
| **स.** | भवति | भवतोः | भवत्सु |

**नकारान्तः(आत्मन्)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | आत्मा | आत्मानौ | आत्मानः |
| द्विती. | आत्मानम् | आत्मानौ | आत्मनः |
| तृ. | आत्मना | आत्मभ्याम् | आत्मभिः |
| च. | आत्मने | आत्मभ्याम् | आत्मभ्यः |
| प. | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| ष. | आत्मनः | आत्मनोः | आत्मनाम् |
| स. | आत्मनि | आत्मनोः | आत्मसु |
| सम्बो. | आत्मन् ! | आत्मानौ | आत्मानः |

**नकारान्तः (गुणिन्)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | गुणी | गुणिनौ | गुणिनः |
| द्विती. | गुणिनम् | गुणिनौ | गुणिनः |
| तृ. | गुणिना | गुणिभ्याम् | गुणिभिः |
| च. | गुणिने | गुणिभ्याम् | गुणिभ्यः |
| प. | गुणिनः | गुणिभ्याम् | गुणिभ्यः |
| ष. | गुणिनः | गुणिनोः | गुणिनाम् |
| स. | गुणिनि | गुणिनोः | गुणिषु |
| सम्बो. | गुणिन् ! | गुणिनौ ! | गुणिनः ! |

**नकारान्तः (राजन्)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | राजा | राजानौ | राजानः |
| द्विती. | राजानम् | राजानौ | राज्ञः |
| तृ. | राज्ञा | राजभ्याम् | राजभिः |
| च. | राज्ञे | राजभ्याम् | राजभ्यः |
| प. | राज्ञः | राजभ्याम् | राजभ्यः |
| ष. | राज्ञः | राज्ञोः | राज्ञाम् |
| स. | राज्ञि/राजनि | राज्ञोः | राजसु |
| सम्बो. | राजन् ! | राजानौ ! | राजानः ! |

**सकारान्तः (विद्वस्)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | विद्वान् | विद्वांसौ | विद्वांसः |
| द्विती. | विद्वांसम् | विद्वांसौ | विदुषः |
| तृ. | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| च. | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| प. | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| ष. | विदुषः | विदुषोः | विदुषाम् |
| स. | विदुषि | विदुषोः | विद्वत्सु |
| सम्बो. | विद्वन् ! | विद्वांसौ ! | विद्वांसः ! |

## हलन्तशब्दानां स्त्रीलिङ्गरूपाणि

### चकारान्तः (वाच्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | वाक्/वाग् | वाचौ | वाचः |
| **द्विती.** | वाचम् | वाचौ | वाचः |
| **तृ.** | वाचा | वाग्भ्याम् | वाग्भिः |
| **च.** | वाचे | वाग्भ्याम् | वाग्भ्यः |
| **प.** | वाचः | वाग्भ्याम् | वाग्भ्यः |
| **ष.** | वाचः | वाचोः | वाचाम् |
| **स.** | वाचि | वाचोः | वाक्षु |
| **सम्बो.** | वाक् / ग् ! | वाचौ ! | वाचः ! |

### जकारान्तः (स्रज्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | स्रक्-ग् | स्रजौ | स्रजः |
| **द्विती.** | स्रजम् | स्रजौ | स्रजः |
| **तृ.** | स्रजा | स्रग्भ्याम् | स्रग्भ्यः |
| **च.** | स्रजे | स्रग्भ्याम् | स्रग्भ्यः |
| **प.** | स्रजः | स्रग्भ्याम् | स्रजाम् |
| **ष.** | स्रजः | स्रजोः | स्रजाम् |
| **स.** | स्रजि | स्रजोः | स्रक्षु |
| **सम्बो.** | स्रक्-ग् | स्रजौ ! | स्रजः ! |

### तकारान्तः (सरित्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | सरित् | सरितौ | सरितः |
| **द्विती.** | सरितम् | सरितौ | सरितः |
| **तृ.** | सरिता | सरिद्भ्याम् | सरिद्भिः |
| **च.** | सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| **प.** | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| **ष.** | सरितः | सरितोः | सरिताम् |
| **स.** | सरिति | सरितोः | सरित्सु |
| **सम्बो.** | सरित् ! | सरितौ ! | सरितः ! |

### शकारान्तः (दिश्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | दिक्/ग् | दिशौ | दिशः |
| **द्विती.** | दिशम् | दिशौ | दिशः |
| **तृ.** | दिशा | दिग्भ्याम् | दिग्भिः |
| **च.** | दिशे | दिग्भ्याम् | दिग्भ्यः |
| **प.** | दिशः | दिग्भ्याम् | दिग्भ्यः |
| **ष.** | दिशः | दिशोः | दिशाम् |
| **स.** | दिशि | दिशोः | दिक्षु |
| **सम्बो.** | दिक्-ग् ! | दिशौ | दिशः |

### षकारान्तः (आशिष्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | आशीः | आशिषौ | आशिषः |
| द्विती. | आशिषम् | आशिषौ | आशिषः |
| तृ. | आशिषा | आशीर्भ्याम् | आशीर्भिः |
| च. | आशिषे | आशीर्भ्याम् | आशीर्भ्यः |
| प. | आशिषः | आशीर्भ्याम् | आशीर्भ्यः |
| ष. | आशिषः | आशिषोः | आशिषाम् |
| स. | आशिषि | आशिषोः | आशिष्षु/आशीःषु |
| सम्बो. | आशीः ! | आशिषौ ! | आशिषः ! |

### सकारान्तः (अप्सरस्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | अप्सराः | अप्सरसौ | अप्सरसः |
| द्विती. | अप्सरसम् | अप्सरसौ | अप्सरसः |
| तृ. | अप्सरसा | अप्सरोभ्याम् | अप्सरोभिः |
| च. | अप्सरसे | अप्सरोभ्याम् | अप्सरोभ्यः |
| प. | अप्सरसः | अप्सरोभ्याम् | अपसरोभ्यः |
| ष. | अप्सरसः | अप्सरसोः | अप्सरसाम् |
| स. | अप्सरसि | अप्सरसोः | अप्सरःसु |
| सम्बो. | अप्सराः ! | अप्सरसौ ! | अप्सरसः ! |

## हलन्तशब्दानां नपुंसकलिङ्गरूपाणि

### तकारान्तः (जगत्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | जगत् | जगती | जगन्ति |
| द्विती. | जगत् | जगती | जगन्ति |
| तृ. | जगता | जगद्भ्याम् | जगद्भिः |
| च. | जगते | जगद्भ्याम् | जगद्भ्यः |
| प. | जगतः | जगद्भ्याम् | जगद्भ्यः |
| ष. | जगतः | जगतोः | जगताम् |
| स. | जगति | जगतोः | जगत्सु |
| सम्बो. | जगत् ! | जगती ! | जगन्ति ! |

### नकारान्तः (कर्मन्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | कर्म | कर्मणी | कर्माणि |
| द्विती. | कर्म | कर्मणी | कर्माणि |
| तृ. | कर्मणा | कर्मभ्याम् | कर्मभिः |
| च. | कर्मणे | कर्मभ्याम् | कर्मभ्यः |
| प. | कर्मणः | कर्मभ्याम् | कर्मभ्यः |
| ष. | कर्मणः | कर्मणोः | कर्मणाम् |
| स. | कर्मणि | कर्मणोः | कर्मसु |
| सम्बो. | कर्मन् ! | कर्मणी ! | कर्माणि ! |

## षकारान्तः (धनुष्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | धनुः | धनुषी | धनूंषि |
| **द्विती.** | धनुः | धनुषी | धनूंषि |
| **तृ.** | धनुषा | धनुर्भ्याम् | धनुर्भिः |
| **च.** | धनुषे | धनुर्भ्याम् | धनुर्भ्यः |
| **प.** | धनुषः | धनुर्भ्याम् | धनुर्भ्यः |
| **ष.** | धनुषः | धनुषोः | धनुषाम् |
| **स.** | धनुषि | धनुषोः | धनुष्षु/धनुःषु |
| **सम्बो.** | धनुः ! | धनुषी ! | धनूंषि ! |

## सकारान्तः (मनस्)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र.** | मनः | मनसी | मनांसि |
| **द्विती.** | मनः | मनसी | मनांसि |
| **तृ.** | मनसा | मनोभ्याम् | मनोभिः |
| **च.** | मनसे | मनोभ्याम् | मनोभ्यः |
| **प.** | मनसः | मनोभ्याम् | मनोभ्यः |
| **ष.** | मनसः | मनसोः | मनसाम् |
| **स.** | मनसि | मनसोः | मनःसु |
| **सम्बो.** | मनः ! | मनसी ! | मनांसि ! |

📖 **अधोलिखितान् नियमान् पठत—**

[ इन रूपों का पढ़ें। Read this rules. ]

**द्वितीया-नियमाः**

☞ **कर्मवाचकात् शब्दात् द्वितीया भवति।**

**यथा** ⇨ वृद्धः **रामायणं** पठति।

⇨ लेखकः **ग्रन्थं** लिखति।

⇨ रञ्जना **पाठशालां** गच्छति।

**विवरणम्**

अत्र प्रथमोदाहरणे रामायणम् इति कर्म अस्ति। अतः द्वितीया भवति। एवम् एव द्वितीयोदाहरणे 'ग्रन्थम्' इति कर्म अस्ति, अतः 'ग्रन्थम्' इत्यत्र द्वितीया भवति। एवं तृतीयोदाहरणे 'पाठशालाम्' इति कर्म अस्ति। अतः 'पाठशालाम्' इत्यत्र द्वितीया भवति।

☞ **'दुह्, याच्, दण्ड्, प्रच्छ, चि, नी, वह' इत्यादयः द्विकर्मकाः धातवः सन्ति। अतः एतेषां धातूनां प्रयोगे द्वे कर्मणी भवतः। एतेषां द्विकर्मकाणां धातूनां प्रयोगे द्वाभ्याम् अपि कर्मवाचकशब्दाभ्यां द्वितीया भवति। एवमेव अन्येषाम् अपि द्विकर्मकाणां प्रयोगे द्वितीया भवति।**

**यथा** ⇨ गोपालः **गां दुग्धं** दोग्धि।

⇨ चोरः **आरक्षिबलं क्षमां** याचते।

⇨ मन्त्रिणः **प्रधानमन्त्रिणं वृत्तान्तं** भाषन्ते।

⇨ माता **पुत्रं कुशलं** पृच्छति।

⇨ भृत्यः **बालम् उद्यानं** नयति।

⇨ अधिकरणिकः **चौरं शतं** दण्डयति।

⇨ चन्द्रकान्ता **लतां पुष्पाणि** चिनोति।

⇨ श्रमिकः **ग्रामं भारं** वहति।

☞ **'अभितः, परितः, उभयतः, धिक्, विना, अधितिष्ठति' इत्येतेषां योगे द्वितीया भवति।**

**यथा** ⇨ मार्गम् **अभितः** वृक्षाः सन्ति।

⇨ **कुम्भकारं परितः** घटाः सन्ति।

⇨ **गुरुम् उभयतः** शिष्याः सन्ति।

⇨ **परपीडकं** धिक्।

⇨ **मित्रं विना** यात्रा क्लेशकरी भवति।

⇨ प्राचार्यः **कार्यालयम् अधितिष्ठति**।

## तृतीया-नियमाः

☞ **उत्कृष्टसाधकवाचकात् तृतीया—**

**यथा** ⇨ छात्रः **लेखन्या** लिखति।

⇨ बालकाः **कन्दुकेन** क्रीडन्ति।

⇨ माता **घटेन** जलम् आनयति।

☞ **'सह'-योगे तृतीया—**

**यथा** ⇨ सीता **रामेण** सह वनं गतवती।

⇨ **जगन्नाथेन बलभद्रेण** च सह सुभद्रा विराजते।

⇨ **संस्कृतेन** सह भारोपीय-भाषाणां सम्बन्धः अस्ति।

☞ ***'विना'-योगे तृतीया—**

**यथा** ⇨ **शर्करया विना** चायः न रुचिकरः।

⇨ **धनेन विना** जीवनं कष्टकरम्।

⇨ **विद्यया विना** जीवनं वृथा।

* ***टिप्पणी*** **- विना-योगे द्वितीया पञ्चमी च भवतः।**

## चतुर्थी-नियमाः

☞ **यम् उद्दिश्य दानं दीयते तद्वाचकात् चतुर्थी भवति।**

**यथा** ⇨ माता **भिक्षुकाय** अन्नं ददाति।

☞ **'रोचते' इति क्रियापदस्य प्रयोगे यस्मै रोचते तस्मात् चतुर्थी भवति।**

**यथा** ⇨ **बालकाय** मधुरं रोचते।

☞ **क्रुध्यति, ईर्ष्यति, असूयति, द्रुह्यति, स्पृहयति इत्येतेषां प्रयोगे यः रोषादिपात्रं तद्वाचकात् चतुर्थी भवति।**

**यथा** ⇨ बालकः **मित्राय** क्रुध्यति।

⇨ महिला **प्रतिवेशिन्यै** ईर्ष्यति।

⇨ दुर्बलः **प्रबलाय** असूयति।

⇨ सा **पुष्पेभ्यः** स्पृहयति।

⇨ खलः **जनेभ्यः** द्रुह्यति।

☞ **'नमः, स्वस्ति, स्वाहा' - एतेषां योगे चतुर्थी भवति।**

**यथा** ⇨ **देव्यै** नमः।

⇨ **प्रजाभ्यः** स्वस्ति।

⇨ **अग्नये** स्वाहा।

☞ **यदर्थं क्रिया क्रियते / भवति तद्वाचकात् चतुर्थी भवति।**

**यथा** ⇨ हरिः **फलाय** याति।

⇨ कविः **यशसे** काव्यं लिखति।

## पञ्चमी-नियमाः

☞ **यतः अपायः (पृथग्भावः) भवति सः अवधिः उच्यते। अवधिवाचकात् शब्दात् पञ्चमी भवति।**

**यथा** ⇨ **वृक्षात्** पर्णं पतति।

☞ **यस्मात् भयं रक्षणं वा तद्वाचकात् पञ्चमी भवति।**

**यथा** ⇨ बालकः **व्याघ्रात्** भीतः।

⇨ भगवान् **कष्टात्** जनान् रक्षति।

☞ ***'विना'-योगे पञ्चमी भवति। (द्वितीया, तृतीया अपि भवतः)**

**यथा** ⇨ **शक्तेः** विना जयः न भवति। (शक्तिं विना, शक्त्या विना वा जयः न भवति।)

☞ **दिग्वाचिनां 'बहिः', 'ऋते' इत्यादीनां योगे पञ्चमी भवति।**

**यथा** ⇨ **मथुरायाः** पूर्वम् आगरानगरम् अस्ति।

⇨ **गृहात्** बहिः अङ्गनम् अस्ति।

⇨ **भीमात्** ऋते बकासुरं मारयितुम् अन्यः कोऽपि न समर्थः।

☞ **हेतुवाचकशब्दात् पञ्चमी भवति।**

**यथा** ⇨ सः **क्रोधात्** बालं ताडयति।

## षष्ठी-नियमाः

☞ **सम्बन्धं द्योतयितुं षष्ठी विभक्तिः भवति।**

**यथा** ⇨ **दशरथस्य** पुत्रः रामः।

⇨ **राज्ञः** शिरसि किरीटम् अस्ति।

⇨ **छात्रस्य** हस्ते पुस्तकम् अस्ति।

⇨ एतत् **मम** पुस्तकम्।

☞ **कृदन्तक्रियाणां प्रयोगे कर्मवाचकात् षष्ठी भवति।**

**यथा** ⇨ बालकः **दुग्धस्य** पानं करोति।

⇨ छात्रः **ग्रन्थस्य** पठनं करोति।

⇨ माता **द्वारस्य** उद्घाटनं करोति।

☞ **कृदन्तक्रियाणां योगे कर्तृवाचकात् षष्ठी भवति।**

**यथा** ⇨ **रामस्य** पठनं भवति।

⇨ **बालकस्य** लेखनं भवति।

⇨ **मम** गमनम् अस्ति।

### विवरणम्

☞ **यत्र तु युगपद् वाक्ये कर्तृपदस्य कर्मपदस्य च प्रयोगः तत्र कर्मणि एव षष्ठी विभक्तिः।**

**यथा** ⇨ बालकः **दुग्धस्य** पानं करोति।

☞ **यदि 'करोति' इति पदं न भवति तदा कर्तरि तृतीया, षष्ठी वा भवतः।**

**यथा** ⇨ बालकेन **दुग्धस्य** पानम्।

⇨ **बालकस्य दुग्धस्य** पानम्।

☞ **शतृ, शानच्, क्त, क्तवतु, क्त्वा, तुमुन् इत्यादीनां कृदन्त-प्रत्ययानां प्रयोगे कर्तरि कर्मणि षष्ठी न भवति।**

**यथा** ⇨ देवदत्तः ग्रामं गच्छन् रोदिति।

⇨ रमेशः ग्रामं गतवान्।

⇨ सः पाठं पठितुं गच्छति।

## सप्तमी-नियमाः

☞ **आधारवाचकात् सप्तमी विभक्तिः भवति।**

**यथा** ⇨ **गृहे** वसति।

⇨ **कटे** आस्ते।

☞ **निर्धारणे सप्तमी विभक्तिः भवति।**

**यथा** ⇨ **गोषु** कृष्णा गौः बहुक्षीरा।

☞ **निर्धारणे षष्ठी अपि भवति।**

**यथा** ⇨ **गवां** कृष्णा गौः बहुक्षीरा।

☞ **दूरान्तिकार्थेभ्यः शब्देभ्यः सप्तमी विभक्तिः अपि भवति।**

**यथा** ⇨ ग्रामस्य **दूरे** वसति।

⇨ ग्रामस्य **अन्तिके** वसति।

☞ **'आयुक्तः' (अर्थात् कस्मिंश्चित् कर्मणि रतः) 'कुशलः' इत्यर्थकात् शब्दाद् अपि सप्तमी विभक्तिः भवति।**

**यथा** ⇨ **कर्मणि** लग्नः / व्यापृतः / आयुक्तः / युक्तः / तत्परः।

⇨ **शास्त्रेषु** निपुणः / प्रवीणः / साधुः / पटुः / दक्षः।

## सम्बोधन-नियमाः

☞ **कस्यचित् अभिमुखीकरणं सम्बोधनं कथ्यते।**
**सम्बोधने सम्बोधनप्रथमायाः प्रयोगः भवति।**

**यथा** ⇨ हे **बालक** ! अत्र आगच्छ।

हे **बालकौ** ! अत्र आगच्छतम्।

हे **बालकाः** ! अत्र आगच्छत।

### विवरणम्

सम्बोधनप्रथमायां केवलम् एकवचने प्रथमातः रूपभेदः भवति। द्विवचने बहुवचने च समानम् एव।

## सप्त विभक्तयः

### प्राणिनां प्राणदा कृषिः

अस्माकं भारतवर्षं कृषिप्रधानः देशः अस्ति। अस्मिन् देशे बहुसंख्याकाः जनाः ग्रामेषु निवसन्ति। कृषिः एव तेषां मुख्यं जीविकासाधनम्। कृषिं विना अन्नस्य उत्पादनं न सम्भवति। अन्नं विना मानवजीवनं न सम्भवति। अन्नाद् एव जीवनशक्तिम् (ऊर्जाम्) आधाय प्राणिनः प्राणवन्तः गतिशीलाश्च भवन्ति। अतएव श्रीमद्भगवद्गीतायाम् उच्यते– 'अन्नाद् भवन्ति भूतानि' इति। अपि च 'अन्नं बहु कुर्वीत' इति वैदिकी सूक्तिः अस्मान् कृषिकर्मणि प्रेरयति। कृषिकर्मणा एव प्राणिनां प्राणाः सुरक्षिताः सन्ति। अतः 'प्राणिनां प्राणदा कृषिः' इति आप्तवाणी जनान् अध्वानं दर्शयति। धनोपार्जन-प्रसङ्गे वाणिज्यानन्तरं कृषेः एव स्थानं भवति स्म। यतो हि काचन प्राचीना सूक्तिः अस्मान् बोधयति यत्– "वाणिज्ये वसति लक्ष्मीः तदर्धं कृषिकर्मणि" इति।



अस्माकं प्राचीना कृषिव्यवस्था अतीव उन्नता वैज्ञानिकी च आसीत्। चतुर्षु वेदेषु कृषिविषये महत्त्वपूर्णानि तथ्यानि उपलभ्यन्ते। अथर्ववेदस्य तृतीयकाण्डे सप्तदशे सूक्ते कृषि-साधन-प्रक्रियादिविषये प्राञ्जलं वर्णनमुपलभ्यते। यजुषि सप्तदशाध्याये तदनुरूपं वर्णनं कृषेः महनीयतां सूचयति। साम्नः प्रथमे अर्चके कृषिविषयिणी विस्तृता चर्चा उपलभ्यते। एवमेव ऋग्वेदसंहितायाम् अपि कृषिविदां विचारवतां कवीनां विषये उल्लेखः प्राप्यते। एतेन प्रमाणितं भवति यत् वैदिककालिकी कृषि-व्यवस्था समुन्नता आसीत्।

वैदिकजनाः पृथिवीं स्वमातरं मन्वते। "माता भूमिः पुत्रोऽहं पृथिव्याः" इति सूक्तिः अथर्ववेदे विद्यते। पृथिवी मातेव अस्मान् पालयति इति जनानां बद्धमूला धारणा आसीत्। अतः ते कृषिं कृत्वा स्वजीविकाम् उपार्जयन्ति स्म। यद्यपि वैदिकजनाः स्वकृषिकार्यार्थं मुख्यतया वृष्टिम् आश्रिताः आसन् तथापि वेदे क्षेत्राणां सेचनप्रबन्धविषये अपि उल्लेखः प्राप्यते। सेचनकार्येषु कूपानाम् अपि उपयोगः भवति स्म। अरघट्टयन्त्रैः कूपेभ्यः जलं निस्सार्यते स्म। बृहतीभिः कुल्याभिः प्रवहमाणं जलं क्षेत्रेषु गच्छति स्म।



पशुपालनवृत्तिः कृषिकर्मार्थम् अत्यावश्यकी वर्तते। अत एव वैदिकसाहित्ये गोविषयिणी चर्चा आयाति। वैदिकजनाः गाः उत्तमधनरूपेण स्वीकुर्वन्ति। अथर्ववेदे "धेनुः सदनं रयीणाम्" इति उच्यते।

साम्प्रतम् अधिकम् उत्पादनम् अभिलषन्तः कृषिकाः वैज्ञानिकीं प्रणालीम् अनुसृत्य नेत्रे निमील्य रासायनिक-सारस्य, जैविकसारस्य, कीटनाशकौषधस्य च प्रयोगं कृत्वा प्राकृतिकीं व्यवस्थां विनाशयन्ति। तेन उत्पादनाभिवृद्धिस्तु जायते परन्तु लाभापेक्षया हानिरेव अधिका जायते। अत्युत्कटकीटनाशकौषधानां प्रयोगात् खाद्येन सह तद् विषमपि अस्माकं शरीरे प्रविशति। एवम् अस्माकं शरीरं महद्भिः रोगैः प्रतिदिनं क्षीयते। हरितपादपानां कर्तनेन अरण्यानि नष्टानि भवन्ति। तेन भूमेः जलं दिनानुदिनं ह्रासं भजति। एवमेव विश्वस्मिन् विश्वे पर्यावरणं प्रभावितं भवति। अस्मिन् प्रसङ्गे परमकारुणिकैः प्रातःस्मरणीयैः महर्षिभिः परिकल्पिता यज्ञपद्धतिरपि अस्माकं साहाय्यार्थं भवति। अत एव साम्प्रतिकी कृषिव्यवस्था यदि वैदिकीं कृषिपद्धतिम् अनुसरेत् तर्हि समेषां मनुष्याणां महते कल्याणाय भवेत्। कृषिकर्मणि मारक-वस्तूनां परिहारः न क्रियते चेत् प्राणिनां 'प्राणदा' कृषिः 'प्राणहा' कृषिः सेत्स्यति इत्यत्र नास्ति सन्देहस्य अवसरः।

◆◆◆

## अभ्यासः — 140

1. **पाठाधारेण सूक्तानि पूरयत–**

[ पाठ के आधार पर सूक्तियों की पूर्ति करें। Complete the good-sayings on the basis of the lesson. ]

(i) अन्नाद् भवन्ति ______ ।

(ii) अन्नं बहु ______ ।

(iii) प्राणिनां ______ ।

(iv) वाणिज्ये वसति ______ ।

(v) माता भूमिः ______ ।

(vi) धेनुः सदनं ______ ।

2. **योजयत–**

[ इसे जोड़ें। Match the following. ]

| | | | | |
|---|---|---|---|---|
| उदा. (i) | मुनिः | — | (क) | नपुं. |
| (ii) | माता | | (ख) | पुं. |
| (iii) | शिशुः | | (ग) | स्त्री. |
| (iv) | दाता | | (घ) | स्त्री. |
| (v) | हरिः | | (ङ) | नपुं. |
| (vi) | वारि | | (च) | पुं. |
| (vii) | नारी | | (छ) | स्त्री. |
| (viii) | स्वसृ | | (ज) | स्त्री. |
| (ix) | मतिः | | (झ) | पुं. |
| (x) | जानु | | (ञ) | पुं. |

**3. अधोलिखितानां पदानां प्रातिपदिकं निर्दिशत–**

[ अधोलिखित पदों के प्रातिपदिक निर्देश करें। Point out the crude forms of the following words. ]

| उदा. | | प्रातिपदिकम् | | | प्रातिपदिकम् |
|---|---|---|---|---|---|
| (i) | पिता | पितृ | (ii) | कविः | |
| (iii) | दधि | | (iv) | राजा | |
| (v) | सरित् | | (vi) | धनुः | |
| (vii) | शिशुः | | (viii) | माता | |
| (ix) | वर्म | | (x) | पयः | |

**4. अधोलिखितानां पदानाम् अन्त्यनिर्देशं लिखत–**

[ अधोलिखित पदों के अन्तिम निर्देश करें। Point out the endings of the follwing words. ]

| उदा. | | अन्त्यनिर्देशः | | | अन्त्यनिर्देशः |
|---|---|---|---|---|---|
| (i) | कविः | इकारान्तः | (ii) | दिक् | |
| (iii) | कर्म | | (iv) | विद्वान् | |
| (v) | वपुः | | (vi) | स्वसा | |
| (vii) | राजा | | (viii) | अक्षि | |
| (ix) | चक्षुः | | (x) | आत्मा | |

**5. अधोलिखितानां पदानां वचनं निर्दिशत–**

[ अधोलिखित पदों के वचन निर्देश करें। Point out the number of the follwing words. ]

| | | वचनम् | | | वचनम् |
|---|---|---|---|---|---|
| (i) | वारिणी | | (ii) | कवयः | |
| (iii) | प्रभू | | (iv) | गावः | |
| (v) | दिशः | | (vi) | नामानि | |
| (vii) | सरितौ | | (viii) | वणिजः | |
| (ix) | पितरः | | (x) | मती | |

6. **यथोदाहरणम् अधोलिखितानि पदानि अजन्तरूपाणि हलन्तरूपाणि वा कोष्ठके चिह्नीकुरुत—**
[ उदाहरण के अनुसार अधोलिखित पद अजन्त या हलन्त रूप हैं उचित कोष्ठक में चिह्नित करें। Tick (✓) mark in the appropriate box considering whether the following words end with vowels or consonants as shown in the example. ]

| | | | अजन्तरूपम् | हलन्तरूपम् |
|---|---|---|---|---|
| उदा. | (i) | कविना | ✓ | |
| | (ii) | माता | | |
| | (iii) | विधाता | | |
| | (iv) | राजा | | |
| | (v) | विपदः | | |
| | (vi) | दाता | | |
| | (vii) | विदुषाम् | | |
| | (viii) | धनुषः | | |
| | (ix) | गुरूणाम् | | |
| | (x) | समिधा | | |
| | (xi) | गवाम् | | |
| | (xii) | कर्मणि | | |
| | (xiii) | वारिणि | | |
| | (xiv) | जानुभ्याम् | | |
| | (xv) | मनसा | | |
| | (xvi) | मतिना | | |
| | (xvii) | गुणिना | | |
| | (xviii) | कर्मणा | | |
| | (xix) | साधुना | | |

**7. अधोलिखितानां पदानां विभक्तिं वचनं च लिखत–**

[अधोलिखित पदों के विभक्ति एवं वचन लिखें। Write the case and number of the following words.]

| | | विभक्तिः | वचनम् |
|---|---|---|---|
| उदा. | (i) जलधिना | तृतीया | एक. |
| (ii) | कर्मणा | | |
| (iii) | वपुषि | | |
| (iv) | प्रभोः | | |
| (v) | विद्वांसः | | |
| (vi) | मतीनाम् | | |
| (vii) | दधनि/दध्नि | | |
| (viii) | गवाम् | | |
| (ix) | सरिता | | |
| (x) | विपदि | | |
| (xi) | आत्मने | | |
| (xii) | राज्ञि | | |
| (xiii) | धेनोः | | |
| (xiv) | पितरः | | |
| (xv) | जानुना | | |
| (xvi) | मनसः | | |
| (xvii) | महताम् | | |
| (xviii) | तरून् | | |
| (xix) | तपोभिः | | |
| (xx) | वाचि | | |
| (xxi) | जामातुः | | |
| (xxii) | मात्रा | | |
| (xxiii) | दिशम् | | |
| (xxiv) | नाम्नः | | |
| (xxv) | धनुषा | | |

**8. अधोलिखितानां सर्वनामपदानां लिङ्गं, विभक्तिं वचनं च निर्दिशत—**

[ अधोलिखित सर्वनाम पदों के लिङ्ग, विभक्ति एवं वचन लिखें। Write the gender, case-ending and number of the following pronouns.]

| | | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| उदा. | (i) सर्वे | पुं. | प्रथमा | बहु. |
| (ii) | कया | | | |
| (iii) | एनम् | | | |
| (iv) | सः | | | |
| (v) | एतत् | | | |
| (vi) | सर्वाभिः | | | |
| (vii) | अन्येन | | | |
| (viii) | तया | | | |
| (ix) | अनया | | | |
| (x) | तस्य | | | |
| (xi) | सर्वासाम् | | | |
| (xii) | येन | | | |
| (xiii) | अन्यस्याः | | | |
| (xiv) | एभिः | | | |
| (xv) | केषु | | | |
| (xvi) | अस्य | | | |
| (xvii) | ताभ्यः | | | |
| (xviii) | भवता | | | |
| (xix) | भवती | | | |
| (xx) | सर्वाः | | | |

**9. कोष्ठकेषु लिखितेषु पदेषु उचितं रूपं चित्वा रिक्तस्थानानि पूरयत--**

[ कोष्ठक में लिखित पदों में से उचित रूप चुनकर रिक्तस्थानों की पूर्ति करें। **Fill in the blanks with one of the words given in the bracket.** ]

| | | | |
|---|---|---|---|
| (i) | बालकः | पश्यति। | (चन्द्रं, चन्द्रे, चन्द्रः) |
| (ii) | हरिः | अधिवसति। | (वैकुण्ठे, वैकुण्ठम्, वैकुण्ठाय) |
| (iii) | पुत्रः | सह गच्छति। | (पिता, पितुः, पित्रा) |
| (iv) | माता | भिक्षां ददाति। | (भिक्षुकं, भिक्षुकाय, भिक्षुकस्य) |
| (v) | बालिका | स्पृहयति। | (पुष्पैः, पुष्पेभ्यः, पुष्पाणाम्) |
| (vi) | रमेशः | लिखति। | (लेखनी, लेखन्या, लेखन्या) |
| (vii) | शिशुः | बिभेति। | (कपेः, कपिम्, कपिना) |
| (viii) | राजा | क्रुध्यति। | (अरीन्, अरिभिः, अरिभ्यः) |
| (ix) | माता | स्निह्यति। | (शिशुम्, शिशौ, शिशवे) |
| (x) | सर्वे | फलं प्राप्नुवन्ति। | (कर्म, कर्मणा, कर्मणः) |

सुभाषितेषु सप्त विभक्तयः

# सुभाषितानि

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलास्तु भगवन् हे कृष्ण तुभ्यं नमः॥

◆◆◆

**कथायां सप्त विभक्तयः**

## भाग्यचक्रम्

हीरालालः कस्यचित् कृषकस्य पुत्रः आसीत् । तस्य पितुः लघु क्षेत्रम् आसीत् । अहर्निशं श्रमं कृत्वा अपि सः यत् किञ्चित् उपार्जयति स्म तेन तस्य परिवारस्य भरणपोषणं न सम्भवति स्म । परन्तु हीरालालस्य एतद्विषये उपेक्षाभावः एव आसीत् । सः समयेन भोजनं कृत्वा महता आनन्देन कदाचित् क्षेत्रेषु, कदाचित् नद्याः तीरे, कदाचित् च वनप्रदेशेषु भ्रमन् आसीत् ।



पिता बालकं हीरालालं बहुवारम् अबोधयत्– "पुत्र ! त्वमपि मया सह क्षेत्रं गच्छ । श्रमं कुरु । श्रमेण विना फलं न लभ्यते । वस्तुतः श्रमः हि सामान्यं जनं महान्तं करोति । तुभ्यं यत् कार्यं रोचते तत् अवश्यं कुरु । एतेन अस्माकं परिवारस्य आर्थिकी स्थितिः सुदृढा भविष्यति" इति । परन्तु हीरालालस्य कर्णयोः एतत् सर्वं मनागपि न प्रविशति स्म ।

कालक्रमेण वार्धक्यात् श्रमाधिक्यवशात् च हीरालालस्य पिता महता व्याधिना आक्रान्तः अभवत् । सः पुनः तस्मात् व्याधेः मुक्तः एव न अभवत् । बहुकालं यावत् शय्यायां पतित्वा सः पञ्चत्वं प्राप्तवान् । ततः हीरालालस्य क्षेत्रस्य कर्षणम् उचितरीत्या न समभवत् । गृहे अर्थाभावः तु पूर्वमेव आसीत् । कृषिकर्मणः अवहेलनात् खाद्याभावस्य स्थितिः समुत्पन्ना । एतेन व्यथिता हीरालालस्य माता हीरालालं प्राबोधयत्– सूनो ! गृहस्य दुरवस्थां त्वं पश्यन् असि, एवं कथं जीवनं भविष्यति । इदानीं त्वं धनार्जनविषये अपि चिन्तय । मम किम् ? अहं तु वृद्धा अस्मि । परन्तु तव सुदीर्घं भविष्यद् वर्तते । अतः त्वं नगरं गत्वा किमपि कार्यं कुरु । येन अस्माकं परिवारस्य पोषणं भवेत् ।



हीरालालः मातुः वचोभिः प्रभावितः अभवत् । सः नगरं गन्तुं सम्मतिं दत्तवान् । माता प्रतिवेशिनः गृहात् गोधूमचूर्णम् आनीय चतस्रः रोटिकाः निर्मितवती । हीरालालः एकां रोटिकां खादित्वा अपराः तिस्रः रोटिकाः पाथेयरूपेण अङ्गवस्त्रे बद्ध्वा वृत्तेः अन्वेषणाय नगरीं प्रस्थितवान् । मार्गे सः काञ्चित् अटवीं प्राप्तवान् । पद्भ्यां चलन् सः अतीव श्रान्तः आसीत् । क्षुधा अपि तं भृशं पीडयति स्म । अतः सः एकस्य जलाशयस्य समीपे रोटिकाः खादितुं उपविष्टवान् । तस्य पार्श्वे तिस्रः रोटिकाः आसन् । सः आत्मना परामृष्टवान्– "एकां खादिष्यामि, द्वे वा खादिष्यामि, तिस्रः वा खादिष्यामि" इति । तस्मिन् जलाशये तिस्रः जलकन्याः निवसन्ति स्म । हीरालालस्य स्वगतं विचारं श्रुत्वा ताः भीताः अभवन् ।



हीरालालः ताः एव उद्दिश्य "एकां, द्वे, तिस्रः वा खादितुम् आत्मना परामृशति" इति ताः चिन्तितवत्यः ।

ततः ताः जलकन्याः वारिणः बहिः आगत्य अवदन्– "भो भवान् ! अस्मान् न खादतु । वयं भवते त्रीन् उपहारान् दद्मः । एते उपहाराः अतीव विस्मयकराः सन्ति" । ततः तासु जलकन्यासु एका तस्मै एकां मञ्जूषां दत्त्वा अवदत्– "भवान् इमां मञ्जूषां यत् किमपि याचिष्यति सा भवते अवश्यं दास्यति" इति । द्वितीया कन्या तस्मै एकं दण्डं प्रदाय अवदत्– "भवान् अस्य दण्डस्य प्रयोगेण शत्रून् अनायासं वशीकर्तुं शक्नोति" इति । ततः तृतीया जलकन्या तस्मै एकम् उष्णीषं प्रदाय अवदत्– "एतत् उष्णीषं परिधाय भवान् यत्र कुत्रापि गन्तुम् इच्छति तत्र अचिरं गन्तुं शक्नोति" इति । हीरालालाय उपर्युक्तानि उपायनानि प्रदाय ताः जलकन्याः तस्मात् स्थानात् अन्तर्हिताः अभवन् ।



अथ हीरालालः तस्याः मञ्जूषायाः सकाशात् उत्तमं भोजनं, राजोचितं वस्त्रम्, एकम् अश्वं च अकामयत । सर्वप्रथमम् अत्युत्तमैः भोजनपानैः तृप्तः सः राजकुमारस्य वस्त्रं परिधाय अश्वं च उपविश्य मातरं मेलितुं स्वगृहं प्रति प्रस्थितवान् । अश्वम् आरुह्य हीरालालः यावत् किञ्चिद् दूरं गतवान् तावद् वनप्रदेशे कस्यचन राज्ञः सैनिकाः तं निगृहीतवन्तः । वस्तुतः तत् क्षेत्रं राजकुमार्याः आखेटक्षेत्रम् आसीत् । हीरालालः जलकन्याभ्यः प्राप्तेन दण्डेन तान् अरीन् पराजितवान् ।



दूरे स्थिता राजकुमारी हीरालालस्य वीरोचितं कार्यजातं पश्यन्ती आसीत्। सा हीरालालस्य अलौकिक-शक्त्या प्रभाविता अभवत्। हीरालालः अपि राजकुमारीं दृष्ट्वा तस्याः सौन्दर्येण आकृष्टः अभवत्। प्रसन्नः च सः राजकुमारीम् अश्वे उपावेश्य, उष्णीषं परिधाय नभसि डयमानः स्वगृहं प्राप्तवान्।

माता हीरालालं दृष्ट्वा अतीव प्रसन्ना अभवत्। हीरालालः मातरं सर्वं वृतान्तम् अश्रावयत्। सः राजकुमारीं परिणेतुम् इच्छति इति मात्रे निवेदितवान्। एवं शुभे अहनि शुभे च मुहूर्ते हीरालालस्य राजकुमार्या सह विवाहः सम्पन्नः। ततः हीरालालः मञ्जूषायाः प्रयोगेण एकं दिव्यं प्रासादं निर्मितवान्। तस्मिन् प्रासादे मात्रा पत्न्या च सह सुखेन समयं यापितवान्। प्रासादस्य परिसरे एकां शोभनां पुष्करिणीम् उत्खातवान्। सः तत्र तासां तिसृणां जलकन्यानां मूर्तीः निर्मापितवान्। ग्रामीणाः अपि तं स्वराजानम् अमन्यन्त। हीरालाले अपि महत् परिवर्तनम् आगतम्। आलस्यं परित्यज्य सः प्रजानां हितकर्मणि आत्मानं नियोजितवान्।



◆◆◆

# Teach Yourself Samskrit

पञ्चमी दीक्षा
व्युत्पादिनी

चतुर्थी दीक्षा
वाङ्मयावगाहनी

तृतीया दीक्षा
वाङ्मयावतरणी

द्वितीया दीक्षा
व्यवहारावगाहनी

प्रथमा दीक्षा
व्यवहारावतरणी

संस्कृतस्वाध्यायः

राष्ट्रिय संस्कृत संस्थानम्
मानितविश्वविद्यालयः
नव देहली